श्री श्री लक्ष्मीनृसिंहाय नमः

पैप्पलादवशादिषट्कर्मपद्धतिः

ପୈପ୍ପଲାଦବଶାଦିଷଟ୍କର୍ମପଦ୍ଧତିଃ

PAIPPALADA VASHADISATKARMA PADDHATIH



श्रीयुक्त उमाकान्त पण्डा

साहित्यायुर्वेदाचार्य्यः

पैप्पलादवशादिषट्कर्मपद्धतिः

ପୈପ୍ପଲାଦବଶାଦିଷଟ୍କର୍ମପଦ୍ଧତିଃ

PAIPPALADA VASHADISATKARMA PADDHATIH



श्रीयुक्त उमाकान्त पण्डा

साहित्यायुर्वेदाचार्य्यः

PAIPPALADA VASHADISATKARMA PADDHATIH

By :

Pandit Umakanta Panda
At : - Sutei Badagan
P.O. : - Chhanapur
Dist : - Balasore
Orissa
756019
India
Ph. : (06782) 254172

Composed by :


Maruti D. T. P. Centre
Port Road,
Motiganj
Balasore

Printed at :

Khirachora Offset
Remuna Golei
Remuna
Balasore


PUBLISHED WITH THE FINANCIAL ASSISTANCE FROM THE RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI ON 2003.

प्रोत्साहकः



आर्लोग्रीफिक्स
Drs. Arlo Griffiths
Onderzoekschool CNWS
School voor Aziatische, Afrikaanse en Amerindische Studies
Postbus 9515 2300 RA Leiden

शोधकर्त्ता



पण्डित उमाकान्त पण्डा
जन्मदिनं ता ७।११।१९३२ रिका
ग्राम : सुतेइ बडगाँ, पो : छणपुरम्, बालेश्वरम्, ओडिशा – ७५६०१९

पूर्वाभासः

आसीदथर्ववेदविद्वान् श्रीधरमहोपाध्याय उड्रप्रदेशे वालेश्वर-मण्डलाऽन्तर्गतमयूरग्रामे । यः कर्मपञ्जिका कर्मसमुच्चयो वा इति ग्रन्थे पैप्पलादशाखाया गर्भाधानादारभ्य अन्त्येष्टिं यावत् संस्कारकर्मणां विधानं सप्तजातसंस्थाध्याये तथा नक्षत्राङ्गिरसाऽऽसुरीकल्पादिषु स्थितानाम-थर्ववेदोक्त वैदिकतन्त्राणामर्थाद् वशादिषट्कर्मणां विधानं वर्णितवान् । अयमथर्ववेदकर्मकाण्डाध्यापकरूपेण तदा सुपरिचितो भूत्वा उपाध्यायात् महोपाध्यायपदवीभूषितोऽभवत् । भक्तकवि-माधवपट्टनायकविरचितवैष्णव-लीलामृतनामकग्रन्थे वर्त्तते -

" रेमुणाकटके रहि, गोपीनाथ मूर्त्ति सेवइ ।
पढइ गोपालतापिनी, पइपलसूत्रवखाणि ।७१।"

गोपालतापिनी, तापनीय वा अथर्ववेदे वर्त्तते । तथा "योऽध्यापयति वृत्त्यर्थं स उपाध्याय उच्यते "। वेदवेदाङ्गानामध्यापक एव उपाध्यायः । इमं विद्वांसं केवलमथर्ववेदकर्मकाण्डज्ञातारः जानन्ति, नाऽन्ये । अस्य विदुषः पूर्ववर्त्ती भूधरमहोपाध्याय आसीत् । अयमपि उड्रदेशीयः अथर्ववेद-विदामग्रगण्यः । इदानीमपि अयं विद्वान् लोकलोचनान्तराले वर्त्तते । अस्य इतिहासः नास्ति । किन्तु अस्मिन् ग्रन्थे "आसुरी दीपिका" वर्त्तते । रचयिता भूधरः । उभौ श्रीलक्ष्मीनृसिंहोपासकौ आस्ताम् । अथर्ववेदविद् ब्राह्मणानामिष्टदेवः श्रीनृसिंहः । अतः भूधर श्रीधरौ अथर्ववेद ब्राह्मणसन्तानौ एव । श्रीमद् भागवतादिग्रन्थानां व्याख्यातृरूपेण परिचितस्य श्रीधरस्वामिनः यथा तथा इतिहासः लभ्यते । तस्मादितिहासाद् विचारयामि यः श्रीधरस्वामी स एव श्रीधर महोपाध्याय इति । यतः श्रीधरस्वामी नृसिंहमन्त्रसिद्धः, सर्वत्र श्रीनृसिंहं स्तौति स्म । श्रीधर महोपाध्यायोऽपि तथैव । अस्य पिता हरिहरः । स्वयं श्रीधरः कर्मपञ्जिकायां " ब्रह्मवेदे च निष्णातः कृती हरिहरात्मजः" इति लिखितवान् । इमं पैप्पलादवशादिषट्कर्मपद्धति ग्रन्थं यो न जानाति स श्रीनृसिंहमन्त्रसिद्धः कथं स्यात् ? एतस्मिन् विषये "पण्डित श्रीधरस्वामी" नामकं पुस्तकं द्रष्टव्यम् । नाऽत्राऽऽलोचनाऽवसरः ।

श्रीधरकृतकर्मपञ्जिकायाम् एकः सप्तजातसंस्थाध्यायः अपरः तन्त्राध्यायः, एवं द्वौ अध्यायौ वर्त्तेते । सप्तजातसंस्थाध्यायमवलम्ब्य "पैप्पलादविवाहादिसंस्कारपद्धतिः" नामकं शोधग्रन्थमहं प्रकाशितवान् । अधुना "पैप्पलादवशादिषट्कर्मपद्धतिः" नामकमिदं ग्रन्थं प्रकाशयामि । अयं ग्रन्थः द्वितीयभागः । पूजाहोमादिषु व्यवहृतमन्त्राः प्रायशः प्रथमभागे पैप्पलादविवाहादिसंस्कारपद्धतिग्रन्थे वर्त्तन्ते । तन्त्रकर्मणि सर्वत्र नक्षत्रकल्पोक्त स्थण्डिलविधानमनुसृत्य यथानिर्द्दिष्टवेदिकायां निर्द्दिष्टाऽग्नेः संस्थापनं कर्त्तव्यम् । यत्र विशेषविधिर्वर्त्तते तत्र तथैव भविष्यति । तथापि अथर्ववेदकर्मकाण्डज्ञैः सह आलोच्य कर्मकुर्य्यात् । अभिचारकर्माणि साधु न भविष्यन्ति चेत् कर्त्तुः कारयितुश्चानिष्टकराण्येव । काम क्रोधादिवशवर्त्तीभूत्वा एतानि कर्माणि न करणीयानि । केवलं देशरक्षार्थं समूहस्वार्थरक्षार्थञ्च अभिचारकर्मणां व्यवहारः भवति । तत्राऽपि कर्म कृत्वा प्रायश्चितं कुर्य्यात् । आसुरी दुर्गापूजायां केवलं पशुवलिव्यवस्था वर्त्तते । अन्यत्र कदली प्रभृति द्रव्याण्येव वलिदानविधौ व्यवहृतानि भवन्ति । ॐ अवरेणुम् इति मन्त्रेण हस्तप्रक्षालनं कृत्वा आचमनादिकं पुरुषसंस्कारञ्च सर्वकर्माणि कुर्य्यात् । मितादि पूजा यत्र भविष्यति तत्र प्रथमपक्षमनुसृत्य कर्म भवेत् । किन्तु अधुना द्वितीयपक्षानुसारं सर्वे इमां पूजां कुर्वन्ति ।

प्रथमपक्ष पूजाविधिः - मण्डपस्य पूर्वभागे भृग्वङ्गिरोरूपं कलसं पूजार्थं संस्थाप्य तदुत्तरपार्श्वे उदीच्यादि प्राच्यन्तं परंपरानुक्रमेण एव मितादिभृगुपर्य्यन्तानां देवानां पञ्चमृण्मयी प्रतिमाः प्रत्यग्भूमिः स्थापयित्वा घटस्य दक्षिणपार्श्वे पूर्ववदुत्तरादि दक्षिणान्तं अङ्गिरसः आरभ्य

क्षेत्रपालान्तं पञ्च मृण्मयीप्रतिमाः स्थापयेत् । अत्र मितादिचत्वारः गणेशा एव । घटस्याऽधः पश्चात् मण्डलिकाद्वयं गणपतिशिवपूजनार्थं विधाय तत् सन्निधौ नवग्रहमण्डलमध्ये यथास्थानं नवग्रहप्रतिमा निधाय तत् पश्चिमभूभागे अष्टदलपद्मं विलिख्य तत्र लोकपालान् दिक्पालांश्च पूजयेत् । घटस्य पुरस्तात् षोडशमातृकाऽर्च्चननिमित्तमुत्तरादि दक्षिणान्तं क्रमेणैव षोडश कलशान् संस्थाप्य तत्र मातृकाः पूजयेत् । भृग्यङ्गिरो घटस्य पूर्वभागे ब्रह्मघटं प्रत्यङ्मुखं संस्थाप्य पूजयेद् ब्रह्माणम् । यदा यथोक्तलक्षणस्य चतुर्वेदविद् ब्राह्मणस्याऽभावः वभूव तदा ब्रह्मणः स्थाने कुशद्विजं व्यवहृतवन्तः ब्राह्मणाः । सर्वकर्मसु देवता प्राणप्रतिष्ठापन-कर्मानुसारं फलम् । आङ्गिरसादिकल्पेषु यानि यानि कर्माणि यद् यद् विधानानि च सन्ति तत् सर्वमत्र विद्यते । सूचकपत्रं द्रष्टव्यम् । बालेश्वरमण्डलान्तर्गताऽसिमलाग्रामनिवासिनः श्रीदामोदरमिश्र-महात्मनः गृहादिदं प्राप्तवान् । अद्याऽपि तत्र तालपत्र पुस्तकाकारेण सर्वं विद्यते। परन्तु अस्मिन् विषये न कोऽपि अनुरागी । दायादानां कृते विद्या तिष्ठतु तथा ज्ञानिनः विद्यामिमां ज्ञात्वा परीक्षणं कुर्वन्तु इति विचार्य्य यथाशक्ति ग्रन्थं परिष्कृत्य प्रकाशितवान् । अस्मिन् कर्मणि आलोंग्रिफिक्स् (मत् प्रदत्तनाम आलोक इति) नामधारी नेदारलेण्ड निवासी अथर्ववेद पि. एच्. डि. छात्रः मम प्रोत्साहकः । स युरोपस्थोऽपि वैदिकतत्त्वाभिलाषी, मन्ये, एतत् पूर्वजन्मफलम् । अतः भगवते निवेदयामि तस्य सततं शुभं भवतु । पाश्चात्यानां वैदिकसंस्कृत्यनुरागः पृथिव्यां नितरां शुभसूचकः ॥

तन्त्रकर्माणि निषिद्धान्यपि स्थानकालदीननुसृत्य कर्त्तव्यान्येव । अत्रावसरे श्री हर्षकवेर्वचनं स्मृतिपथमागच्छति -

"निषिद्धमप्याचरणीयमापदि क्रियासतीनावति यत्र सर्वथा ।
घनाऽम्वुनाराजपथेऽतिपिच्छिले क्वचिद्वुधैरप्यपथेन गम्यते ॥"

(नैषधनवमसर्गस्य ३६ श्लोकः)

पुनश्च नीतिरप्यस्ति - "एकं त्यजेत् कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे ", इत्यादिः । अर्थात् समष्टिनिमित्तं व्यष्टिं त्यजेत् । निषिद्धकर्मत्वेन संग्रामोऽपि त्याज्यः, किन्तु सन्त्रासकानां विनाशोऽपि कर्त्तव्यः, यदि वशादिपश्चकर्मणां प्रयोगाद् देशात् सन्त्रासवादः दूरं गमिष्यति तथा जनाः शान्तिं लप्स्यन्ते तर्हि मारणकर्मणा किम् ? पुरा वैदिकतन्त्राणां प्रयोगात् सर्वाः क्रिया अभवन् । मनोविज्ञानसम्मत मन्त्रशक्त्या देवा असुराश्च वलशालिनः वभूवुः । अधुनाऽपि प्रत्यहं देवालय प्रतिष्ठा भवति । तत्र वेदमन्त्राणां प्रयोगैः पूजाकर्म संपद्यते । तत् स्थलं प्रतिं जनसमागमः क्रमशोवर्द्धते । सर्वेषां हृदये फलाशा विद्यते । " कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन " इममुपदेशं प्रायशः सर्वे जानन्ति, किन्तु नाचरन्ति कर्मणा । तथापि देवताराधनया ये समयं यापयन्ति ते धन्याः । देवालयनिर्माणं कर्त्तव्यम् । यतः आस्तिकत्वं मानवानां समुन्नतेः मूलकारणम् । वयं परं ब्रह्मणोऽवतारभूतस्य श्रीरामचन्द्रस्य मन्दिरनिर्माणं कर्त्तुं यथा सततमुत्कण्ठितास्तथैव श्रीरामस्य त्यागपूतमाचरणमपि आचरेम । एतेन गान्धिमहात्मनः कल्पितरामराज्यं यथाऽधुनाऽपि स्वप्नमिव तथा न स्थास्यति । अधुना -

मनस्येकं वचनस्येकं कर्मण्येकं महात्मनः ।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनः ॥

अस्य नीति वाक्यस्य समीक्षाऽस्माभिः कर्त्तव्या । यतः सत्कर्मसु मनोवचनकर्मणामैक्यमेव उन्नतेः मूलम् । किं वहुना ? अस्मिन् शोधकर्मणि वहवः सज्जना मामुत्साहितवन्तः । तेभ्यः सर्वेभ्यः कृतज्ञतां ज्ञापयामि । इमं शोधग्रन्थं परीक्षितुं भारतसर्वकारेभ्यः पुनः पुनः निवेदयामि । भारतवर्षे वैदिकतत्त्वज्ञानामभावः नास्ति, केवलं प्रोत्साहनमावश्यकम् । देवतासु प्राण प्रतिष्ठाकर्म मनोजन्यमेव । अत्र ध्यानभावनादयः द्रष्टव्याः । "यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।" जडविज्ञानात् मनोविज्ञानस्य प्रभावः वलवत्तरः । अन्तिमे वयस्यहं पश्यामि भविष्यद् भारतवर्षस्वप्नम् । यत्र क्रमशः महायात्रा काव्यचतुर्थसर्गवर्णितविषयाणां

क्षेत्रपालान्तं पञ्च मृण्मयीप्रतिमाः स्थापयेत् । अत्र मितादिचत्वारः गणेशा एव । घटस्याऽधः पश्चात् मण्डलिकाद्वयं गणपतिशिवपूजनार्थं विधाय तत् सन्निधौ नवग्रहमण्डलमध्ये यथास्थानं नवग्रहप्रतिमा निधाय तत् पश्चिमभूभागे अष्टदलपद्मं विलिख्य तत्र लोकपालान् दिक्पालांश्च पूजयेत् । घटस्य पुरस्तात् षोडशमातृकाऽर्च्चननिमित्तमुत्तरादि दक्षिणान्तं क्रमेणैव षोडश कलशान् संस्थाप्य तत्र मातृकाः पूजयेत् । भृग्यङ्गिरो घटस्य पूर्वभागे ब्रह्मघटं प्रत्यङ्मुखं संस्थाप्य पूजयेद् ब्रह्माणम् । यदा यथोक्तलक्षणस्य चतुर्वेदविद् ब्राह्मणस्याऽभावः वभूव तदा ब्रह्मणः स्थाने कुशद्विजं व्यवहृतवन्तः ब्राह्मणाः । सर्वकर्मसु देवता प्राणप्रतिष्ठापन-कर्मानुसारं फलम् । आङ्गिरसादिकल्पेषु यानि यानि कर्माणि यद् यद् विधानानि च सन्ति तत् सर्वमत्र विद्यते । सूचकपत्रं द्रष्टव्यम् । बालेश्वरमण्डलान्तर्गताऽसिमलाग्रामनिवासिनः श्रीदामोदरमिश्र-महात्मनः गृहादिदं प्राप्तवान् । अद्याऽपि तत्र तालपत्र पुस्तकाकारेण सर्वं विद्यते । परन्तु अस्मिन् विषये न कोऽपि अनुरागी । दायादानां कृते विद्या तिष्ठतु तथा ज्ञानिनः विद्यामिमां ज्ञात्वा परीक्षणं कुर्वन्तु इति विचार्य्य यथाशक्ति ग्रन्थं परिष्कृत्य प्रकाशितवान् । अस्मिन् कर्मणि आर्लोग्रिफिक्स् (मत् प्रदत्तनाम आलोक इति) नामधारी नेदारलेण्ड निवासी अथर्ववेद पि. एच्. डि. छात्रः मम प्रोत्साहकः । स युरोपस्थोऽपि वैदिकतत्त्वाभिलाषी, मन्ये, एतत् पूर्वजन्मफलम् । अतः भगवते निवेदयामि तस्य सततं शुभं भवतु । पाश्चात्यानां वैदिकसंस्कृत्यनुरागः पृथिव्यां नितरां शुभसूचकः ॥

तन्त्रकर्माणि निषिद्धान्यपि स्थानकालदीननुसृत्य कर्त्तव्यान्येव । अत्रावसरे श्री हर्षकवेर्वचनं स्मृतिपथमागच्छति –

"निषिद्धमप्याचरणीयमापदि क्रियासतीनावति यत्र सर्वथा ।
घनाऽम्वुनाराजपथेऽतिपिच्छिले क्वचिद्वुधैरप्यपथेन गम्यते ॥"

(नैषधनवमसर्गस्य ३६ श्लोकः)

पुनश्च नीतिरप्यस्ति – "एकं त्यजेत् कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे ", इत्यादिः । अर्थात् समष्टिनिमित्तं व्यष्टिं त्यजेत् । निषिद्धकर्मत्वेन संग्रामोऽपि त्याज्यः, किन्तु सन्त्रासकानां विनाशोऽपि कर्त्तव्यः, यदि वशादिपञ्चकर्मणां प्रयोगाद् देशात् सन्त्रासवादः दूरं गमिष्यति तथा जनाः शान्तिं लप्स्यन्ते तर्हि मारणकर्मणा किम् ? पुरा वैदिकतन्त्राणां प्रयोगात् सर्वाः क्रिया अभवन् । मनोविज्ञानसम्मत मन्त्रशक्त्या देवा असुराश्च वलशालिनः वभूवुः । अधुनाऽपि प्रत्यहं देवालय प्रतिष्ठा भवति । तत्र वेदमन्त्राणां प्रयोगैः पूजाकर्म संपद्यते । तत् स्थलं प्रति जनसमागमः क्रमशोवर्द्धते । सर्वेषां हृदये फलाशा विद्यते । " कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन " इममुपदेशं प्रायशः सर्वे जानन्ति, किन्तु नाचरन्ति कर्मणा । तथापि देवताराधनया ये समयं यापयन्ति ते धन्याः । देवालयनिर्माणं कर्त्तव्यम् । यतः आस्तिकत्वं मानवानां समुन्नतेः मूलकारणम् । वयं परं ब्रह्मणोऽवतारभूतस्य श्रीरामचन्द्रस्य मन्दिरनिर्माणं कर्त्तुं यथा सततमुत्कण्ठितास्तथैव श्रीरामस्य त्यागपूतमाचरणमपि आचरेम । एतेन गान्धिमहात्मनः कल्पितरामराज्यं यथाऽधुनाऽपि स्वप्नमिव तथा न स्थास्यति । अधुना –

मनस्येकं वचनस्येकं कर्मण्येकं महात्मनः ।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनः ॥

अस्य नीति वाक्यस्य समीक्षाऽस्माभिः कर्त्तव्या । यतः सत्कर्मसु मनोवचनकर्मणामैक्यमेव उन्नतेः मूलम् । किं वहुना ? अस्मिन् शोधकर्मणि वहवः सज्जना मामुत्साहितवन्तः । तेभ्यः सर्वेभ्यः कृतज्ञतां ज्ञापयामि । इमं शोधग्रन्थं परीक्षितुं भारतसर्वकारेभ्यः पुनः पुनः निवेदयामि । भारतवर्षे वैदिकतत्त्वज्ञानामभावः नास्ति, केवलं प्रोत्साहनमावश्यकम् । देवतासु प्राण प्रतिष्ठाकर्म मनोजन्यमेव । अत्र ध्यानभावनादयः द्रष्टव्याः । "यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।" जडविज्ञानात् मनोविज्ञानस्य प्रभावः वलवत्तरः । अन्तिमे वयस्यहं पश्यामि भविष्याद् भारतवर्षस्वप्नम् । यत्र क्रमशः महायात्रा काव्यचतुर्थसर्गवर्ण्णितविषयाणां

दृश्यं सर्वत्र शोभिष्यते । यतः दोषी एव दण्डार्ह भविष्यति । न निर्दोषः । दूरदर्शनात् ज्ञातं ख्रीष्टपूर्व षष्ठशतके चक्रचिह्नित रौप्यमुद्राणां व्यवहारः अभवदिति । अस्मिन् तन्त्रे षड्दलादारभ्य चतुःषष्टिदलं यावत् सुवर्ण्णचक्राणां व्यवहारोऽस्ति । ततः जैनधर्मप्रचलात् प्राक् तन्त्रव्यवहारो वभूव । किन्तु दुरुपयोगात् शासनतन्त्रस्य च पुनः पुनः परिवर्त्तनादियं तन्त्रविद्या लुप्तप्राया तिष्ठति ।

एके कथयन्ति "पैप्पलाद संहिता स्थितवेदमन्त्राणां सस्वरपाठ-प्रक्रिया नास्तीति" । किन्तु शेषप्रणीताऽनुष्टुभकल्पमालायां ध्यानशतके च श्रीनृसिंहमन्त्रस्य सस्वरगानं दृष्ट्वा "पुरा सस्वरगानप्रक्रिया आसीत् तथा व्यवहाराभावादधुना गानप्रक्रिया नास्तीति" सुस्पष्टम् । वेदेषु बहुमन्त्राणां समता विद्यते तान् दृष्ट्वा पैप्पलाद संहितान्तर्गत मन्त्राणामपि सस्वरपाठप्रक्रिया कर्त्तव्या । अधुना प्रायशः सर्वत्र वेदकर्मकाण्डानां व्यवहारपद्धतिः शास्त्रं नानुसरति । ततः फलप्राप्तिः दुर्लभा । देशे अन्वयव्यतिरेक सम्बन्धयुत संस्कृतसंस्कृत्योरनादरः क्रमशः वर्द्धते । किं वच्मि "समय एव करोति बलाबलम्" अहमाशावादी, ततः दायादान् उपदिशामि सततमात्मसंयमार्थम् । यतः "संयमी नाऽवसीदति" शाश्वतं सुखं नितरामनुभवति । किमधिकम् । शेषे संशोधनादिकर्मणि श्रीरामचन्द्र संस्कृत महाविद्यालयस्य श्री शरच्चन्द्रप्रमुखा ये अध्यापका सहायका आसन् तेभ्यः तथा कंप्युटर् कर्त्रे श्री ब्रजमोहन बिन्धाणी नामधारिणे शिष्याय शुभाशिषं प्रदाय एवं नेदारलेण्ड निवासिनः आर्लोग्रीफिक्स् हस्ते इदं पुस्तकं समर्प्य विरमामि ॥ इति ॥

पण्डित श्री उमाकान्त पण्डा

साहित्याचार्य्यः आयुर्वेदाचार्य्यश्च, राष्ट्रभाषारत्नम्

श्रीरामचन्द्र संस्कृत महाविद्यालयादवसरप्राप्तः

प्रधानपण्डितः

जन्म ता ७/११/१९३२ रिका

सूचीपत्रम्

आसुरीकल्पमाला द्वितीयखण्डे

श्रीगणेशाय नमः

* अथाङ्गिरसकल्पः *

* अथ वशादिलक्षणानि *

कदाचिन्मुनिवृन्देषु समासीनं महामुनीम् ।
पप्रच्छाऽङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ॥१॥
भगवन्वेदतत्त्वज्ञ ! सर्वभूतहिते रत !
कर्माणि कति कार्य्याणि कत्यकार्य्याणि मे वद ॥२॥
अङ्गिरोवाच - विहितं च निषिद्धं च द्विविधं कर्म चोदितम् ।
विहितं तत्र कर्त्तव्यं निषिद्धं न कदाचन ॥३॥
नित्यं नैमित्तिकं काम्यं विहितं त्रिविधं स्मृतम् ।
पिपल्लाद उवाच-भगवंस्त्रिविधं कर्म कार्य्यं ज्ञातं तवोक्तितः ।
वशादीन्यपि कर्माणि सन्ति तानि वद प्रभो ! ॥४॥
अङ्गिरोवाच - वशादिकानि कमाणि स्युरनन्तानि यद्यपि ।
तथापि बक्षे संक्षिप्य षट् प्रकाराणि तानि वै ॥५॥
षट् कमाणि - वशश्च स्तम्भनं चैव मोहनं द्वेषणं तथा ।
उच्चाटनं मारणं च षट्कर्माणि प्रचक्षते ॥६॥
अमीषां लक्षणं वक्ष्ये शृणु विप्र ! समाहितः ।
मनोगतानि चैतानि संक्रामन्ति वचस्यपि ॥७॥
ततः कायेऽपि दृश्यन्ते मनः सर्वस्य कारणम् ॥
१. वशलक्षणम् - वश आयत्तनं नृणां मनोवचनकर्मभिः ।
आकर्षणमानयनं वशस्य फलमेव तत् ॥८॥
केचिदाकर्षणं भिन्नं कर्मेति निगदन्ति च ।
तस्माच्छत्रुं वशीकृत्य पश्चादाकर्षणं चरेत् ॥९॥
२. स्तम्भनलक्षणम् - स्वदेशाऽऽगमनं स्तम्भः स्तम्भनं समुदाहृतम् ।
वचनं स्तम्भनं तद्वत् स्तम्भनं प्रवदन्ति च ॥१०॥
गमनागमनस्तम्भं स्तम्भनं केचिदूचिरे ।
विण्मूत्रस्तम्भनं वापि स्तम्भनं कथयन्ति च ॥११॥
शुक्रसंस्तम्भनं वाऽपि स्तम्भनं जगुरुत्तमाः ।

गर्भस्य स्तम्भनं वाऽपि विपत्तिस्तम्भनं तथा ॥१२॥
रोगस्य स्तम्भनं वाऽपि वाञ्छितस्तम्भनं तथा ।
कार्य्यमात्रस्तम्भनं वा स्तम्भनं वृद्धिसम्मतम् ॥१३॥
सर्वस्य स्तम्भनं ह्येतत् स्तम्भनं न तु कस्यचित् ॥

३. **मोहनलक्षणम्**-अज्ञानं मोहनं तस्याऽन्यथाज्ञानं प्रयोजनम् ।
अन्यथा प्रत्ययो मोह इति कैश्चिदुदीर्य्यते ॥१४॥
उन्मादो मोहनं वाऽपि मिथ्यादृष्टिरितीतरे ।
अन्यथा चेष्टनं वापि मोहनं प्रतिपेदिरे ॥१५॥
अतिनिद्रां केचिदाहुः नष्टचेष्टा च केचन ।
वचनां केचिदाचक्षुः भूयो मूर्खं च केचन ॥१६॥
सर्वो मोहस्य हेतुः स्यादज्ञानं तस्य लक्षणम् ॥

४. **विद्वेषलक्षणम्**-विद्वेषः कोप इत्युक्तो द्वेषणं कोपणं विदुः ।
कलहः फलमेतस्य तदेवाऽन्यविघातनम् ॥१७॥
देवताद्वेषणं कैश्चित् विद्वेषणमुदाहृतम ।
प्रिययोर्जनयोः प्रीतिभञ्जनं द्वेषणं विदुः ।१८।

५.**उच्चाटनलक्षणम्**- उच्चाटनसमुद्वेगकरणं परिकीर्त्तितम् ।
इतस्ततो मतिस्तस्य फलं यद्वा पलायनम् ।१९।
केचिविद्रावणं नाम भिन्नं कर्म प्रचक्षते ।
उच्चाटनं रोगपीडांकेचिदूचुर्विशेषतः ।२०।
वातुलत्वं समासाद्य पलायनमथाऽपरे ।
उच्चाटनं महातापकरणं केचिदूचिरे ।२१।
असत्सु श्रमखाद्येषु तद्भक्षणमिवापरे ।
सर्वदा भ्रमणेच्छां वा केचिदाहुर्मनीषिणः ।२२।
सर्वमुद्वेजनफलमुच्चाटनमिह स्मृतम् ॥

६.**मारणलक्षणम्**-मारणं प्राणनाशार्थं यत्कर्म तदुदीरितम् ।
रोगपीडाकृशत्वं च दुर्बलत्वं च मूर्च्छनम् ।
मारणश्चेतिपञ्चाङ्गम् मारणं सद्भिरिष्यते ।२३।
अथवा सर्पदंशाद् वा व्याघ्रेणाऽपि च भक्षणात् ।

वज्रपीडादितो वाऽपि जले वाऽपि निमज्जनात् ।२४।
उद्बन्धनादितो वाऽपि स्वयश्च विषभक्षणात् ।
स्वयमग्निप्रवेशाच्च स्वयं च हननादपि ।२५।
कायस्य कामतस्त्यागात् प्रासादपतनादिना ।
दैवतो द्रव्ययोगेन विषभूतस्य खादनात् ।२६।
अग्निदाहादितोवाऽपि स्वशस्त्रपतनादपि ।
केनचिद्दहनाद् वाऽपि विषाऽशनादितोऽपिवा ।७।
आकतिश्चिन्नमित्राद् वा म्रियते मारणे कृते ॥

॥ इति वशादि लक्षणानि ॥

* अथ वशादिफलानि *

वशस्य फलमेतद्धि वचनाऽनतिवर्त्तिकम् ।
स्तम्भनस्य फलं तद्वद् गतिवैयर्थ्यबोधनम् ।१।
मोहनस्य फलं तद्वद् भ्रान्तिज्ञानपरंपरा ।
विद्वेषणफलं तद्वत्पुनः सन्धानवर्जितम् ।२।
उच्चाटनफलं तद्वत् स्वस्थानात् प्रपलायनम् ।
मारणस्य फलं तद्वत् सपत्नकुलनाशनम् ।३।
आकर्षणफलं तत्स्याद् समीपानयनं पुनः ।
विद्रावणफलं तत्स्यात् पुनरागतिवर्जितम् ।४।

अथवशादीनां पारस्पारिकभेदः -

प्रवक्ष्येद्वान्तरं भेदं वशादीनां च कर्मणाम् ।
वशभेदं प्रवक्ष्यामि शत्रुहीनो नृपो यतः ।१।
राज्ञो यस्य वशेत् सर्वं तस्येष्टं किं न सिद्ध्यति ।
सर्वस्य रञ्जनाद्राजा वशो रञ्जनमुच्यते ।२।
तस्मात् सर्वं वशीकृत्य न कुत्रचिद् बिभेत्यसौ ।
यदा सर्वं वशीकर्तुमसमर्थो नृपो भवेत् ।३।
तदाऽऽत्मीयान् वशीकृत्य सर्वं शत्रुं प्रसाधयेत् ।
यस्याऽऽत्मीयो वशो नाऽस्ति कार्य्यं तस्य न सिद्ध्यति ।४।

वशभेदः - मित्रोदासीनशत्रूणां भेदेन त्रिविधो वशः ।
पुंस्त्रीनपुंसकानाञ्च भेदात् स नवधा वशः ।५।

वशगतिः - स्याद् वशः सुकरो मित्रे स स्याच्छत्रौ च दुष्करः ।
इषत्कर उदासीने वशस्य त्रिविधा गतिः ।६।

वशभेदः - मनोवाग् कायभेदेन त्रिविधो वश इष्यते ।
आदौ मनो वशीकृत्य वाचं कायं क्रमेण वै ।७।
वशीकुर्य्या त्रिरावृत्तिस्तत्रकार्य्याप्रयत्नतः ।
त्रिकालं यदि कुर्वीत स वशः स्यान्महावशः ।८।
कर्त्ता कारयिता साध्यः न वाध्यन्ते त्रयो यतः ।
वशकर्म ततो धन्यं राज्ञां प्रियकरं हि तत् ।९।
चिरवैरीमहावीरः वलवान् हन्तुमुद्यतः ।
सोऽपि नाऽत्येति वचनं यत् प्रभावादहो ! वशः ।१०।
वशे सिद्धे च सिद्धिः स्यादन्येषामपि कर्मणाम् ।
इहाऽऽगच्छेति वचनाद् वशगः सन्निधिं व्रजेत् ।११।
त्वं गच्छेति प्रवचनाद् विरागस्तम्भितो भवेत् ।
मूढो भवेति वचनाद् वशगो मोहितो भवेत् ।१२।
पुत्रं द्विषेति वचनात् पुत्रेण द्विषितो भवेत् ।
उद्विग्न इव गच्छेति वचनाद् विद्रुतो भवेत् ।१३।
विषं भुक्त्वा म्रियस्वेति वचनान्म्रियतेऽपि च ।
एवं वशेऽपि संसिद्धे सिद्धिः स्यादन्यकर्मणाम् ।१४।
ततो विचक्षणो राजा वशकर्मणि तत्परः ।
सपत्नान् वशमानीय भुंक्ते राज्यमकण्टकम् ।१५।
कार्यः शत्रुविनाशो वा कार्यः शत्रुवशोऽपि वा ।
द्वयोर्मध्ये वशः साध्यः विनाशः स्यात् सुदुष्करः । १६।
अथर्व वेदतत्त्वज्ञं तस्माद् राजा प्रपूजयेत् ।
सदाऽऽत्मीयं प्रकुर्वीत यस्य हस्ते वशादिकम् ।१७।
नृपः सर्वं वशीकर्त्तुं प्रत्येकं क्षमते न वै ।
तस्मात् सर्वं वशीकर्त्तुमासुरीमन्त्रमभ्यसेत् ।१८।

आपदः स्युर्नृपस्याऽस्य सर्वस्मिन्नवशे सति ।
सर्वथा न वशोऽरिश्चेत् तदान्यकर्म कारयेत् ।१९।

स्तम्भनभेदः - वशपूर्वं भयपूर्वं स्तम्भनं द्विविधं स्मृतम् ।
तदपि द्विविधं ज्ञेयं स्थितस्य चलितस्य च ।२०।
सुकरः स्यात् स्थितस्तम्भः चलत् स्तम्भस्तु दुष्करः ।
इषुवच्चलितो राजा न स्तम्भो मन्त्रवादिनाम् ।२१।
तस्माज्जिगमिषुं भूपं ज्ञात्वा स्तम्भनमाचरेत् ।
ततश्चरैर्रिपोश्चिह्वान् परिवृत्तान्तविद्भवेत् ।२२।
यस्य वागूढचेष्टस्य गतिं ज्ञातुं न शक्यते ।
गतौ सम्भावितायां तु तं सदा स्तम्भयेन्नृपः ।२३।
तथा विदितवृत्तान्तं राजानं चलितं यदि ।
स्तम्भं नयति यत्नेन महास्तम्भनमुच्यते ।२४।
प्रातः, मध्याह्नतः, सायं स्तम्भनं कर्म यद् भवेत् ।
महेश्वरोऽपि तत्कर्म न लंघयितुमीश्वरः ।२५।
कर्त्ता च यजमानश्च साध्यश्चेति च ते त्रयः ।
कदाचिन्नैव पीड्यन्ते स्तम्भनं वशवद् वरम् ।२६।
तस्माद् राजा प्रयत्नेन स्तम्भनं कर्म कारयेद् ।

मोहनभेदः - अज्ञानमन्यथाज्ञानं मोहनं द्विबिधं मतम् ।२७।
रिपूणां मोहनं चैतद् राज्ञां बहुमतं भवेत् ।
मोहितो हि न शक्नोति प्रतिकर्त्तुं परक्रियाम् ।२८।
उपाया न स्युरित्यस्य मोहितस्य कदाचन ।
उपायविपरीतस्योपरि स्युरिति सर्वदा ।२९।
यत् यत् करोति वै तस्मिन् राजा तत्तत्प्रसिद्ध्यति ।
यत्नतो नृपति स्तस्माच्छत्रुमोहनमाचरेत् ।३०।
धीमतो मोहनं कर्म त्रिकालं कुरुते कृती ॥

विद्वेषभेदः - द्वयोरन्योन्यविद्वेषे एकस्यैकत्र वा तथा ।
विद्वेषो द्विविधस्तस्य साधनं द्वेषणं द्विधा ।३१।
मित्राऽमित्रसदस्यानां भेदनं त्रिविधं हि तत् ।

गुरुः स्यात् प्रिययोर्द्वेषः लघुरप्रिययोस्तथा ।३२।
प्रिययोर्द्वेषणे कार्य्ये महाविद्वेषणं चरेत् ।
महाविद्वेषणं नाम त्रिकालं क्रियते यदि ।३३।
गालिदानागालिदानि वाचावाचि गलागलि ।
मुष्टामुष्ट्यादि युद्धं स्यात् पितुः पुत्रस्य बृद्धयोः ।३४।
स्यादुदासीनयोर्द्वेषोऽप्यनायसक्रिय सदा ।
शत्रुश्चेदन्यवद्धीष्टः स्यादन्यद्वेषतत्परः ।३५।
ततोऽसौ निःसपत्नः सन् राज्यभोगं समश्नुते ।
तस्माद् राजा विशेषेण रिपुद्वेषणमाचरेत् ।३६।
पिता पुत्रमपि द्वेष्टि पुत्रोऽपि पितरौ तथा ।
माता पुत्रमपि द्वेष्टि यतस्तद् द्वेषणं महत् ।३७।

उच्चाटनभेदः - विलम्वितविभेदः स्यादुच्चाटनमपि द्विधा ।
स्थितस्योच्चाटनं साध्यं दुष्करं शीतलस्य च ।३८।
वातवह्निबृष्टिरोगभीतिशोकादि हेतुभिः ।
उच्चाटितो रिपुः सम्यक् पलायते न वा यदि ।३९।
तदा तस्य परार्थं न प्रवृत्तिः स्यात् कदाचन ।
स्वस्योद्वेगनिवृत्त्यर्थं चिन्तां प्राप्नोति नित्यशः ।४०।
ततः शत्रुं समुच्चाट्य निश्चिन्तो राज्यभुग् भवेत् ।
रिपोरागच्छतो भूयः महोच्चाटनमाचरेत् ।४१।
उच्चाटनं त्रिकालं चेन्महोच्चाटनमुच्यते ।
लोकस्य प्राणहरणं च्छेदनं दहनं तथा ।४२।
महोद्वेगार्थमिकैकं किमु यत्र त्रयं भवेत् ।
उच्चाटनात् फलत्येवं विद्रुतेन पलायनम् ।४३।

विद्रावणभेदः - रोषातिशयमासाद्य देशमागच्छतो रिपोः ।
महाविद्रावणं तत्र कारयेद्धरणीपतिः ।४४।
विद्रावणं त्रिकालं यन्महाविद्रावणं तु तत् ।
आदौ शत्रुं समुच्चाट्य पश्चाद् विद्रावयेन्नृपः ।४५।
अकृत्वोच्चाटनं यस्तु शत्रोर्विद्रावणं चरेत् ।

तस्य विद्रावणं नैव सिद्ध्यत्येतत् कथंचन ।४६।
अनुद्विग्नः कथं शत्रुः प्रपलायेद् स्वभावतः ।
अथवा मोहितः शत्रुरुन्मत्तो यदि जायते ।४७।
तदा पलायतेऽवश्यं नाऽत्र कार्य्याविचारणा ।
तस्माद् वै मोहनं कर्म कृत्वा विद्रावयेद् रिपुम् ।४८।
रिपौ विद्राविते राजा विजयी भवति ध्रुवम् ।

अतः उच्चाटनान् मोहनाद् वापरं विद्रावणं कर्त्तव्यम् ॥

मारणभेदः - मारणं त्वेकधा विद्याच्छत्रोरेव हि तद् भवेत् ।
न विप्रस्य न बालस्य न स्त्रियः नाऽप्यनागसः ॥
न राज्ञो नातिबृद्धस्य कुर्य्याद् धीरोऽभिचारिकम् ।
स्वदेशे गृहसन्दाहबृक्षच्छेदादिकारिणः ॥
देवब्राह्मणगोबालस्त्रीबृद्धादिविनाशिनः ।
युद्धे जेतुमशक्यस्य वशादीन्यतिगच्छति ॥
मारणं कर्म कुर्वीत राजा यदि पलायितः ।
ततोराजाऽतिविद्वांसमथर्वश्रुतिपारगमः ॥
बहुभिद्रविणैर्वस्त्रैर्नानारत्नैर्विभूषणैः ।
पूजयित्वा ततः पश्चाद् विधिना वृणुयाद् द्विजम् ॥
वृतोऽप्युत्साहसं युक्तः सर्वरक्षापरायणः ।
यत्नतो मारणं कर्म कुर्य्याद् राज्ञो हितेच्छया ॥
देशरक्षणधर्मेण नह्ययं पापभाग् भवेत् ।
अभिचारमहीनं यत् त्रिभिः कृच्छ्रैव्यपोहति ॥
तेजोनाशो भवेदादौ वलनाशो ततो भवेत् ।
सपत्नस्य ततो नाशस्त्रिस्रश्चावृत्तयस्ततः ॥
त्रिरावृत्तैः फलाभावे त्रिरावृत्तिं पुनः श्चरेत् ।
अभयाचाऽमृता चैन्द्री पार्थिवीश्च चतुष्टया ॥
शान्तिनामत्रकर्त्तव्या सैषाकृत्या प्रदीपिका ।
शान्तिरप्रतिघातारः प्रतिघातनिवृत्तये ॥
कर्त्तव्या नृपतेरत्र तदा न प्रहणक्रिया ।

यत्र न स्यादुपायोऽन्यः शत्रोर्भयनिवृत्तये ॥
तदानाऽन्यगतित्वेन मारणं कर्म कारयेत् ।
यजमानोऽत्र विघ्नानां निवृत्त्यर्थं महामतिः ।
प्रकुर्वीताऽमृतां शान्तिं परमेण समाधिना ॥
वशात् स्तम्भनमुत्कृष्टं स्तम्भनान्मोहनं महत् ।
मारणादधिकं कर्म न भूतो न भविष्यति ॥
इत्थमुक्तानि कर्माणि षड्वशादीनि वै द्विज !
संक्षेपात् त्वं विजानीहि पिप्पलाद ! महामते ! ॥
एतानि यदि सिद्ध्यन्ति फलवन्ति भवन्ति च ।
यदि स्युर्विपरीतानि प्राणनाशकराणि च ॥
समुद्रयानसदृशमिदमाथर्वणं मतम् ।
सर्वमिष्टकरं पुंसां विपरीतं विनाशनम् ॥
राजसेवा समं विद्यादिदमाथर्वणं वुध !
सिद्धं लाभकरं पुंसामसिद्धं सर्वनाशकम् ॥
अश्वगणेन सदृशमिदमाथर्वणं कृतम् ।
बहुलाभकरं सिद्धमन्यथा मूलनाशकृत् ॥
सावधानेन कर्त्तव्यं कर्मेदं विदुषां महत् ।
प्रमादान्नैव सिद्धिं स्यादसिद्धं कीर्तिनाशनम् ॥

॥ इत्याङ्गिरसकल्पे वशादिषट्कर्माणि समाप्तानि ॥

* अथ कर्मविरोधकथनम् *

पप्रच्छाऽङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
ब्रूहि मे मुनि शार्दूल ! विरोधं कर्मणोरिह ॥
तस्य तद् वचनं श्रुत्वा प्रोवाच मुनिरङ्गिरा ।
विरोधं कर्मणोः वक्ष्ये ते संक्षिप्य प्रयत्नतः ॥
वशविद्वेषयोर्विद्याद् विरोधं मन्त्रवित्तम !
विद्रावाऽऽकर्षयोश्चापि स्तम्भोविद्रावयोस्तथा ॥
स्तम्भनाऽऽकर्षयोश्चापि विजयस्तम्भयोस्तथा ।

मोहनाऽऽकर्षयोश्चाऽपि वशोच्चाटनयोस्तथा ॥
वशविद्रावयोश्चाऽपि मृतिविद्रावयोस्तथा ।
मारणस्तम्भयोश्चाऽपि स्तम्भनोच्चाटयोस्तथा ॥
न विरोधे प्रकर्त्तव्ये ते यतो नैव सिद्ध्यतः ।
विरोधकर्मकरणान् महाविघ्नः प्रजायते ॥
तस्मात् परीक्ष्यनो विद्वान् विरोधकर्मणी चरेत् ।
विरुद्धकर्मणी स्यातां विरुद्धफलसाधनात् ।
एवमुक्तानि कर्माणि विरुद्धानि समासतः ॥

॥ इत्याङ्गिरसे कल्पे कर्मविरोधकथनम् ॥

* अथ अनागताऽर्थवेदनम् *

देवा वै प्रजापतिमुपगम्य इदमब्रूवन् -
अनागतं कथं ज्ञेयं तद् ब्रूहि त्वं हि सर्ववित् ।
तेषां च वचनं श्रुत्वा सर्वलोकपितामहः ॥
प्रणिधानपरो भूत्वा तदुपायं विवेद सः ।
देवाः शृणुत यत्पृष्टं चातीव गहनं हि तत् ॥

अथ नारसिंहमहाचक्रभेदाः - निर्माणपद्धतिश्च -

नारसिंहं महाचक्रं तद्विष्णो परमं पदम् ।
पञ्चधा संस्थितं तच्च षडरं प्रथमं भवेत् ॥
अष्टाऽरं द्वादशाऽरं च षोडशाऽरं चतुर्थकम् ।
द्वात्रिंशदरकं चैव पञ्चमं वित्तनिर्जराः ॥
तेषु तत् प्रान्ततो मध्ये मन्त्रवर्ण्णान् निबोधत ।
तन्मध्ये प्रणवोवीजं नारसिंहमुपस्थितम् ॥
अकाराश्चाप्युकारश्च मकारश्चाऽपि नाभितः ।
सकारश्च तकारश्च भवेतां तत्र पार्श्वयोः ॥
एवमेतानि वीजानि सानुस्वाराणि सन्ति वै ।
ऐशान्यादिक्रमेणवै षडरे स्यात् सुदर्शनम् ॥
अष्टारेऽष्टाक्षरो मन्त्रो द्वादशारे च संस्थितः ।

द्वादशाक्षरको मन्त्रः षोडशारे च षोडशः ॥
स्वरा आसन् महाचक्रेद्वात्रिंशदरके स्थितः ।
नारसिंहो मन्त्रराजोऽनुष्टुभ् द्वात्रिंशदक्षरः ॥
ककारादिजकारान्ता वर्णाः पूर्वेऽस्य संस्थिताः ।
धकारादिषकारान्ता वर्ण्णाः स्युर्दक्षिणे स्थिताः ॥
नकारादि षकारान्तावर्णाः पश्चिमतः स्थिताः ।
सहलक्षा द्विरावृत्या सदा चोत्तरतः स्थिताः ॥
एतैर्वर्ण्णैर्युते स्वर्ण्णशतमानेन निर्मिते ।
महाचक्रे स्ववेदोक्त विधानेन च संस्थिते ॥
नृसिंहं भद्रं संपूज्य भूयोभिरुपचारकैः ।
देवं प्रार्थयते पश्चादिमं मन्त्रमुदीरयन् ॥
मन्त्रः - संपूर्ण्णसचिदानन्द ! श्रीनृसिंह ! जगत्पते !
अनागतं मे चित्तस्थं तत्वतो ज्ञापय प्रभो ! ॥
तस्माद् विज्ञातशास्त्रार्थः विप्रो नन्दमनाभवन् ।
पुष्पाञ्जलिमुपादाय श्रीनृसिंहं विचिन्तयन् ॥
पुष्पाञ्जलिं क्षिपेत् तत्र भावनिर्णयहेतुना ।
तत्राऽञ्जलिनिपातेन भद्रं ज्ञेयं न संशयः ॥
सप्तधा स्यात् फलं तत्र क्रमाद्वक्ष्यामि हे सुराः ।
फलानि - मध्ये वाञ्छाधिकासिद्धिराशुसिद्धिः सुदर्शने ॥
अष्टाक्षरे चिरं सिद्धिर्द्वादशारे च मध्यमा ।
षोडशारेत्वसिद्धिः स्याद् विपरीता च पञ्चमे ॥
नासिद्धिर्विपरीता न प्रातर्वर्ण्णेषु विद्यते ।
निर्ण्णीतं प्रणिधानेन मया सप्तविधं फलम् ॥
श्रीनृसिंहाऽनुभावेन सिद्धिं ज्ञात्वा यतेत यः ।
सोऽवश्यं सिद्धिमाप्नोति नाऽन्यथासिद्धिमश्नुते ॥
असिद्धं चेद् विना दुःखं तदा तूर्ष्णी भवेदपि ।
कालाऽन्तरे पुनः सिद्धिं विज्ञायैव प्रवर्त्तते ॥
अनुज्ञां श्रीनृसिंहस्य यदा प्राप्नोति भूमिभृत् ।

तदैवाऽत्र प्रवर्त्तेत नाऽत्र कार्य्या विचारणा ॥

अथ भाविविज्ञानम् उच्यते -

अथाऽतोऽङ्गिरसं प्राज्ञं पिप्पल्लादोऽनुयुक्तवान् ।
भगवन् ! भाविविज्ञेयं कथं तद् ब्रूहि मे प्रिये ॥
पिप्पलादवचः श्रुत्वा प्रणिधानमनोऽङ्गिराः ।
उपायं भाविज्ञाने तु ददर्श निजगाद तम् ॥
आनुष्टुभो मन्त्रराजो नारसिंहः श्रुतिस्थितः ।
तदर्थ-स्तदभिन्नोऽस्य वस्ति देवो नृकेशरी ॥
शिलायां प्रतिमायां वा महाचक्रेऽथवा घटे ।
उपचारैस्तमभ्यर्च्च्य बहुभिः प्रयतो द्विजः ॥
ततः प्रार्थयते देवं श्रीनृसिंहमिदं पठन् ।
सामव्यक्तमन्त्रराज वेद्य माया नृकेशरिन् ! ॥
सर्वज्ञ ! भगवन् देव : भाव्यं च ज्ञापय प्रभो !
एवं संप्रार्थ्य देवेशं भाव्यं संलिख्य पत्रयोः ॥
भवेत् किं न भवेत् किं वा क्षिपेद् देवस्य पादयोः ।
कश्चिद् द्विजस्तयोरेकं पत्रमुत्तोलयेत् ततः ॥
पत्रे यद् विद्यते तच्चसिद्धं भवति नाऽन्यथा ।
यदि सिद्धिः प्रदृश्येत पुनः कुर्वीत पत्रिकाः ।
उत्तमाऽधममध्यानां सिद्धीनां ज्ञान हेतवे ॥
असिद्धिर्यदिदृश्येत पुनः कुर्वीत पत्रिकाः ।
सर्वदा चाधुना वाऽन्या सिद्धिर्वा ज्ञायते तदा ॥
नृसिंहाऽऽज्ञा भवेत् सैव तां कदाचिन्न लंघयेत् ।
एवं विज्ञाय भाव्यर्थं प्रवर्त्तस्व महामते ! ॥
त्रैलोक्ये दुर्लभं प्रोक्तमिदं भाव्यर्थवेदिनम् ।
गोपनीयं सयत्नेन न देयं यस्य कस्यचित् ॥
अर्थं भाविनमज्ञात्वा यदि राजा प्रवर्त्तते ।
दैवाच्छुभं चेन् मोदते स खिद्यते विपर्यये ॥

॥ इत्याङ्गिरसे अनागतार्थवेदिनम् ॥

✻ अथ श्रीनृसिंहाऽभिषेकः ✻

पिप्पलाद उवाच - अथाऽतः पिप्पलादेन प्रपृष्टो मुनिरङ्गिराः ।
श्रीनृसिंहाऽभिषेकस्य विधिमाचक्ष्व मे गुरो !
स प्रश्नं पिप्पलादस्य समाकर्ण्य महामुनिः ।
सामाधिना श्रीनृसिंहाऽभिषेकं समवैक्षत ।
ततस्तं कथयामास पिप्पलादं मुनीश्वरः ॥

अङ्गिरा उवाच - श्रीनृसिंहाऽभिषेकस्य विधिं वक्ष्यामि सांप्रतम् ।
कृते तस्मिन्नसिद्धे यन्नकार्य्यमपि तद् भवेत् ॥

पूजाविधिः - प्राणायामं विधायादौ यजमानः शुचिः स्वयम् ।
श्रीनृसिंहमनुस्मृत्य सङ्कल्पविधिवत् ततः ॥
आचार्यं वृणुयात् सोऽथ गोमयेनोपलेपयेत् ।
भूमिं तत्र पञ्चवर्ण्णरजोभिस्तु सुपत्रकम् ॥
पद्ममुल्लिख्य तन्मध्ये वीजमालिख्य तत्तले ।
फलं समुल्लिखेत् पद्मपत्रेषु चतुरक्षरैः ।
अष्टासु प्रलिखेत् तत्र मन्त्रराजं विचक्षणः ॥
तद्वीजस्योपरिष्टात्तु तण्डुलान् स्थापयेत् ततः ।
विष्टरे तत्र सौवर्ण्णं राजतं ताम्रमेव वा ॥
अम्भः कुम्भं निधायाऽऽदौ दिव्यवस्त्रैः ससूत्रकैः ।
सितमाल्ये चालंकृत्य तन्मध्ये चन्दनादिकम् ॥
पञ्चरत्ननि निक्षिप्य यवांश्चाप्यत्र निक्षिपेत् ।
स्थापयेत् तस्य कुम्भस्योपरिष्टान्नवपल्लवान् ॥
तेषु तण्डुलमात्रे च नारिकेलफलं क्षिपेत् ।
ततः प्राङ्मुख आचार्यः पूजयेद्विधिना घटे ॥
श्रीनृसिंहं समाहूय ध्यायन् मूर्त्तिमलौकिकीम् ।
अष्टोत्तरसहस्रं तं कुशकूर्च्चेन मन्त्रयेत् ॥

नृसिंहमन्त्रेण मन्त्रयेत् । कूर्च्चेन - पुलिकया । घटे विशेषपूजाविधिं पश्चाद् दर्शयिष्यामः नृसिंहस्य । हस्तप्र क्षालनादारभ्य प्राणप्रतिष्ठां यावत् सर्वकर्माणि भविष्यन्ति । पैपलादविवाहादि संस्कारपद्धतिग्रन्थे सर्व विद्यते ।

यजमानोऽपि घटस्योत्तरतः प्राङ्मुखो वसेत् ।
नृसिंहाऽनुज्ञयाऽऽचार्य ऋष्यादीं स्तत्र विन्यसेत् ॥
सोऽञ्जलौ नारिकेलं तत्कुम्भस्योपरि यत् स्थितम् ।
चन्दनेनाऽस्य कर्पूरकङ्कुमाऽगुरुपाटलैः ॥
कक्कोलगुडत्वग्जातिफलं पतैल केशरैः ।
त्रिरावृत्तेस्ततस्तं च (तं घटमित्यर्थः)
तण्डुलैः परिवेष्टयेत् ॥
श्रीनृसिंहं समाध्यायन् त्रिः पठन् मुनिपुङ्गवः ।
(मन्त्रं ध्यानं च पठन्)
तत् कुम्भवारिणाऽचार्योऽभिषिञ्चेत् तं नराधिपम् ।
ततोऽस्मै दक्षिणां दद्याद् यथाऽसौ परितुष्यति ॥

अथ नृसिंहाऽभिषेक फलानि -

फलमस्य प्रवक्ष्यामि पिप्पलाद ! गृहाण तत् ।
सर्वोत्पातप्रशान्तिः स्यात् सर्वपुष्टिर्भवेदपि ॥
अपमृत्युभयो वापि महाशत्रुभयोऽपि वा ।
सर्वरोगप्रशान्तिर्वा महाकृत्यानिवारणम् ।
यच्छत्रुकृतवश्यादि कर्मतस्यापि वारणम् ॥
वशादिकर्मसिद्धिर्वा पुत्रलाभोऽपि वा भवेत् ।
स्त्रीलाभो धनलाभश्च भूमिलाभस्तथै व च ॥
नाना सिद्धिर्योगसिद्धिः परदुर्गस्य भञ्जनम् ।
स्वदुर्गरक्षणं वाऽपि सर्वविघ्नविनाशनम् ॥
शत्रुदत्तविपन्नाशः भक्षितस्य निरर्थता ।
योगमभ्यस्यतो योगविघ्नस्य शमनं तथा ॥
जपहोमौषधादिभ्यः कृतोन्मादस्य घातनम् ।
शत्रूणां नाशनं वाऽपि सर्वपापक्षयोऽपि वा ॥
स्वर्गादिलोकलाभश्च मन्त्रसिद्धिस्तथैव च ।
हृतद्रव्यपुनः प्राप्तिर्विषवाधा विनाशनम् ॥
दुःस्वप्नदोषशमनं सर्वशोकविनाशनम् ।

भूतादेः कृन्तनं वाऽपि ग्रहपीडाप्रणाशनम् ॥
बलपुष्टिर्देहपुष्टिर्वाहुपुष्टिस्तथैव च ।
सङ्कटस्थानपारश्च विद्यावादे जयस्तथा ॥
बन्धनोन्मोचनं वाऽपि वहुनोक्तेन किं फलम् ?
यो यद्वा वाञ्छति तत् तदभिषेको ददात्ययम् ।
अतिस्नेहेन मे प्रोक्त ब्रह्मणा सृष्टिकर्मणा ॥
॥ इत्याङ्गिरसे कल्पे श्रीनृसिंहाऽभिषेकः ॥

* अथ नृसिंहमन्त्राऽक्षर फलानि *

प्रजापतिरुवाच - आनुष्टुभो नारसिंहो मन्त्रराजो मयोदितः ।
द्वात्रिंशदक्षराण्यस्य बोधयन्ति शुभाशुभम् ॥
द्वात्रिंशत् तालपत्रेषु तस्यैकैकाऽक्षरं लिखेत् ।
नृसिंहं तत्र संपूज्य दूर्वास्तत्र निमज्जयेत् ॥
यदक्षरं समीक्षेत तदक्षरं फलं ब्रूवे ।
उकारो विष्णुरित्युक्तः प्रणवाऽन्तर्गतो यतः ॥
प्रणवो मङ्गलो यस्मात्तेनाऽयं शुभसूचकः ।
ग्रहणं स्यादुपादानं तच्चाऽभीष्टस्य वस्तुनः ॥
तस्मादभीष्टग्रहणम् उग्रशब्देन निर्दिशेत् ।
वी* प्रजनेन कान्ता वा वसने भोजनेऽपि च ॥
चत्वार्य्येतानि सिद्ध्यन्ति वी शब्दे संप्रलिखिते ।
रमग्निस्तापदा हि स्यात् तापो दुःखं सुनिश्चितम् ।
दुःखं संसूचयेदेतद् रं वीजमवलोकितम् ॥
मकार शिववाचीस्याद् यः शिवः स शुभप्रदः ।
शुभमेव विजानीयान् मकारस्य प्रदर्शनात् ॥
हा कष्टं साच हिंसा स्यात् प्राणपीडा च सा भवेत् ।
प्राणपीडां समाख्याति हा शब्दो दृष्टिगोचरः ॥

---

* (शब्दस्तोममहानिधौ - वी कान्तौ जनने चापि गतौ व्याप्तौ च भोजने । क्षेपे च)

वि विशेषे वि विनश्वे विनञर्थे वि भेदेन ।
विशेषः स्याद् विलम्वेन नाऽन्यथा स्याद् विदर्शनात् ॥
ष्णु त्रिविष्णुं प्रसुवने विद्यात् क्षीरप्रसू गौ र्यथा ।
तथा हीष्टस्य विस्तारः स्यात् ष्णु वर्ण्णस्य दर्शनात् ॥
ज्वरो रोगविशेषे स्याद् रोगमात्रोपलक्षकः ।
रोगपीडां ज्ञपयति ज्वलिपिर्दृश्यते यदि ॥
लं वीजं भूमि वीजं स्यात् तद्भवेद् भूमि साधकम् ।
भूमिलाभं प्रभवतिलं वीजं चेत् समीक्षते ॥
न्तं पदं स्याद्द्वितीयान्तं परमेश्वर वाचकम् ।
न्तमध्यापयद् वस्तु हीत्यतः सद्वस्तूनी क्षणात् ॥
स ब्रह्म स च विष्णुश्च स रुद्रः स्यात् प्रसिद्धितः ।
त्रयस्ते हीष्टकर्त्तारः सकारं यदि पश्यति ॥
रेफो वकार संयुक्तो विद्विवासमागमः भूमिलाभं प्रवदति ।
तेजो हानिर्यथा तत्र तथार्वाऽक्षर दर्शनात् ॥
त स उक्षेपणे वृत्तेः तच्चानिष्टस्य वै भवेत् ।
अनिष्टं क्षिप्यते तेन तो शब्दो येन वीक्ष्यते ॥
मोहो मोहे सद्य वृत्तेः सोऽकार्य्ये कार्य्यबोधनम् ।
सिद्धिर्वाऽपि न कार्य्यं तत् मुशब्दं यदि लोकते ॥
खं शून्यं गगनं विद्यात् फलशून्यमिदं भवेत् ।
यत्ने कृते फलं न स्यात् खं शब्दं यदि पश्यति ॥
नृ नये स भवेत् प्राप्तिः साऽभीष्टार्थस्य निश्चिता ।
अभीष्टं प्राप्यते तेन नृपदं येन लोकितम् ॥
सिं बन्धने समाख्यातः बन्धनं पुरुषस्य वै ।
नरस्तद्बन्धनं दृष्टः सिं शब्दो विनिवेदयेत् ॥
हमाकाशस्य वीजं स्यात् सर्वकार्यस्य साधकम् ।
हं वीजं दैवतो दृष्टः सर्वकार्यस्य साधकम् ॥
भी भये तत्प्रवृत्तस्य न चान्वेष्यति हेतुतः ।
प्रवृतिं न च कुर्वीत भीशब्दस्य समीक्षता ॥

षं वीजमेतन्मज्जाया मज्जासारं निगद्यते ।
इष्टसारं स आप्नोति षकारं यः प्रपश्यति ॥
णं सुखं तच्चाऽभीष्टेः स्यात् सुखं च प्रियमिष्यते ।
दृष्टो णकारोविज्ञाने सुखं सूचयति ध्रुवम् ॥
भ भद्रं तच्च कल्याणं सम्भवेत् तच्च वाञ्छितम् ।
एषां कल्याणमाप्नोति भकारो यदि लक्ष्यते ॥
दं द्रवे स चरत्यर्थं गच्छतोऽपि गमिष्यति ।
गमनाद्यनुजानाति द्रं शब्दो वै वचोदितः ॥
मृ प्राणानां परत्यिागे मरणं स च भण्यते ।
मरणं सूचयत्येषो मृशब्दो दैवदर्शितः ॥
त्यु त्यागार्थं च संबृद्धौ ह्येजनत् सद्यवाञ्छितम् ।
न तत् सिद्ध्यति तद्योति त्युशब्दो दैवदर्शितः ॥
मृ मृतौ मा च शत्रूणाम् अनिष्टतस्यापलक्षणम् ।
तच्चाभीष्टं मृ संदृष्टैर्लभते शत्रुनाशनम् ॥
त्यं त्यागार्थम् उ समृद्धौ हे जन ! त्यज साध्वसम् ।
तद् भावितं प्रवर्त्तस्व त्युं शब्दः सूचयत्यदः ॥
न कारः स्यान्निषेधार्थः स निषेधो ह्यमङ्गलः ।
न सिद्ध्येद् वाञ्छितं तत्र नकारः प्राह लक्षितः ॥
मा माने तच्चकार्य्यस्य कार्यं वाञ्छितमित्यतः ।
मितमन्यं भवेत् कार्य्यं मा शब्दो वदतीक्षितः ॥
मि स्यात् प्रक्षेपणेऽकारो निषेधार्थ इति स्मृतः ।
न प्रेरयेन्मनस्तत्र म्य शब्दे दृष्टमात्रके ॥
हं शब्दः परमात्मार्थः लक्षणायाः प्रभावतः ।
सर्वसर्वस्य कर्त्तास्याद् हं शब्दो ज्ञायते यदि ॥
इत्थं देवा मदुक्तेन सर्वज्ञा अभवन् स्वयम् ।
ब्रह्मणैवं समाख्यातं सर्वदेवाऽनुकम्पया ॥

॥ इत्याङ्गिरसकल्पे मन्त्रराजविज्ञानं समाप्तम् ॥

* अथ परकर्मनिवारणज्ञानम् *

उपसेदुः पुरा देवास्त्वष्टारं प्रष्टुमुत्तरम् ।
क्रियमाणं परैः कर्म न सिद्ध्येत् तत् कथं बुधः !

ब्रह्मोवाच - कर्मणः स्तम्भनात् कर्म क्रियमाणं न सिद्ध्यति ।
यद्वा विरुद्धकरणे कर्मेदं नैव सिद्ध्यति ॥
आवर्त्तयेत् विरुद्धं चेत् कर्म यायाद् विपर्ययम् ।
वशे विद्वेषणं कुर्याद् आकर्षे च पलायनम् ॥
स्तम्भनं वाऽथवा स्तम्भोऽप्याकर्षणपलायने ।
मोहने बुद्धिबुद्धश्च विद्वेषे वशकर्म च ॥
उच्चाटने स्थिरीभावं विद्रवे तत् समानता ।
मारणे वाऽमृताशान्ति मृतसंजीवनी हि सा ॥
स्तम्भनं वा विरुद्धश्च कुर्यात् सर्वत्र वारणम् ।
सम्यक् ज्ञात्वा द्वयं चैतत् परकर्म भयं त्यजेत् ॥

अङ्गिरा उवाच - देवाश्चैवं विधिं ज्ञात्वा शत्रुकर्मभयं जहुः ।
एवमाचार्यराजाऽपि जह्यात् परकृतं भयम् ॥

॥ इत्याङ्गिरसे कल्पे परकर्म निवारणम् ॥

उपगम्य पुरा देवा ब्रह्माणमिदमब्रूवन् ।
मन्त्रराजविधिं ब्रह्मन् ! सम्यग् ब्रूहि जगत्पते !

* अथ मन्त्रराजविधानम् *

ब्रह्मोवाच - मन्त्रराजविधानं च रहस्यं परमं मम ।
यद्ज्ञात्वा मन्त्रसंसिद्धिं सम्यक् प्रापत निर्जराः ॥
सुवर्ण्णशतमाषेण* महाचक्रं प्रकल्पयेत् ।
विधिनाऽन्तः प्रतिष्ठाप्य नृसिंहं तत्र पूजयेत् ॥
महाचक्रस्य मध्यस्थे ध्याते दुग्धपयोनिधेः ।

---

* १ मषा = ६ वा ८ रति

श्वेतद्वीपं ततो रत्नप्रासादं तत्र संस्मरेत् ॥
श्वेतसिंहासनं तत्र पद्मे शेषे च संस्मृते ।
योगरूढं तदङ्कैर्वा तत् पृष्ठे वाऽनुशायिनम् ॥
तत्फणानां सहस्रेण छत्रिणं नयनैर्युतम् ।
सुप्रसन्नं भूरिरूपं चक्रशार्ङ्ग वराभयम् ॥
चन्द्रिभिर्दधतं दोर्भिः सहस्रार्को ज्ज्वलं सितं ।
वक्षोगतमहालक्ष्मीं प्रेक्ष्यमाणं मुहुर्मुहुः ॥
पीताम्वरं रक्तोत्तरवस्त्रं मन्त्री विचिन्तयेत् ।
जुहूयाद् वा जपेद् वापि नृसिंहार्च्चनपूर्वकम् ॥
राजाराज्यजयाऽऽकाङ्क्षी श्रीनृसिंहं प्रपूज्य च ।
हुयेदश्वत्थसमिधां सहस्रं सर्पिषां तथा ॥
प्रत्यहं जुहूयादेवं दिवसानेकविंशतिः ।
ततो जयति राजानामजय्यं जेतृभिः परम् ॥
अथवा जुहूयादेवं चतुर्दशदिनानि च ।
त्वराचेज्जुहूयादेवं सप्ताहानि त्रिकालकम् ॥
त्रिकालहवनाऽशक्तौ प्रातरेव हुयेन्नृपः ।
आचार्यद्वारेण वापि जुहूयात् स्वमशक्नुवत् ॥
परसैन्यं जेतुमिच्छन् एतत् कर्म समाचरेत् ।
अत्यन्तत्वरितो राजा द्विजैर्होमविधापयेत् ॥
तथाविधद्विजाऽलाभे एकेनैव तु हावयेत् ।
परदुर्गं जिगीषुश्चेत् तदैतं कर्म कारयेत् ॥
यावद् द्वारं भवेद्दुर्गं तावद्द्वारं प्रकल्पयेत् ।
होमशालां ततस्तत्र तावद् द्वारेषु होमयेत् ॥
सर्वै द्वारैर्जयत्येषः दुर्गं नाऽत्रास्ति संशयः ।
शत्रुमपि शिशुं ध्यात्वा नरसिंहतनुः स्वयम् ॥
भवन् पलायनं शत्रोर्भावयेद् दृढभावनः ।
भावना भीमवत्येषा सर्वकर्माणि साधयेत् ॥
भावनावर्जितो मन्त्रो न किंचित् फलमश्नुते ।

मनसा कल्पितं चेतज्जगन् न परमार्थतः ॥
यथेदं कल्पयेच्चित्ते तथेदं रज्जुसर्पवत् ।
अथवा केवलैराज्यैर्हुत्वा जयमवाप्स्यति ॥
होमाऽशक्तौ महाचक्रे नृसिंहमभिपूजयेत् ।
होमसंख्यंजपेद् योऽपि ततः स लभते जयम् ॥
अभावेऽर्च्चनकालस्य केवलं जपमाचरेत् ।
सर्वं चैतत्कर्म कुर्य्याज्जयमात्रेऽपि शक्तितः ॥

* अथ अनावृष्टिनिवारणम् *

वृष्टिकामो महाचक्रे श्रीनृसिंहं प्रपूज्य च ।
वैतसीभिः घृताक्ताभिः समिद्भिः होममाचरेत् ॥
सहस्रं तावदाज्येन महावृष्टिं लभेत सः ।
ग्रहवाधार्थम् - ग्रहवाधानिवृत्त्यर्थम् अयुतं सर्पिषा हुवेत् ।
यावन्तो वाधकास्तेस्यु तावद्वारं इदं हुवेत् ॥
नृसिंहान्तर्गताद् दृष्टे ग्रहास्तुष्यन्ति होमतः ।
विषार्थम् - हन्तुर्दत्तविषं भुक्त्वा होमयेदयुतं घृतैः ।
विषभोजनशङ्कायां तावदाज्येन होमयेत् ॥
उन्मादार्थं - सहजोन्मादशान्त्यर्थं त्रिरावृत्तमिदं हुवेत् ।
दिनसंख्यातु सर्वत्र त्रिविधापूर्वचोदिता ॥
पूजाहोमजपामुख्याः पूजाहोमौ च मध्यमौ ।
अधमावर्च्चनजपौ जपः स्यादधमाधमः ॥
तस्मादुक्तेऽप्यनुक्ते वा पूजाहोमजपान् सदा ।
कुर्वीत तदशक्तौ तु पूजाहोमौ समाचरेत् ॥
तत्राऽशक्तोऽर्च्चनजपौ तत्राऽशक्तो जपेद्द्विजः ।
धनार्थम् - श्रीपुष्पैः सर्पिरभ्यक्तैः सहस्रं जुहुयाद् घृतम् ।
विल्वपत्रैर्विल्वकाष्ठैर्विल्वपुष्पैश्च तत्फलैः ॥
एकैकैश्च घृताभ्यक्तैः सर्पिर्भिः सह होमयेत् ।
पञ्चानां कर्मणामेकं कृत्वाऽऽप्नोति महाश्रियम् ॥

आयुषे - दूर्वातिलसहस्रं यो घृतं तावच्च होमयेत् ।
तस्याऽऽयुर्वर्द्धते यद् वा दूर्वाहोमाच्चकेवलात् ॥
तण्डुलैः श्रीस्तिलैर्वाऽपि होमयेत् सततं जनः ।
अनादेशे घृताक्तं स्यात् सर्वत्र होमसाधनम् ॥
प्रसूते सा सुखं सद्यः ससुतान्नैव वाध्यते ।
मन्त्रसम्वर्द्धगात्रस्य देहन्यस्त मनास्तथा ॥
भस्मसंलग्नदेहस्य वद्धसूत्रस्य वा तथा ।
अभिमन्त्रितकायस्य संमार्ज्जिततनोस्तथा ॥
विधिना वाऽभिषिक्तस्य कृतहोमादिकस्य वा ।
सर्वे रोगाः शमं यान्ति विशेषवचनं वृथा ॥
जलदूर्वातिलैर्होमात् सद्यो नश्यन्त्युपद्रवाः ।
व्याघ्रादिभ्यो वनेतद्वन्मन्त्रमेतं जपेत् सदा ॥
अष्टोत्तरशतं जप्त्वा विषं सर्वं प्रणाशयेत् ॥
पूर्ववदेवमभ्यर्च्च्य योऽष्टोत्तरशतं जपेत् ।
बालग्रहादयो रोगास्तस्य नश्यन्ति तत्क्षणात् ॥
घृतस्यायुतहोमेन शाम्येत् सर्वाभिचारिकम् ।
मेधाकामो घृतमष्टशतधा मन्त्रितं नरः ॥
प्रातः प्रातः समश्नीयान्मेधावी जायतेऽचिरात् ।
चन्दनं सर्पिषापिष्टं पुत्रार्थं जुहूयान्नरः ॥

पुत्रार्थम् - हुत्वाऽगुरुसहस्राणि महतीं श्रियमश्नुते ।
पलाशसमिधामष्टसहस्रञ्च घृतस्य च ।
हुत्वा पुत्रमवाप्नोति सर्वलक्षणसंयुतम् ॥

मृतवत्सार्थम् - पुत्रार्थी मृतवत्साया अभिषेचनपूर्वकम् ।
एतत् कुर्यात्सुतस्तस्या आयुष्मान् संप्रजायते ॥
अतीतकालापुत्रार्थं कर्मेदमपि कारयेत् ।
फलस्याऽदर्शने भूयो भूयः कुर्य्यादिदं बुधः ॥

पुतुलिकाठ - पुतुं जीवस्य काष्ठैर्यो वह्निं प्रज्वाल्य तत्फलैः ।
सहस्रं जुहूयान्मासं तस्य पुत्रो चिराद् भवेत् ॥

धनकामोऽप्यहरहः सहस्रं जुहूयाद् घृतैः ।
अपामार्गसमिद्भिश्च हुत्वा विजयते रिपुम् ॥
भूमिकामो वित्तकामोऽपि धान्यं जुहूयाद् घृतैः ।
आयुष्कामो वटे[*1] हुत्वा शतायुर्भवति ध्रुवम् ॥
आज्यस्याऽयुतहोमेन प्राप्नोति स्त्रियमुत्तमाम् ।
ज्वरी ववा जुहूयादाज्यं क्षीराक्तानाम्रपल्लवान् ॥
पलाशसमिधा वाऽपि ज्वरं शीघ्रं निवारयेत् ।
खण्ड[*2] त्र्ययुतहोमेन राज्ञो राजावशो भवेत् ॥
अथवाऽयुतहोमेन तथैव मधुना हुयेत् ।
चन्दनाऽगुरुकर्पूर होमाद्वा राजवश्यता ॥

वशार्थम् - गुडहोमात् पुत्रवशः इक्षुहोमात् स्त्रियो वशाः ।
भ्राताद्या बान्धवाः सर्वे वशाः स्युर्घृतहोमतः ॥
राजाशत्रुवशाऽऽकाङ्क्षी जुहूयाद् वा चतुः समम् ।

चतुःसमम् - लवङ्गं जीरकं पथ्या[*3] यमानी च चतुः समम् । अथवा -
कस्तूरीकाया द्वौ भागौ चत्वारश्चन्दस्य तु ।
कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम् ॥
सुपक्वकदलीहोमात् स्तम्भितः स्यान् महारिपुः ।
उदासीनवशं वाञ्छन् घृतमेव तु केवलम् ॥
मधुरत्रयहोमेन सर्वतः स वशो भवेत् ।
अनायत्तावशं वाञ्छन् राज्या[*4] वा लवणेन वा ॥
जुहूयात् साऽप्यनायत्ता शीघ्रमायत्ततां व्रजेत् ।
वशस्य विधिराकृष्टौ वशात् श्रेयो न विद्यते ॥
होमाद् वा पक्वबिल्वानां नवनीतस्य वा तथा ।
अष्टधा नारिकेलानां खण्डितानामथापि वा ॥
यद्वा सुपक्वपनस कोशानां हवनादपि ।
सर्वमेतत् त्रिमधुराभ्यक्तं स्याद्धोमकर्मणि ॥
अथवा केवलाऽऽज्येन स्तम्भनं कर्म कारयेत् ।

---

*१ गोशालायाम्, *२ खण्ड, *३ हरीतकी, *४ राइसोरिष

मोहनार्थं - ताम्बुलवल्लीसमिधो जुहूयान्मोहने रिपोः ।
गुवाकफलहोमेन मोहयेद् रिपुमात्मनः ॥
यद्वा जातिफलैः शुष्कैर्होमयेन्मोहयेदरिम् ।
एलाफलैर्वा कक्कोलै र्द्रव्यैरन्यैः सुगन्धिभिः ॥
हुतैर्मोहयितुं कामो रिपुं मोहयति ध्रुवम् ।
घृतं वा केवलं हुत्वा निश्चितं मोहयत्यरिम् ॥

सुगन्धिद्रव्याणि - चातुर्जातककर्पूरकक्कोलाऽगुरुसिह्लकम् ।
लवङ्गसहितं चैव सर्वगन्धं विनिर्दिशेत् ॥
एलाचन्दनकुङ्कुमाऽगुरुमुराकक्कोलमांसीशटी ।
श्रीवासच्छदग्रन्थिपर्ण्णशशभृत्क्षौणिद्वजोशीरकम् ॥
कस्तूरीनखपूतिशैलजशुभामेथीलवङ्गादिकम् ।
गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु ॥
(अपराणि देवदारुप्रभृतीन्यपि सन्ति ॥)

विद्वेषणार्थम् - लवङ्गैर्वा मरीचैर्वा शुण्ठिभिर्वाऽप्यरातिभिः ।
तिक्तैर्निम्बादिभिर्वापि जुह्वन् विद्वेषयेदरिम् ॥
अस्यै वा कटुभिर्द्रव्यैस्तद्वशद् रिपुणारिपुम् ।
अरिविद्वेषणं वाञ्छन् जुहूयाद्वाऽपि सर्पिषा ॥

उच्चाटनार्थम् - लवणं राजिकां वाऽपि हरिद्रां वार्थगं तथा ।
एरण्डं वा यवानीं वा गुवाकं वाऽपि कोमलम् ॥
एषामन्यतमं हुत्वाकुर्यादुच्चाटनं रिपोः ।
द्रव्याण्युद्वेजकान्याहुरुच्चाटनकराण्यरेः ॥
केवलेन घृतेनाऽपि शत्रुमुच्चाटयन् हुयेत् ।
उच्चाटनविधिः सर्वो विधेयोऽरिपलायने ।
उच्चाटनान्नभिद्येत कदाचिद्विपलायनम् ॥
पूर्वमृत्युपदं त्यक्त्वा शत्रुनाशप्रयोजनम् ।
मारणं कर्म कुर्वीत मन्त्रराजेन पण्डितः ॥

अर्थात् - " मृत्यु मृत्युं " इत्यस्मात् प्रथममृत्युपदं विहाय मन्त्रं

पठेत् । यथा - "शत्रुमृत्युं प्रयोजनम् "।

प्रभिन्नन्तं नखैः शत्रुं नृसिंहं भावयेदिह ।
सन्ति यद्यपि भूयांसि द्रव्याणि रिपुमृत्यवे ॥
तथापि घृतमादाय मारणं कर्म साधयेत् ।
अत्युग्रो मन्त्रराजोऽयं घोरं कर्म च मारणम् ॥
विद्वांश्चेत् कोपनः कृत्वा सर्पिषा मारयत्यपि ।
आज्यं तेजः श्रुतं यस्मात् तस्मादाज्यं वरं हविः ॥
न सिद्ध्यति यदाज्येन तदन्येन न जातुचित् ।
निषिद्धं मारणं कर्म तच्च राजा न कारयेत् ॥
कारयेन्मारणं तस्य यद्भयाद् प्रपलायितः ।
यो न योद्धुं न शक्नोति शान्त्वनां यो न गच्छति ॥
यं चेद् भेत्तुं न शक्तः स्यात् तद्जेतुं यत् करोति यः ।
स्वराज्यस्य हताकाङ्क्षी तस्य कुर्वीत मारणम् ॥
न कुर्यान्मारणं कर्म श्रोत्रियो धनलोभतः ।
कोपान्मोहान्मदान् मानान्मात्सर्यात् कामतोऽपि वा ॥
विदध्यान्मारणं कर्म नैव नैव च नैव च ॥
यस्य नाशे प्रजाः सुस्थाः प्रासादप्रतिमादयः ।
गोविप्रस्त्रीगृहा वाऽपि तन्नाशो दैवपापदः ॥
प्रत्युतैषा प्रजादीनां रक्षणात् पुण्यवान् भवेत् ॥
तस्मान्नरपतिर्विद्वान् दानमानादिभिर्द्विजम् ।
तुर्य्यविदार्थतत्त्वज्ञं आत्मीयं कुरुते सदा ॥
यत् प्रसादो रिपुं हन्ति योऽनिष्टं नाशयत्यपि ।
यः करोति सदाऽभीष्टं स राज्ञो न प्रियः कथम् ॥
धन्योऽयं मन्त्रराजो यो भुक्तिमुक्तिफलप्रदः ।
षट्कर्मसाधकश्चापि जननस्थिति नाशकृत् ॥
अनेन सदृशो मन्त्रो न भूतो न भविष्यति ।

ब्रह्मोवाच - मन्त्रराजविधिः कृत्स्नः श्रुत्या वक्तुं न शक्यते ॥

मया तस्य विधेः यद् ज्ञेयस्तत् प्रोक्तो यथाश्रुतम् ।
तन्मन्त्रजपहोमादेः फलं वक्तुं न ईश्वरः ॥

॥ इत्याङ्गिरसे मन्त्रराजविधिः ॥

* अथ दुर्गरक्षाविधिः *

पप्रच्छ पिप्पलादोऽपि मुनिमङ्गिरसं पुरा ।
दुर्गस्य भञ्जनं राज्ञः कथं न स्यादिदं वद ॥

अङ्गिरा उवाच - दुर्गरक्षाविधिं वक्षे शृणु विप्रः समाहितः ।
भञ्जो भूपोऽपि दुर्गस्थो विधेर्यस्मान्न भज्यते ॥
दुर्गे कृत्वा होमशालां तत्र कर्म समाचरेत् ।
लिप्तायां होमशालायां सङ्कल्प्य वृणुयाद् वुधम् ॥
अमृतवेदिकायां (वेलिकायां) च महाचक्रं समुल्लिखेत् ।
तत्र बीजानि संलिख्य प्राज्ञः संस्थापयेद् घटम् ॥
दिक्षुदिक्पालकलशान् विधिना सन्निधापयेत् ।
मण्डले स्थापयेत् खट्वां तत्र तूलीं ततः पटम् ॥
घटस्थे राजते पीठे महाचक्रं च पूर्ववत् ।
नृसिंहं तत्र संपूज्य जुहूयादयुतं घृतम् ॥
शालाऽपराजिते भागे चतुरस्रे तु कुण्डके ।
दिक्पालान् पूजयेत् पश्चात् कलशेषु यथा विधि ॥
दिक्पालांश्च वलिं दद्याद् होमान्ते विधिना मुने ।
पञ्चामृतेन संयुक्तिमन्नं दद्याद् बलिं निशि ॥

१. ॐ इन्द्राय बलिं स्वाहा गृहाणेमं सुरेश्वर !
२. ॐ अग्नये बलिं स्वाहा गृहाणेमं धनञ्जय !
३. ॐ यमाय बलिं स्वाहा गृहाणेमं मृताऽधिप !
४. ॐ नैर्ऋते (नैर्ऋताय) बलिं स्वाहा गृहाणेमं निशाचराट् !
५. ॐ वरुणाय बलिं स्वाहा गृहाणेमं जलाधिप !
६. ॐ वायवे बलिं स्वाहा गृहाणेमं प्रभञ्जन !

७. ॐ कुवेराय बलिं स्वाहा गृहाणेमं धनाधिप !
८. ॐ ईशानाय बलिं स्वाहा गृहाणेमं महेश्वर !
९. ॐ अनन्ताय बलिं स्वाहा गृहाणेममधस्पते !
१०. ॐ ब्रह्मणे बलिं स्वाहा गृहाणेमं प्रजापते !
एते बलिः समाख्याता बलिमन्त्राः श्रुतिरिताः ।

अत्र शालारोपणविधिना सह दिक्पालमन्त्राव्यवहर्त्तव्याः ।
दुर्गस्य नैर्ऋते भागे प्रयच्छेन्नैर्ऋतेर्वलिम् ॥
स प्रोक्तः शान्तिकल्पेन नैवाऽस्माभिर्निगद्यते ।
अर्द्धरात्रे बलिं दद्याद् भद्रकाल्यै विधानवित् ॥
प्रभाते दक्षिणां दद्याद् आचार्याय महीपतिः ।
ततः शान्त्युदकं दुर्गे सिञ्चेन्मन्त्रेण सर्वतः ॥

एतेनावगम्यते यत् शालारोपणादारभ्य शान्त्युदकादि । पूर्वतन्त्र-विहित अग्निस्थापनान्तं कर्म कर्तव्यमिति ।
दुर्गरक्षाविधानं यः कारयेत् पृथिवीपतिः ।
भक्तुं न शक्यते तस्य दुर्गं वीरवरैः परैः ॥
दुर्गरक्षाविधानं च मया प्रोक्तं महामने !
ब्रह्मणाऽप्यतियत्नेन मया पृष्टेन भाषितम् ॥

॥ इत्याङ्गिरसकल्पे दुर्गरक्षाविधानम् ॥

* अथ किम्वदन्ती मृषाकरणम् *

किम्वदन्तीं मृषाकर्तुं विधानमभिधीयते ।
श्रीनृसिंहमहाचक्रे विधिना संप्रतिष्ठिते ॥
मध्यतोऽरादधोदेशे किम्वदन्तीं समालिखेत् ।
तदधो विलिखेद् वर्णान् इयं मिथ्या भवत्विति ॥
तत्राऽर्च्चयेदृढं सत्यं परं ब्रह्म नृकेशिणम् ।
जुहूयात् त्रिसहस्रं तु सप्ताहमेवमाचरेत् ॥
एकं सत्यं परंब्रह्म नृसिंहाऽऽकारतां गतम् ।
माया हि यद् यदाकारं परंब्रह्म तथा तथा ॥

यथा लोक्यं यदाकारं आलोकः व्यञ्जकस्तथा ।
देहो मायामयत्वेन नृसिंहस्य भवेन्मृषा ॥
परंब्रह्म तदाकारं सत्यमेव न चानृतम् ।
सत्यं ज्ञात्वा तदध्यस्थं यथा मिथ्येव मन्यते ॥
नृसिंहं चिन्तयन् कुर्यात् किम्वदन्तीं मृषायते !
यत् तत्त्वं ज्ञानतो दृश्यं जगत् सर्वं मृषा भवेत् ।
तद् ध्यात्वा होमतः कस्मात् किम्वदन्ती बलीयसी ॥
स जप्त्वा किम्वदन्ती या सा भवेद् वचनान् मृषा ।
सत्या विनिश्चिता साचेन् न कदाचित् मृषा भवेत् ॥

॥ इत्याङ्गिरसे किम्वदन्तीमृषाकरणम् ॥

* अथ श्रीनृसिंहबलिविधानम् *

अथातो भवने राज्ञो देशे वा नगरेऽपि वा ।
नाना विधोपसर्गाः स्युरविलोकितपूर्वकाः ॥
नानाविधोपसर्गाणां तेषां वै विनिवृत्तये ।
श्रीनृसिंहवलिं वक्ष्ये वरिष्ठं सर्वकर्मणाम् ॥
सुवर्ण्णैर्दशभिस्तत्र महाचक्रं प्रकल्पयेत् ।
नृपस्य भवनाच्छालामैशान्यां दिशि कारयेत् ॥
मध्ये वेदिं विधायाऽत्र महाचक्रस्य मण्डलम् ।
खट्वा तस्योपरिस्थाप्य तत्र तूलीं ततः पटम् ॥
न्यसेत् तत्र महाचक्रं सौवर्ण्णं तत्र पूजयेत् ।
शालाऽपराजिते कुण्डे द्विसहस्रं घृतं हुवेत् ॥
निशि संपूज्य कुर्वीत शतं द्वाविंशतिर्वलीन् ।(१२२) ।
नृसिंहस्य बलिर्मुख्यः व्यूहलक्ष्याश्च मध्यमाः ॥
चत्वारिंशद् द्वयं चेति शिष्टाश्चोना भवन्ति च ।
एकोबलिः नृसिंहे स्याद् द्वात्रिंशद् द्रुहिणादिषु ॥
एकोबलिः महालक्ष्मै बलयः षट् सुदर्शने ।
अष्टौ नारायणे वासुदेवे च द्वादशैव च ॥

केशवादिषु देवेषु बलयः षोडशः स्मृताः ।
एवं षट् सप्ततिः प्रोक्ता वलयो ब्रह्मणा पुरा ॥

(तद् इत्थं - १+३२++१+६+८+१२+१६=७६ वलयः ।)

ततश्चोना वलयः षट्चत्वारिंशत् प्रकीर्त्तिताः ।
यथा - ब्रह्मविष्वेश सूर्येन्द्रवलयः पञ्चभाषिताः ॥
वसुष्वष्टौ च रुद्रेषु एकादश च भानुषु ।
द्वादशैवतु विश्वेषु देवेषु वलयो दश ।
एवं सम्भूयवलयो द्वाविंशत्युत्तरं शतम् ॥

(५+८+११+१२+१०=४६ वलयः + ७६ = १२२)

बलिद्रव्याणि - अन्नं खण्डं दधि क्षीरं नारिकेलं घृतं मधु,
मरीचं* च नृसिंहस्य बलिद्रव्याष्टकं विदुः ॥
एकीकृत्य प्रकुर्वीत हस्तग्राह्यांश्च पिण्डकान् ।
स्वैः स्वैः मन्त्रैर्बलिं दद्यात् द्वाविंशत्युत्तरं शतम् ॥

वि.द्र. - मन्त्राः पैपल्लादविवाहदिसंस्कारपद्धति ग्रन्थे प्रायशः सन्ति । ये न सन्ति ते मन्त्राः पैपल्लादसंहितायां विद्यन्ते ॥

एवं पक्षं समाचर्य उपसर्गान् शमं नयेत् ।
पक्षान्ते यजमानस्याऽभिषेकं च समाचरेत् ॥

अत्र सहस्राक्षमार्जनं, पावमानिसूक्तेन च मार्जनं कर्त्तव्यम् । अभिषेकविधिश्च पालनीया ॥

तस्माद् राजा विशेषेण श्रीनृसिंहपरो भवेत् ।
यतो निरुपसर्गः सन् सर्वाऽभीष्टमवाप्नुयात् ॥
उक्तो बलिविधिः सोऽयं बलिष्ठः सर्वकर्मणाम् ।
उपसर्गेषु कर्त्तव्यः तेषां वै विनिवृत्तये ॥

॥ इत्याङ्गिरसे नृसिंहबलिविधिः ॥

---

* मरीचं = गोलमरीचम्

ॐ अथ नृसिंहबलिकर्मफलकथनम् ॐ

पिप्पलाद उवाच - एतदेव फलं किं स्यान् नृसिंहबलिकर्मणः ।
फलान्तरं यद् यदस्ति तन्मे ब्रूहि महागुरो ।
अङ्गिरा उवाच - फलं वक्तु मशक्यं मे नृसिंहबलिकर्मणः ।
लेशतस्तत् प्रवक्ष्यामि कर्ममार्गप्रवृत्तये ॥
विजयः स्यादजेयस्य पुत्रलाभो धनार्जनम् ।
अपमृत्युजयो वाऽपि सर्वरोगविनाशनम् ॥
परचक्रनिवृत्तिर्वा महावृष्टिरवर्षणम् ।
महावात्यानिवृत्तिश्च स्त्रीलाभो नृविवर्द्धनम् ॥
वह्निभीतिनिवारश्च वृद्धिर्गजतुरङ्गयोः ।
ग्रहवाधापरावृत्ति दौर्वल्यस्य निवारणम् ॥
भयनाशो भयार्त्तस्य वृद्धिः स्यादायुषस्तथा ।
भूतप्रेतपिशाचादि रक्षोयक्षादिघातनम् ॥
सर्वैश्वर्य्यफलं प्राप्तिः परकृत्यपराभवः ।
स्वकृत्योद्दीपनं चापि स्तम्भनं सर्वकर्मणाम् ॥
त्रिविधोत्पातशन्तिश्च वशादीनां प्रसाधनम् ।
सर्वपापक्षयं चापि लोकवादनिवर्त्तनम् ॥
देवताकोपशान्तिश्च सर्वविघ्ननिवारणम् ।
सर्वाऽऽभीष्टस्य संसिद्धिर्वहुना किं प्रयाजनम् ॥

॥ इति नृसिंहबलिकर्मफलकथनम् आङ्गिरसे कल्पे ॥

ॐ अथाऽभयनृसिंहविधिः ॐ

पिप्पलाद उवाच - पप्रच्छाऽङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
महाभयनिवृत्त्यर्थमुपायं ब्रूहि मे प्रभो ।
अङ्गिरा उवाच - उपायं तत्प्रवक्ष्यामि महाभयनिवृत्तये ।
यं प्राप्य पार्थिवोभीरुरकुतोभयतामियात् ॥
अत्राऽभयनृसिंहाख्य उपायः ब्रह्मणोदितः ।

त्रस्तुर्देवाभयार्थं यत् तत् ते वक्ष्यामि सांप्रतम् ॥
वदेत् पाशं श्रियं मायां कामं कामं स शक्तितम् ।
श्रियमाङ्शुसमं भयद्वयं नृसिंहमुद्धरेत् ॥

महामन्त्रस्य ऋष्यादयः -
ऋषिर्ब्रह्मा समुदिष्टश्छन्दोऽस्यानुष्टुभंस्मृतम् ।
देवोऽभयनृसिंहाख्यः प्रणवो वीजमुच्यते ॥
माया शक्तिरिति प्रोक्ता विनियोगोभयक्षये ।
षडङ्गन्यासः - हृदयं प्रीमिति प्रोक्तं क्रीं वै शिर उदाहृतम् ॥
शिखा क्रुं च समाख्याता कवचं क्रैमिति स्मृतम् ।
क्रों च नेत्रत्रयं प्रोक्तं क्रश्चाऽस्त्रं परिकीर्त्तितम् ॥
सर्वाङ्गन्यासः - मस्तके हृदये नाभौ पृष्ठे लिङ्गे तथैव च ।
उरुद्वये जानुद्वये पादद्वयेत्विमान् न्यसेत् ।
सर्वेण व्यापकं न्यस्य देवं ध्यायेदनन्यधीः ॥
ध्यानम् - रक्तवर्ण्णो रक्तवस्त्रो रक्तमाल्यानुलेपनः ।
रक्तालंकारभूषाढ्यो महाकायो महाबलः ॥
भयङ्करो महाघोर स्तेजःपुञ्जान्तरस्थितः ।
भक्तैः षोडशसंख्यातैरुपरिक्रमतो दधत् ॥
अस्त्रं चक्रं च खड्गं च वाणं पद्म च पाशकम् ।
उरुस्थं दैत्यसंस्पर्शं तदद्विवारं च दक्षिणे ॥
अस्त्रं खड्गं च खेटं च शार्ङ्गं पद्म तथाऽङ्कुशम् ।
उरुस्थं दैत्यसंस्पर्शं तदद्विवारं च वामके ॥
स्वभावाग्निर्विकारोऽयं सच्चिदानन्दलक्षणम् ।
स्वोपासकानां कृपया लीलया धृतविग्रहः ॥
देहेन्द्रियादिभिर्मान वर्जित शुद्धरूपकः ।
ध्येयोऽभयनृसिंहोऽसौ महाभय उपस्थिते ॥
पूजास्याद् वैष्णवे पीठे चतुरावरणं शृणु ।
चतुरावरणम् - अङ्गाऽऽवृत्तिः स्यात् प्रथमं द्वितीयावरणं शृणु ॥
वैनतेयमनन्तं च ब्रह्माणं च महेश्वरम् ।

प्राच्यां प्रतीच्यामुदीच्यां वायव्यां* च प्रपूजयेत् ॥
आग्नेय्यां च श्रियं विद्धि नैऋते त्रिं समर्च्चयेत् ।
वायव्ये धृतिमैशान्ये कान्तिमपि प्रपूजयेत् ॥
लोकपालां स्तृतीयेतु चतुर्थेऽस्त्राणि पूजयेत् ।
ततो जप्त्वा महामन्त्रं नानाभयं निवर्त्तनम् ॥
एवमन्तर्वहिश्चापि देवं विधिवदर्च्चयेत् ।
यं जप्त्वा देवताः पूर्वं प्रशान्तभयतां गताः ॥

॥ इत्याङ्गिरसे कल्पे अभयनृसिंहविधिः ॥

* अथ जय नृसिंहकल्प जयोपायः *

पिप्पलाद उवाच - पप्रच्छाङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
निर्बला अपि राजानो जयेयुर्वलिनं कथम् ॥
अङ्गिरा उवाच - जयोपायं प्रवक्ष्यामि शृणु वत्स ! समाहित ।
बलवानपि दुर्गस्थो जेयो येनेह कर्मणा ॥
उत्कर्षो जय इत्युक्तोऽनुत्कर्षस्तु पराजयः ।
जयो वहुविधो लोके युद्धे सत्येव जायते ॥
तस्मिन् सिद्धे तु कर्माणि प्रसिद्ध्यन्त्यकृतान्यपि ।
तत्र कश्चिद् वशं गच्छेत् स्तम्भनं कश्चिदाप्नुयात् ॥
कश्चिन्मोहमुपागच्छेद् इष्टः स्यात् कोऽपि केनचित् ।
कश्चिदुच्चाटनं याति कश्चिच्छस्त्रहतो भवेत् ॥
शरणं प्रविशेत् कश्चित् पलायत्यपि कश्चन ।
अष्टकर्मफलान्यत्र सम्भवन्ति जये सति ॥
तस्माद् वशादिकं त्यक्त्वा जयकामो नृपो भवेत् ।
जये सिद्धे वशाद्येतत् पिष्टपेषणवद् भवेत् ॥
देवानामसुराणाञ्च युद्धं प्रववृते पुरा ।
तत्राऽसुरैः पराभूता देवा जग्मुर्दिगन्तरम् ॥

* प्रायः इत्थं भवेत् - दक्षिणस्यां च पूजयेत् ।

देवास्ते मिलिताः सर्वे ब्रह्माणं शरणं गताः ।
जयं नो भगवन् ! ब्रूहि प्रोचुरिति पितामहम् ॥
तेषां तद्वचनं श्रुत्वा स्वयम्भूः प्रणिधाय सः ।
अपश्यत् सर्ववेदानां सारेऽथर्वणि तत्त्ववित् ॥
मन्त्रं जय नृसिंहाख्यं द्वादशाक्षरकं शुभम् ।
जयोपायममोघं यं प्रवदन्ति मनीषिणः ॥
तमेतं ब्रह्मणो लब्ध्वा देवा जिग्युर्महासुरान् ।
तस्मादेतन्महामन्त्रं जयकामः सदाऽभ्यसेत् ॥
देवा उचुः - प्रीत्या जय नृसिंहाख्यं मन्त्रं ब्रूहि महाप्रभो !
यथा ते राक्षसाः सर्वे विद्रोष्यन्ति दिशोदिशः ॥
ब्रह्मोवाच - मन्त्रमेतम् प्रवक्ष्यामि त्रिदशैरपि दुर्लभम् ।
यं ज्ञात्वा मन्त्रराजं वै सर्वं जयति मानवः ॥
श्रीनृसिंहपदं पूर्वं जयेति तदनन्तरम् ।
पुनर्जयपदं प्रोच्य श्रीनृसिंहपदं वदेत् ॥
असौ जयनृसिंहाख्यः मन्त्राजेश्वरो महान् ।
मन्त्रः - ॐ श्रीनृसिंहः जय, जय श्रीनृसिंहः ।
(द्वादशाक्षरविशिष्टः)
एतत्प्रसादाद् बलिनं दुर्बलोऽपि जयेद् ध्रुवम् ॥
ऋष्यादयः - ब्रह्मा ऋषिः समाख्यातो जगती छन्द उच्यते ।
देवो जयनृसिंहाख्यो प्रणवो वीजमीष्यते ॥
माया शक्तिः समाख्याता अमुकं* कीलकं स्मृतम् ।
जयेन विनियोगोऽस्य मन्त्रस्य नियतो भवेत् ॥
चतुर्भिः हृदयं प्रोक्तम् - यथा - ॐ, श्रीनृसिंहः ।
द्वाभ्यां शिरः प्रकीर्त्तितम् - यथा - जय ।
पुनद्वाभ्यां शिखाख्याता - यथा - जय ।
चतुर्भिः कवचं भवेत् - यथा - श्रीनृसिंहः ।
सर्वैर्द्वादशभिर्वर्णैरस्त्रमस्य प्रकीर्त्तितम् ॥

* नृकीलकं भवेत् ।

अङ्गन्यासः - मस्तके दक्षहस्ते च वामहस्ते तथा हृदि ।
उदरो च तथा लिङ्गे ऊर्वोजान्वोश्च पादयोः ॥
(दक्षिणवामक्रमेण न्यसेत्)
द्वादशानां च वर्णानां एषु न्यासं समाचरेत् ।
सर्वेण व्यापकन्यासं ऊर्ध्वाऽधः क्रमशश्चरेत् ॥
एवं विन्यासमात्रेण मन्त्री देवः स्वयं भवेत् ।
मन्त्र एव हि देवः स्याद् देवो मन्त्रान्न भिद्यते ॥
तस्मान्मन्त्रमयो मन्त्री देवरूपः स्वयं भवेत् ।
शुक्रशोणितजं देहं हित्वा दिव्यां तनुं यतिः ।
आरूढः प्राप्नुयान्मन्त्रं यो मूढः तं न पूजयेत् ॥
ध्यानम् - अथ जय नृसिंहस्य ध्यानं वक्ष्यामि सांप्रतम् ।
हिरण्यकशिपुर्येन लीलया प्रविदारितः ॥
रक्तवर्णो महादेहो वाहुविंशतिसंयुतः ।
रक्तालङ्कार वेश्याढ्यो रक्तवस्त्रो भयङ्करः ॥
उज्ज्वलज्ज्वलनज्वाला मालालंकृतभूषणः ।
दंष्ट्रा करालवदनो महाशिख द्रुमोपमः ॥
सूर्य्यसोमाऽग्निनयनश्चन्द्रार्ककृतजशेखरः ।
चलद्रसनया भीमः प्रकाशदशनव्रजः ॥
अतिविस्तारवदनो महारव विभीषणः ।
स्थितश्चातिबलो घोरः ज्वलज्ज्वालाभिरावृतः ॥
अधो भुजाभ्यां दैत्येन्द्रं दारयन्नुरसि द्रुतम् ।
ऊर्ध्वाभ्यां तु च वाहुभ्यां तदन्तं दर्शयन् जपेत् ॥
उर्ध्वक्रमेण बिभ्राणो दक्षिणैरष्टभिर्भुजैः ।
चक्रं खड्गं च वाणं च गदां पाशं त्रिशूलकम् ॥
बज्रं कुन्तमथोवामैवाहुभिश्चावृत्तिर्दधत् ।
शङ्खं खेटञ्च शार्ङ्गञ्च पद्ममङ्कुशमेवच ॥
तर्जनी वह्निपात्रञ्च लोहं मूषलमित्यपि ।
घोरसंग्राम‍विजये आध्यात्मिकभये तथा ॥

भूतप्रेतभये वाऽपि दैवाधिभय एव वा ।
आधिव्याधिभये चैव नानोत्पात्तभये तथा ॥
काव्यशास्त्रकथायां वा दिव्ये च व्यवहारतः ।
विपत्तेः सन्निधाने वा संपदः समुपस्थितौ ॥
ध्येयो जयनृसिंहोऽसौ सर्वकामार्थसिद्धये ।
तस्मान्नृपतिरत्यर्थं भयाकाङ्क्षी यदा भवेत् ॥
तदा जय नृसिंहाख्यं मन्त्रमेतं समभ्यसेत् ।
अकृत्वा मानसं यागं वहिर्यागं समाचरन् ॥
योगकोटि सहस्रेण न कदाचित् फलं लभेत् ।
एवमभ्यसतो राज्ञो बज्रहस्तः पुरन्दरः ॥
एव युद्धं समायाति स जप्यः किमुताऽपरः ।
नानायानसमारूढो नानाबलसभावृतः ॥
मध्ये साध्यः नृपः क्षिप्त्वा जपन् जयमवाप्नुयात् ।
पूजाविधिः - अथ पूजां प्रवक्ष्यामि देवाः शृणुतमन्मुखात् ॥
यां विना सततं जप्त्वा नैव सिद्धिमवाप्नुयात् ।
हृष्टः ध्यात्वा स्वमात्मानं पूज्यदेवाकृतिं हृदि ॥
कृतकृत्यमिवात्मानं मन्यमानः पुनः पुनः ।
मूलेन प्रणवेनाऽत्र बहिस्तमेवमर्च्चयेत् ॥
प्रणवेनाऽर्घ्यपात्रञ्च कृत्वा तेनाऽम्बुना वुधः ।
संस्कृतैर्गन्धपुष्पैः स्वमात्मानं च प्रपूजयेत् ॥
मूलेन तिलकं कृत्वामूर्द्धिर्न पुष्पं नियच्छति ।
स्वासनं पूजयित्वा देहेमण्डूकादिकं जपेत् (यजेत्) ॥
हृत्पद्मे शक्तिपीठे स्वेदेवता विधिवत् यजेत् ।
ततोऽनुज्ञामवाप्यासौ वहिर्गुर्वादिकं यजेत् ॥
विधिवद् वैष्णवे पीठे पद्मगं नृहरिं यजेत् ।
संपूज्य गन्धपुष्पाभ्यां वक्ष्यमाणा वृत्तिभिवेत् ॥
प्रथमतः अर्घ्यपात्रादिकं विधाय शुद्धिपञ्चकं कुर्य्यात् । ततः
नववृत्तयः - पञ्चाङ्गावरणं पूर्वं द्वितीयं केशवादिभिः ।

मत्स्यादिभिस्तृतीयं स्याच्चतुर्थं सिंहमूर्त्तिभिः ॥
आयुधैः पञ्चमं प्रोक्तं मातृभिः षष्ठमुच्यते ।
सप्तमं श्रीधराद्यैश्च लोकपालैस्तथाष्टमम् ॥
लोकपालानाम् - आयुधैर्नवमं प्रोक्तं नवाऽस्यावृत्तयो मताः ।
चतुर्थावरणम् - उग्रसिंहो महासिंहो भीमसिंहस्तथैव च ।
भ्रूकुटिमुखसिंहश्च क्रुद्धसिंहस्त्वनन्तरम् ॥
अपराजितसिंहश्च सर्वसंहारसिंहकः ।
तथा विजयसिंहश्च कथिता ह्यष्टमूर्तयः ॥
पञ्चमावरणम् - शङ्खचक्रे खड्गखेटौ शरचापौ गदाम्बुजे ।
अष्टायुधानि प्रोक्तानि देवदेवस्य चक्रिणः ॥
षष्ठावरणम् - ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव चामुण्डा महालक्ष्मीश्च मातरः ॥
सप्तमावरणम् - श्रीधरः श्रीकरः श्रीशः श्रीपतिः श्रीविभावनः ।
श्रीनिधिः श्रीनिवासश्च श्रीवत्साङ्कस्तथाष्टम् ॥
चतुरावरणैर्यद्वा पूर्ववत् परिपूजयेत् ।
एतत्पूजाविशेषोऽयं कथितः सारसंग्रहः ॥
आनुष्टुभ श्रीनृसिंहे सामान्यं परिकीर्त्तितम् ।
एषा पूजा मयाऽऽख्याता युष्माकं हितमिच्छता ।
अतः परं महायन्त्रमस्यमन्त्रस्य वक्ष्यते ॥
महायन्त्रम् - अग्निविम्बद्वयं कृता मध्ये च प्रणवं लिखेत् ।
अष्टवर्ण्णात्मकं वापि नृसिंहवीजमुल्लिखेत् ॥
प्रणवस्योदरे शक्तिं तस्मिन् साध्याह्वयं लिखेत् ।
षडश्रीषु लिखेन्मन्त्री सुदर्शनषडक्षरम् ॥
द्वादशात्कं दिदिवन्तं लिखेत् तथैव च त्रिषु ।
तदवहिः कर्ण्णिकां कृत्वा पद्ममष्टदलं लिखेत् ॥
स्वरं स्वरं लिखेत् तत्र मन्त्री षोडशकेशरे ।
महाजय नृसिंहेतु षोडशार्ण्णभ लिखेदिह ॥
अनुष्टुभक्षरा लेख्याः चत्वारोऽत्र दले दले ।

वहिर्वृत्तत्रयं कुर्य्यान्मातृकाभिः प्रवेष्टयेत् ॥
जयमन्त्रपदं प्रोक्तं सर्वयन्त्रेषु चोत्तमम् ।
सुवर्ण्णपटैर्लिखितं यद्हि गले विधारयेत् ॥
वाहुमूले च कण्ठे च धारयन् लभते जयम् ।
वि. द्र. - एतद् यन्त्रस्य निर्माणविषये सन्देहो वर्त्तते ॥

✻ अथास्य यन्त्रस्य संस्कारविधिः ✻

विधानं तस्य वक्ष्यामि यन्त्रसंस्कारकर्मणः ।
गोचर्ममात्रमालिख्य संलिखेत्पद्ममण्डलम् ॥
वि. द्र. - गोचर्मपरिमाणभूमिभागे - पैप्पलादविवाहसंस्कारपद्धतिपुस्तकं द्रष्टव्यम् ।
खड्गं तूर्ली शिरस्थानं तत्र संस्थाप्य मन्त्रवित् ।
पूर्वे ताम्रमयं कुम्भं जलपूर्ण्णं निधाय च ॥
वस्त्रेण वेष्टयित्वा तमिन्द्रादींस्तत्र पूजयेत् ।
यन्त्रं पञ्चामृतेनैव शोधयित्वा विधानतः ॥
मण्डले स्थापयित्वा तद् यन्त्रं प्राणेन योजयेत् ॥
देवताया अभेदं च भावयित्वा पुनः पुनः ।
मूलमन्त्रेण विधिना तत्र देवं प्रपूजयेत् ॥
यन्त्रं संस्पृश्य तद् विद्वान् अष्टोत्तरशतं जपेत् ।
चतुरस्रे ततः कुण्डे घृतेनैवायुतं हुवेत् ॥
अथवा त्रिसहस्रं च सहस्रं वाऽपि होमयेत् ।
यावद्वै जुहूयान्मन्त्री तावदेव जपेदिह ॥
सुवर्ण्णं दक्षिणां दद्यात् यन्त्रसंस्कार कर्मणः ।
दक्षिणां भूपतिर्दद्यात् कर्त्तृतृप्तीकरीं पुनः ।
नृपो दिग्विजयं कुर्य्यादिदं यन्त्रं विधारयन् ॥
खड्गधारणशक्ताः के पुरतस्तस्य संस्थिता ?
मन्त्रकोटि सहस्रेण यन्त्रकोटिशतेन च ।

होमकोटिसहस्रेण जपकोटिशमतेन च ॥
न तथा फलमाप्नोति यन्त्रेणानेन यादृशम् ।
अथर्ववेदतत्त्वज्ञं तस्मान् नृपतिरर्च्चयेत् ॥
न वै माता पिता बन्धुर्दैवज्ञश्च पुरोहितः ।
वैद्यकश्च हितोभाव्यः प्रियोऽथर्वनिधिर्यथा ॥

होमः - अथहोमं प्रवक्ष्यामि नृपतेर्जयमिच्छतः ।
यत् कर्मणा विना राज्ञ उदयोगोनिष्फलो भवेत् ॥
सौवर्ण्णं प्रतिमां कुर्य्याच्छतमानविनिर्मिताम् ।
सुवर्ण्णद्वयमानं वा सुवर्ण्णैकप्रमाणिकाम् ॥
निधाय राजते पीठे पूर्ववत् प्रतिपूज्य च ।
कुण्डे च चतुरास्रेऽथ पूजयित्वा हुताशनम् ॥
तत्राऽर्च्चयेच्च नृहरिं विधिवज्जुहूयात् ततः ।
अयुतत्रयमाज्यानां त्वरायामयुतं तथा ॥
अथवाऽस्य द्विरावृत्तिं जुहूयादेकमानसः ।
अथवाऽस्य त्रिरावृत्तिं ब्रह्मवेदविदां वरः ॥
जयः स्यात् फलमेतस्य कर्मणो भवति ध्रुवम् ॥

ब्रह्मोवाच - एतत् संक्षेपतः प्रोक्तं जयकर्मविधानकम् ।
अनेनैव विधानेन देवा जयमवाप्नुयुः ॥

अङ्गिरा उवाच - जयकर्मविधानज्ञेनेत्थमुक्तं स्वयम्भुवा ।
देवा अपि तथा कृत्वा लेभिरे जयमासुरात् ॥
तस्माद् राजा यदाशत्रुं बलिनं जेतुमिच्छति ।
तदाऽथर्वविदं प्राज्ञमेतं होमं च कारयेत् ॥

हव्यप्रशंसा - हविषामुतममाज्यं समान्यं सर्वकर्मसु ।
आज्यं तेजः श्रुतं यस्मात् तदेव जयसाधनम् ॥
न चाज्येन समं हव्यं भूतं वाऽपि भविष्यति ।
यत्र कुण्डं चतुष्कोणं यत्र वर्हिर्बलप्रदः ॥
श्रीनृसिंहश्च देवः स्यात् कर्त्ता चाथर्वणः सुधीः ।

राजा चेद् विष्णुभक्तः स्याज्जयस्तस्य करे स्थितः ॥

वि. द्र. - यत्र यत्र होमविधिः तत्र पूर्वतन्त्रात् परं प्रधानकर्म तथा प्रधानकर्मशेषे उत्तरतन्त्रं कर्त्तव्यम् । नक्षत्रकल्पविधिनाऽग्नि स्थापनम् ॥

॥ इत्याङ्गिरसे जयनृसिंहकल्पः ॥

✲ अथ जया विजया प्रशंसा ✲

जया च विजया विद्या नृपतीनां सदाप्रिया ।
जयाऽपि दुर्लभा लोके विजया नैव लभ्यते ॥
जया जयनृसिंहाख्या विजयं तु भविष्यति ।
जया स्याद् उत्तमा राजा विजया चोत्तमोत्तमा ॥
जयं च नृपतिः सर्वः स्वभावेनैव वाञ्छति ।
स पराजयशङ्कायां शत्रोरतिबलस्य च ॥
पुनरुत्थानशङ्कायां तन्महाजयमिच्छति ।
सर्वं जयार्थं नृपतेः जयेसिद्धे तु सार्थकम् ॥
धनं बलं च नीतिश्च प्रज्ञा मन्त्रस्य पौरुषम् ।
बन्धुर्मित्रं सहायश्च उपायानां चतुष्टयम् ॥
जयं कृत्वाऽन्यदेशं यो लभते भूमिपालकः ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यशंसयम् ॥
न युद्धे हनने दोषः योधॄणां नृपतेरपि ।
पण्डिताः सङ्गिरन्ते तु दृष्ट्वा दृष्टफलं जयम् ॥
युद्ध्यमानस्य मरणं योगसिद्धिसमं विदुः ।
सुकरं युद्धमरणं दुष्करं योगसाधनम् ॥
द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ ।
परिब्राड्योगयुक्तश्च रणेचाऽभिमुखे हतः ॥
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे ।
जीविते लभते लक्ष्मीं मृते वाऽपि सुराङ्गनम् ॥

❊ अथ महाजयकल्पः महाजयोपायः ❊

पप्रच्छाङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
कथितं मे जयोपायो दयाऽस्ति मयिते यदि ॥
कीदृङ्महाजयोपायस्तं ब्रूहि मे महाप्रभो !
अङ्गिरा उवाच - वक्ष्ये महाजयोपायं ब्रह्मणो मुखतः श्रुतम् ।
अचिन्त्यां शक्तिं संप्राप्य कोटिमेकोनृपो जयेत् ॥
महाजयो महोत्कर्षः सचाऽयमुभयात्मकः ।
दृष्ट्वा पलायते शत्रुः पुनर्नैवाऽथ तिष्ठति ॥
पिप्पलाद उवाच - न दृष्टं न श्रुतं चैतद् भगवन् ! भुवनत्रये ।
अङ्गिरा उवाच - महाजयनृसिंहाख्योऽचिन्त्य शक्तिरयं मनुः ।
तत्प्रसादादिदं चित्रं भवत्येव न संशयः ॥
जितैरप्यसुरैर्भूयः देवास्तेऽप्यपराजिताः ।
पुनरेव सुरज्येष्ठं ब्रह्माणं शरणं गताः ॥
(अथवा- पुनरेव सुरज्येष्ठं ब्रह्मणः शरणं गताः ॥)
उचुस्ते तमिदं वाक्यं किं कुर्मः सांप्रतं प्रभो !
जयेन न निवृत्तास्ते महाजयमतो वद ॥
ब्रह्मा तद्वचनं श्रुत्वा प्रणिधानपरोऽभवत् ।
चित्तं चिन्तयतस्तस्य सच्चिदानन्दलक्षणम् ॥
प्रादुरासीद्धृदस्थारः वीजं प्रादुरभूत् ततः ।
वीजम् - क कारश्च षकारश्च रेफश्चाकार एव च ॥
अकारश्च उकारश्च मकारो विन्दुरेव च ।
अष्टवर्णात्मको मन्त्रो नृसिंहवीजसंज्ञितः ॥
(क् + ष् + र् + अ = क्ष्र + अ + उ + म् + ॐ = क्ष्रौं)
एकैकस्मान् मन्त्रवर्णाद् द्वि द्वि वर्णव्यवस्थया ।
महाजयनृसिंहाख्यो मन्त्रराजेश्वरेश्वरः ।
अजन्यथर्ववेदस्य सारोऽयं षोडशाक्षरः ॥
मन्त्रः - श्रीनृसिंहपदं पूर्वं जयेति तदनन्तरम् ।

नृसिंहेति तृतीयं स्याज्जयद्वयंमतो भवेत् ॥
(श्रीनृसिंहः, जयनृसिंहः, अमुकं जयजय नृसिंहः, माया (शक्तिः))
नृसिंहेति ततः पश्चान् मन्त्रराजेश्वरेश्वरः ॥
अस्मिन् जयनृसिंहाख्ये मध्ये साध्यं प्रयोजयेत् ।
अन्ते मायां समायोज्य महाजयकरं जयेत् ॥
ऋष्यादिन्यासः - ब्रह्मोवाच ऋषिर्द्दिष्टः पांक्तं छन्दोऽभिधीयते ।
महाजयनृसिंहाख्यो देवताऽत्रभयंकरः ॥
क्ष्रौं, अष्टाक्षरं नारसिंहं वीजं वीजमहोदितम् ।
हृल्लेखा शक्तिरत्रस्याद्याजगज्जननी स्मृता ॥
विख्याता "जयदुर्गा" सा साधिष्ठात्री च देवता ।
साध्यं कीलकमित्याहु विनियोगो महाजये ॥

तद्यथा -ॐ महाजयनृसिंहाख्यमन्त्रस्य द्विष्टः (अर्थाद् ब्रह्मा) । ऋषिः पंक्ति श्छन्दः महाजय नृसिंहः देवता क्ष्रौं वीजं जयदुर्गा शक्तिः साध्यः (शत्रुः) कीलकं महाजये विनियोगः ॥ साध्यः = देवः नृसिंहो वा सन्देहः ।

अङ्गन्यासः - चतुर्भिं र्हृदयं प्रोक्तं पञ्चभिश्च शिरस्तथा ।
चतुर्भिश्च शिखा ज्ञेया त्रिभिः कवचमीरितम् ॥
वर्णैः षोडशभिः सर्वैरस्त्रमस्य प्रकीर्त्तितम् ।

तद्यथा -ॐ श्रीनृसिंहः हृदयायनमः, जयनृसिंहः शिरसे स्वाहा, जयजय शिखायै वषट्, नृसिंहः कवचाय हूम्, श्रीनृसिंहः जयनृसिंह जयजय नृसिंहः करतलकरपृष्ठाभ्यामस्त्रायफट्, नेत्र वर्जित पञ्चाङ्गन्यासः अयम् ॥

न्यासः - शिरोवदनयोश्चैव हस्तयोहृदये तथा ।
उदरे पृष्ठके नाभौ उर्वोर्जान्वोश्च जंघयोः ।
पादयोः क्रमशो वर्णान् षोडशैवं प्रविन्यसेत् ॥
सर्वेण व्यापकन्यासम् ऊर्द्ध्वाऽधः क्रमतश्चरेत् ।
महाजयनृसिंहोऽयं मन्त्री विन्यास मात्रतः ॥
मन्त्रोदेवो न मन्त्राच्च भिन्नो देवोऽस्ति कुत्रचित् ॥

तद्यथा- ॐ श्रीं नमः, शिरसि, ॐ नृं नमः, वदने, ॐ सिं नमः, दक्षिणहस्ते, ॐ हः नमः, वामहस्ते, ॐ जं नमः, हृदये, ॐ यं नमः, उदरे, ॐ नृं नमः, पृष्ठे, ॐ सिं नमः, नाभौ, ॐ हः नमः, दक्षिणोरौ, ॐ जं नमः, वामोरौ, ॐ यं नमः, दक्षिणजानौ, ॐ जं नमः वामजानौ, ॐ यं नमः दक्षिणजंघे, ॐ नृं नमः वामजंघे, ॐ सिं नमः दक्षिणपादे, ॐ हः नमः वामपादे, ॐ श्रीनृसिंहः जय नृसिंहः, जय जय नृसिंहः, शिरसः आरभ्य पादतलं यावत् सर्वाङ्गे ॥

ध्यानम् - महाजयनृसिंहस्य ध्यानं वक्ष्येऽथ संप्रति ।
यं दृष्ट्वा दूरतः शत्रुः विद्रवेन्न पुरो भवेत् ॥
उद्यद्द्युमणिसंकाशो रक्तवर्णो महावपुः ।
भुजैर्विंशति संख्यातैर्महागिरिरिवाऽपरः ॥
रक्तवस्त्रधरो घोरो रक्तालंकारदीपितः ।
सहसाऽऽदित्यसंकाश मण्डलस्यान्तरस्थितः ॥
अति स्वच्छेन मनसा लक्षितो वा न लक्षितः ।
दंष्ट्राकरालवदनः प्रकाशितरदाबलिः ॥
लसद् रसनयाऽत्युग्रः सोमसूर्य्याऽग्निनेत्रकः ।
प्रतिविम्वं जगत्सर्वं चन्द्रार्ककृतमस्तकः ॥
तिष्ठन्नतिबलं कोपाद् ग्रसन्निव जगत्त्रयम् ।
कौस्तुभोद्भासितोरस्कः श्रीवत्सकृतलक्ष्मणः ॥
वृत्तग्रीवः प्रोन्नतां सः सटापुच्छविराजितः ।
उरो विदारं दैत्येन्द्रमधोदोर्भ्यां महानखैः ॥
अनायासेन देवेशो विनिघ्नन् क्रीडयन्निव ।
तदूर्द्ध्व स्थितवाहुभ्यां तदन्त्रं प्रविलोकयन् ॥
उपरि क्रमतो विभ्रत्यष्टाभिर्दक्षिणैर्भुजैः ।
चक्रं खड्गं च वाणं च गदां पाशं त्रिशूलकम् ॥
वज्रं कुन्तमथो वामैरष्टाभिर्वाहुभिर्धरन् ।
शङ्खं खेटकशार्ङ्गं च पद्ममङ्कुशमेव च ॥
तर्जनी वह्निपात्रं च वायसं लगुडं विभुः ।

सन्निधौ घोरयुद्धस्य नानाविधभये तथा ॥
काव्यशास्त्रकथायां वा दिव्ये च व्यवहारतः ।
संपत् सम्भावनायां वा विपत्तेः सन्निधौ तथा ॥
महाजयनृसिंहोऽसौ ध्येयो दैत्यविदारकः ।
तस्मान्नृपवरः शूरः जिगीषन् कोटिमेककः ॥
महाजयनृसिंहाख्यं मन्त्रमेव समभ्यसेत् ।
एतमभ्यसतो राज्ञस्त्रिशूलः त्रिपुरान्तकः ॥
दूरतोऽपि पलायेत पुनर्नैवोपतिष्ठते ।
पूर्ववद् देवदेवेशं मन्त्रं हृष्टः जपेद् वुधः ॥
असंपूज्य जपन्मन्त्रं न कदाचित् फलं लभेत् ।
अत्र पूर्वोदिता पूजा यन्त्रं चैव तु पूर्ववत् ॥
जपपूजा जयस्यास्य फलमस्ति महाजयः ।
जपतो दृष्टिमात्रेण शत्रूणां प्रपलायनम् ॥
पुनरप्यनुप्रस्थानं महाजयः इवोच्यते ।
युद्धे भवति सन्देहे जयो वा स्यात् पराजयः ॥
महाजयस्य सन्देहो नाऽत्राऽयं बलवत्तरः ॥

ब्रह्मोवाच - एतत् संक्षेपतः प्रोक्तं महाजयः विधानकम् ।
अनेनविधिना देवा महाजयमवाप्स्यथ ॥

अङ्गिरा उवाच - महाजयविधानज्ञेनेत्थमुक्तं स्वयम्भुवा ।
देवा अपि तथा कृत्वा महाजयमवाप्नुवन् ॥
ततो नृपेश्वरो वीरो महाजयपरायणः ।
ब्रह्मवेदार्थतत्त्वज्ञं कारयेत्तु महाजयम् ॥
जयो न शक्यते विप्रैः कर्त्तुं कारयितुं यतः ।
महाजयो न सम्भाव्यः कथं कर्त्तुमिहेष्यते ॥
मानुषां शक्तिमाश्रित्य दुष्करं यद्भवत्यपि ।
तस्मादेतन्महामन्त्रं गुरुतः शास्त्रतः स्वतः ॥
यथावत् परिगृह्णीतो देवमभ्यर्च्च्य संजपेत् ।
यदृच्छयाश्रितं मन्त्रं लिखितं पुस्तकादिषु ॥

प्रसङ्गेन च यत् प्राप्तं तन्मन्त्रं परिवर्जयेत् ।
अङ्गहीनं तु यन्मन्त्रं केवलं जपते द्विजः ॥
योगकोटिसहस्रेण जपकोटिशतेन च ।
पूजाकोटिसहस्रेण तादृक् न फलमश्नुते ॥
महाजयनृसिंहस्य जपतो यादृशं फलम् ।
शक्तिभक्तो भवेत्शैवः शिवभक्तस्तु वैष्णवः ॥
वैष्णवो नारसिंहश्चेत् सा काष्ठा सा परागतिः ।
तेषु जयनृसिंहाख्यो मन्त्रश्रेष्ठः प्रकथ्यते ॥
महाजयनृसिंहाख्यस्ततः श्रेष्ठतरो मतः ।
प्रसङ्गेन तु देवेशः प्रियनामायमिष्यते ॥
महाजयनृसिंहेण समो मन्त्रो न विद्यते ।
न बलं स्याद् यत्र बलं ब्रह्मतेजोबलं बलम् ॥
न शक्नोति विना वातं किंचिद् दग्धुं हुताशनः ।
तस्मान्नरपतिर्नित्यं स्वहितं योऽभिकाङ्क्षति ॥
स चाऽथर्वविदं धीरं देववत् परिपूजयेत् ।
न माता न पिता नाऽन्यो बन्धुर्नैवच योषितः ॥
न वैद्यो न च भृत्योऽन्यः हितोऽथर्वविदा समः ।

॥ इत्याङ्गिरसे महाजयकल्पः ॥

* अथ आसुरीमन्त्रम् *

(आङ्गिरसकल्पान्तर्गतासुरीकल्पः)

पुण्ये मन्दाकिनीतीरेऽङ्गिरसं मुनिपुङ्गवम् ।
अपृच्छत् पिप्पलादस्तमासुरीमन्त्रमादरात् ॥
भगवन् ! सर्ववेदज्ञः सर्वमन्त्रैकदायकः ।
कथिता बहवो मन्त्रास्त्वया सर्वार्थसाधकाः ॥
कथं तत्राऽऽसुरीमन्त्रो मन्त्रमध्ये न भाषितः ।
अङ्गिरा उवाच - सर्वेषु शक्तिमन्त्रेषु मन्त्रराजो भवत्ययम् ।

अथर्ववेदसाराणां मध्ये सारतमो यतः ॥
नोपदिष्टो मया तत्ते ब्रह्मणाऽपि निगूढतः ।
शुभं कालं च देशं च पुरश्चर्य्याव्रतं विना ॥
यथा कथञ्चित् करणान्मन्त्रोऽयं फलसाधकः ।
इदानीं तत् प्रवक्ष्यामि सावधानमनाः शृणु ॥
यत् प्रसादात् क्षयं यान्ति देवा अपि वशादिकम् ।
सुराणां चासुराणाञ्च पुरायुद्धमभून्महत् ।
तत्राऽसुरैर्महावीरैः सुराः सर्वे पराजिताः ॥
ततः पलायिता दिक्षु क्षिप्ता भूयः सुसज्जिताः ।
विचारशरणा गूढा स्रष्टारं शरणं गताः ॥
देवा उचुः - प्रजापते ! नमस्तुभ्यमासुरैर्विभूता वयम् ।
स्वपदात् प्रच्युताः सन्तः पदे स्यामः वयं कथम् ॥
स तु तद् वचनं श्रुत्वा प्रणिधानपरः परम् ।
अपश्यद् ब्रह्मवेदे तु मन्त्रं षट् कर्मसाधकम् ॥
उपादिशच्च देवेभ्यः सफलं सविधिं विधिः ।
मन्त्रं प्राप्य ततो देवाः पुण्यस्थानमुपागमन् ॥
असुरं तं तमुद्दिश्य षट्कर्माणि वितेनिरे ।
ततो सुराणां तेषाञ्च मध्ये केचिद् वशं गताः ॥
शरणं वाऽऽगताः केचित् केचित् स्तम्भनमागताः ।
केचिद् विमोहिताः सन्तः विद्विष्टाश्च परस्परम् ॥
केचिदुच्चाटनं प्राप्य दूराद्दूरं पलायिताः ।
केचिद् यमपुरं याताः कर्मणोऽस्य प्रभावतः ॥
नाना चिन्ताऽभिभूतास्ते नैव योद्धुं समुद्यताः ।
देवास्तु सुखिनो जाताः स्वं स्वञ्च पदमास्थिताः ॥
ततः प्रभृति तन्मन्त्रं सर्वे देवा उपासत ॥
अस्य विधिः - प्रणवं पूर्वमुच्चार्य्य नमः पदमुदीरयेत् ।
कटुकां कटुकपत्रां सुभगामासुरीति च ॥
सम्बोधयान्तं पठेदेव मेतत् पदचतुष्टयम् ।

रक्तवासस इत्यस्मात् षष्ठ्यन्तोऽथर्वणो भवेत् ॥
दुहिता स्याच्चतुर्थ्यन्ता घोरा सम्वुद्धिसन्निधिः ।
सप्तम्यन्तं घोरकर्म सम्वुद्ध्यन्ता च कारिका ॥
अमुकस्य पदं क्षिप्त्वा वाक्यत्रयमुदाहरेत् ।
प्रस्थितस्य गतिं दहोपविष्टस्य भगं दह ॥
शयितस्य मनोदह प्रबुद्धस्य पदं वदेत् ।
हृदयं दह तत् पश्चाद् दहद्वयं भवेदपि ॥
दहद्वयं पचद्वयं मथद्वयमतः परम् ।
तावद् दह पदेस्यातां यावन्मेवशमित्यतः ॥
आगच्छेति पदं स्वाहा पदं च प्रतिपादयेत् ।
अथर्वणो महामन्त्रो ह्यष्टोत्तरशताक्षराः ॥
षट्कर्मसाधने ख्यात एकवीरः परात्परः ।

ऋष्यादयः - अस्याङ्गिरा ऋषिश्छन्द स्त्रैष्टुभं देवताऽऽसुरी ॥
असुराणां विनाशाय या दुर्गाधिकृता स्वयम् ।
प्रणवो वीजमापः स्युः शक्तयो विनियोजनम् ॥
षट्कर्मसाधने प्रोक्तं ब्रह्मणा विश्वकर्मणा ।

षडङ्गन्यासः - हृदेवादशभिर्वर्ण्णैः शिरस्तावत् त्रिरक्षरैः ॥
लिपिभिः स्याच्छिखाऽष्टाभिर्दशभिः कवचं स्मृतम् ।
सप्तत्रिंशता नेत्रं स्याद् एवञ्च त्रिंशताऽस्त्रकम् ॥
नास्ति प्रत्यक्षरन्यासः सर्वेण व्यापकं महत् ।

आसुरी मन्त्रः - ॐ आसुरीदुर्गामन्त्रस्य अङ्गिरा ऋषिः, त्रैष्टुभं छन्दः, आसुरी दुर्गा देवता ॐ वीजम् । आपः शक्तयः वशादिषट्कर्मसाधने विनियोगः । १ - ॐ नमः, कटुके ! कटुकपत्रे ! २ - सुभगे ! ३ - आसुरि ! रक्त-वाससे, ४ - अथर्वणस्य दुहित्रे घोरे ! ५ - घोरकर्मणि कारिके ! अमुकस्य, प्रस्थितस्य गतिं दह, (वा भज) उपविष्टस्य भगं दह, शयितस्य मनो दह, प्रवुद्धस्य हृदयं दह दह दह, तावद् दह, पच पच, मथ मथ, तावद् दह, यावन्मे वशमागच्छे त्, स्वाहा, = १०८ वर्ण्णाः । षडङ्गन्यासे तु एकोनशतं वर्ण्णा

सन्ति । समाधानं अभिज्ञैः कर्त्तव्यम् । दहस्थाने भज अपि स्यात् । ११ + ३ + ८ + १० + ४६ + ३० = १०८ षडङ्गन्यासे एवं वर्ण्णसंख्या भवेयुः । षट्चत्वारिंशतां नेत्रमेवञ्च त्रिंशतास्त्रकम् । अमुकस्य स्थाने साध्यनामादिकम् मन्ये -

अथध्यानम् - वशे - शुक्लां पद्मासनां वामे त्रिशूलं दक्षिणेऽङ्कुशम् ।
अधो वामेऽभयं दक्षे वरञ्च दधतीं भुजैः ॥
सर्वालङ्कारदीप्ताङ्गीं नागयज्ञोपवीतिनीम् ।
प्रसन्नामासुरीं दुर्गां ध्यायेद् वशविधायिनीम् ॥
आसुरी दुर्गाऽत्र चतुर्हस्त विशिष्टा भवति ॥

आकर्षणे - एवमाकर्षणे ध्येया सर्वत्रैषाऽरुणाम्वरा ।

स्तम्भने - स्तम्भने कपिलां पद्मे समासीनां भुजैरसिम् ॥
दक्षिणे वामतः पर्शुमधो वामेऽभयं वरम् ।
दक्षिणे दधतां दंष्ट्रापीडितां लम्वजिह्विकाम् ॥
तीक्ष्णां च कुपितां चन्द्रमौलीं देवीं विचिन्तयेत् ।

मोहने - देवीं पद्मासनां पीताम्वराऽभयकरां पराम् ॥
संदधानां शरं चापं भूषितां मोहने स्मरेत् ।

उच्चाटने - उच्चायनेऽरुणां क्रुद्धां सर्वभूषणभूषिताम् ॥
घण्टां दक्षे वादयन्तीं वामतः कृष्णसर्पिणीम् ।
अधो वराऽभयां दंष्ट्रां वाधिता लम्वजिह्विकाम् ॥
महोद्वेगं रिपोः सम्यक् कुर्वतीमासुरीं स्मरेत् ।

विद्रावणे - विद्रावणे रिपुं विद्रावयन्तीं संस्मरेदिमाम् ॥

रोषणे - रोषणे रोहितां रुष्टां तिष्ठन्ती मूर्द्ध्वपूर्विकाम् ।
वामदोकर्पराद‍ग्निं क्षिपन्तीं साध्यगण्डयोः ॥
अन्यस्याऽन्यत्र वा द्वेषं द्वेषञ्चान्योन्ययोरपि ।
कारयन्तीं स्मरेद् देवीं दंष्ट्राजिह्वाभयङ्करीम् ॥

मारणे - मारणे श्यमालां क्रुद्धां मेघनादां कृशोदरीम् ।
असृक्खर्परिणीं वामे दक्षिणे तीक्ष्णखड्गिनीम् ॥
वराऽभयकरां देवीं त्रिजगद्ग्रसनक्षमाम् ।

वशस्योपरि तिष्ठन्तीं मुण्डमालाविभूषणाम् ॥
रक्षः शृगालगृध्रौघैर्वेष्टितां तां विचिन्तयेत् ।
इदं षट्कर्मसु ध्यानं महादेव्याः फलाऽऽप्तये ॥
ध्यानं विना तु यत् कर्म जातु तन्न फलप्रदम् ।
यथैवाऽन्तश्चरा राज्ञः प्रियाः स्युर्नवहिश्चराः ॥
तथैव ध्याननिरतो मन्त्री देव्याः प्रियो भवेत् ।
॥ इत्याङ्गिरसकल्पे आसुरी ध्यानानि ॥

※ अथेष्टसिद्धिः ※

कर्त्तारं कुपिता देवी प्रीणाति, कुपिता हि सा ।
जपहोमाऽर्च्चनादिषु साध्याय तां प्रकोपयेत् ॥
खरा देवी खरा रात्री खरो मन्त्रः खरोऽनलः ।
कर्त्ता च खर एव स्यात् पञ्चसाम्यात् खरं फलम् ॥
शान्ते शान्तो भवेत् कर्त्ता पुष्टे पुष्टो भवेदपि ।
घोरे घोरो भवेद् तस्माद् भवेत् कर्त्तुस्त्रिधास्थितिः ॥
अभीष्टाद् विपरीतं चेन्नृसिंहशकुनेतरम् ।
नृसिंहं वशमानीय फलं तेनैव साधयेत् ॥
क्षिपेत् तत्राऽऽसुरीमन्त्रे भक्ते (रक्ते) त्येव दाहादिषु ।
स देवोह्यासुरीहोमाद् यजमाने वशं ब्रजेत् ॥
कुर्य्यात् पलशतं ताम्रं भाजनं निम्नविस्तृतम् ।
चन्दनाऽगुरुकर्पूरजलं तत्र प्रपूरयेत् ॥
मधुरत्रयसंयुक्तैरपिष्टैः राजिकाफलैः ।
प्रतिमां श्रीनृसिंहस्याऽश्वत्थपत्रेषु कारयेत् ॥
देवास्तत्र नृसिंहस्य भजनैश्च तमाहरेत् ।
नृसिंहं पूजयेत् तस्यां विधिना मन्त्रवित् तमः ॥
कर्त्ता तां प्रतिमां सम्यग् नृसिंहं भावयन् परम् ।
पठित्वा तु शतं मन्त्रं तैले तत्रैववा हुनेत् ॥ (वा पात्रे)
एकविंशति रात्रेण नृसिंहं वशमानयेत् ।

ततोऽसौ मन्त्रराजेन घृतं हुत्वाऽयुतत्रयम् ॥
अभीष्टसिद्धिमाप्नोति श्रीनृसिंह प्रसादतः ।
यस्मादुत्पद्यते सर्वं ततोऽभीष्टं किमद्भुतम् ॥
एवमेव वशीकुर्य्यादितरामपि देवताम् ।
देवता वशमानीता किं वा कार्य्यं न साधयेत् ॥
॥ इत्याङ्गिरसे इष्टानिष्टशकुने इष्टसिद्धिः ॥

※ अथ पूजाविधिः ※

देवादन्यसाधकस्य तापपूर्वो वशो भवेत् ।
देवस्यान्तर्वशः सेवापूर्वकः स्यात् परो हि सः ॥
एवं स्याद् देवयोनीनां वशः सन्तापपूर्वकः ।
राजादीनां वशोऽप्येदं ताप पूर्वो न चाऽन्यथा ॥
यत्र कृते समुद्वेगस्तदेव कुरुते नरः ।
देवस्योद्वेजने कर्तुः यजमानस्य चाऽशुभम् ॥
शुभार्थी न ततो देवमुद्वेजयितुमर्हति ।
ततस्तमासुरीद्वारा सेवित्वा वशमानयेत् ॥
नृसिंहः सप्त (सर्व) शक्तीनां मध्ये एकोऽपि नाऽम्बिका ।
देवस्यैषासुरी शक्तिः शक्तिमन्त्रं भजेदमूम् ॥
देवस्य वशीकरणे मन्त्रमेवं प्रयोजयेत् ।
(आसुरी दुर्गामन्त्रः ४४ पत्रे वर्त्तते ।)

पिवन्तीं हृतपीयूषं तृप्यन्तीं करुणावताम् ।
फलदाने कृताकाङ्क्षीं यजमानानुकंपया ॥
नृसिंहं श्रद्धया भक्त्या प्रणमन्तीं महेश्वरीम् ।
वशे यान् चिन्तयेद् देवान् नृसिंहवशसिद्धये ॥

नृसिंहवशः - पूजायां पूर्ववत् सर्वं विशेषस्त्वपि गीयते ।

शक्तयः - प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनीमताः ॥
सुप्रभा विजया सर्वसिद्धिदा नवशक्तयः ॥

मन्त्रः - ॐ बज्रनखदंष्ट्राय हूं फट् ।

अथवा ॐ महासिंहाय हूं फट् नमः । दशाक्षरविशिष्टः ।

षडङ्गावृत्तयः - प्रथमाङ्गावृत्तिः पूजा द्वितीयाऽर्च्यादिका ततः ।
तृतीया चिदरायावद्* ब्राह्म्याद्या च चतुर्थिका ।
पञ्चमीन्द्राद्रिका षष्ठा बज्राद्या वृत्तयः क्रमात् ॥
अङ्गमन्त्राश्चार्षु पूर्वो हृदयाद्या महीमनोः ।
ताराद्याङ्गा नमः प्रान्तात् स्वार्य्यादयः ततः स्मृताः ।

वा - ताराद्याङ्गा नमः प्रान्ता आर्य्यादयः ततः स्मृताः ॥
आर्या दुर्गा च भद्रा च भद्रकाली तथाऽम्बिका ।
क्षेमा च वेदगर्भा च इमाः कर्मसु शक्तयः ॥

तृतीयावरणम् - अभिर्वरं कृपाणश्च खेटकं च शरो धनुः ।
त्रिशूलं च कपालं च देव्याः शस्त्राष्टकं विदुः ॥

चतुर्थावरणम् - ब्राह्मी माहेश्वरी चैव कौमारी बैष्णवी तथा ।
वाराहीन्द्री च चामुण्डा महालक्ष्मीश्च मातरः ॥

पञ्चमावरणम् - इन्द्रमग्निं यमं चैवं निर्ऋतिं वरुणं तथा ।
वायुं कुवेरमीशानमनन्तं परमेष्टिनम् ॥
दिक्पालान् दश जानीयात् पञ्चमावरणस्थितान् ।

षष्ठावरणम् - बज्रः शक्तिश्च दण्डश्च खड्गः पाशोऽङ्कुशो गदा ॥
शूलं चक्रं च पद्मं च दिक्पालाऽस्त्राणि संजगुः ।
अर्च्चनीया महादेव्याः शक्तेरेताः षडाऽऽवृतीः ॥

॥ इति पूजा विधिः ॥

❋ अथ होम सान्वविधिः ❋

कृतनित्य क्रियो विप्रः कृतासनपरिग्रहः ।
श्रीनृसिंहमनुस्मृत्य प्राणायामं विधाय च ॥
ऋष्यादिन्या समाश्रित्यदेवीमन्त्रैर्यजेत् ततः ।
किंचिज्जप्त्वाऽर्घपातं च परिकल्प्य वहिर्यजेत् ॥

❋ तृतीयाऽभिवरा

अग्निकुण्डेऽग्निमाराध्य तत्र देवीं पुनर्यजेत् ।
आसीरीं सूक्ष्मसंपिष्टां कुर्य्यात् प्रतिकृतिं रिपोः ॥
अर्कपत्रेषु साध्यस्य प्राणान् संस्थापयेदिह ।
तीक्ष्णशस्त्रेण पादादीन् प्राग्दक्षिणेन कृन्तति ॥
अष्टोत्तरशतं खण्डान् एतांश्च परिकल्पयेत् ।
अभिमन्त्र्याऽष्टधा खण्डान् मूलमन्त्रेण मन्त्रवित् ॥
देहे न्यासान् समाचर्य्य वध्यशत्रोश्च तान् हुनेत् ।
प्रतिमाया हृतः प्राणः तीक्ष्णशस्त्रेण खण्डितः ॥
खण्डितश्च हुतः शत्रुर्महोद्वेगमुपागतः ।
वशादिकं समायाति निश्चितं मनुजोऽमुना ॥
अयं होमविधिः प्रोक्तः समः षट्सु च कर्मसु ।
विशेषस्तत्र तत्रैव वक्ष्यते फलभेदतः ।
त्वरया चेन्न शक्नोति होमं कर्तुं बुधस्तदा ॥
महामन्त्रे महादेवीं संपूज्य जपमाचरेत् ।
यन्त्रं कर्त्तुं न शक्नोति यदा मन्त्रं जपेत् तदा ॥

वि. द्र. - यत्र होम व्यवस्था वर्त्तते तत्र तत्र नक्षत्र कल्पोक्तस्थण्डिल विधानेन अग्निस्थापनं भविष्यति । अत्र आसुरी महामन्त्रेण सर्वकर्म भविष्यति ।

॥ इत्याङ्गिरसे होमसान्वविधिः ॥

❋ अथ भावना षट्कम् ❋

भावयेत् क्रोधनः कर्त्ता वशयन्तीं रिपुं वशे ।
आकर्षयन्तीमाकर्षे स्तमयन्तीं स्थिरीकृतौ ॥
मोहने मोहयन्तीं च द्वेषयन्तीं च रोषणे ।
उच्चाटने समुद्वेगं कारयन्तीं च विद्रवे ॥
द्रावयन्तीं च मारणे मारयन्तीं महेश्वरीम् ।
एवं चेद् भावनाषट्कं कर्तुं मन्त्री प्रभुर्भवेत् ॥
षण्णां च कर्मणां सिद्धिर्भवेत् तस्य करस्थिता ।

॥ इत्याङ्गिरसे भावना षट्कम् ॥

* अथाऽञ्जन षट्कम् *

(हवनद्रव्याण्यञ्जयेद् इत्यर्थ)

घृताक्तं स्याद् वशे हव्यमेवमाकर्षणेऽपि च ।
मधक्तं स्तम्भने चैव गुडाक्तं मोहने तथा ॥
तैलेनाक्तं विद्वेषणे उष्णतैलेनोच्चाटने ।
एवं विद्रावणे विद्याद् राजितैलेन मारणे ॥
यद् वा घृताक्तं सर्वत्र होमनीयं प्रशस्यते ।
विद्यन्ते हवनीयस्य य एतानञ्जनानिषट् ॥
तस्य षट्कर्मसिद्धिः स्यान्नेतरस्य कथंचन ॥

॥ इत्याङ्गिरसे अञ्जन षट्कम् ॥

* अथ होमकालनिर्ण्णयः *

एकरात्रो होमकालः सिद्धिमन्त्रस्य चोदितः ।
त्रिरात्रः सप्तरात्रो वा चतुर्दशनिशोऽपि वा ॥
एकविंशति रात्रो वा पञ्चधा कालनिर्ण्णयः ।
अत्युत्तमहोमकाल एकरात्रः श्रुतिस्मृतः ॥
त्रिरात्रश्चोत्तमकालः मधयमः सप्तरात्रकः ।
चतुर्दशनिशः कालस्त्वधमः परिकीर्त्तितः ॥
एकविंशतिरात्रश्च कालः स्यादधमाधमः ।
अत्युत्तम उत्तमश्च मधयमश्चाधमोऽपि च ॥
अधमाधम इत्येते पञ्चधा ब्रह्मणा मता ।
कुलिनो जातकर्मादिशुद्ध वेदस्य पारगः ॥
सदाऽऽचार मनीषा चात्युत्तमो ब्राह्मणः स्मृतः ।
हीना एवोत्तमाद्याः स्युरेकद्वित्रि चतुर्गुणैः ।
पञ्चानां पञ्चधाकालः कल्पिता विश्वकर्मणा ॥
एवं यदि न दृश्येत फलं विद्वानतन्द्रितः ।
तदा कुर्य्याद् द्विरावृत्तिं त्रिरावृत्तिमथाऽपि वा ॥

तथापि चेत् फलं नास्ति तदा वैमुख्यवर्जितः ।
फलान्तं कर्म कुर्वीत निर्व्यर्थं फलमश्नुते ॥
कर्तुः कारयितुर्वाऽपि पुंसः साधयस्य वा तथा ।
अदृष्टस्य वशादेव कर्माणि न पलन्ति हि ॥
कर्तुस्तत्राऽपराधेन यजमानस्य वा तथा ।
साधयस्यापि च वा यस्माद् दैवः दुर्लंघ्य रच्यते ॥

॥ इत्याङ्गिरसे होमकालनिर्ण्णयः ॥

* अथाऽऽसुरी मन्त्रार्थ उच्यते *

अङ्गिरा उवाच – मन्त्रार्थं ते प्रवक्ष्यामि यथाऽऽदिष्टं स्वयम्भुवा ।
अमुकस्य पदस्थाने साधयनाम प्रयोजयेत् ॥
वशमित्यस्य तत्स्थाने स्तम्भनादिपदं न्यसेत् ।
अन्यार्थे यजमानस्य नाम मे स्थानतः पठेत् ॥
स्वाहाकारं परित्यज्य फट् कारं मारणे वदेत् ।
वशादन्यत्र होमादौ मे पदं च परित्यजेत् ॥
एवं मन्त्रप्रयोगादौ जपादौ कार्य्यसाधनः ।
ॐकारः सोऽहमित्यर्थः सेव साऽहं तयोः सदृक् ॥
अन्यथा नाऽधिकारीस्यान्नाऽदेवो देवमर्च्चयेत् ।
अथर्वणस्य दुहित्रे नमोऽस्तु रक्तवाससे ॥
कार्य्यं प्रार्थयतं देवीमादौ मन्त्री नमस्यति ।
कटुकादिपदैः षड्भिः क्रियतेऽभिमुखीश्वरी ॥

तद् यथा – मन्त्रस्य घोरकर्मणि(णः) कारिके ! यावत् ।
अधिष्ठात्री च देवीस्यात् अधिष्ठेयं हविर्यतः ॥
ततो भेदोपचारात् सा लक्ष्यते कटुकादिभिः ।
आसुरी राजिका सा च कटुत्वात् कटुकोच्यते ।
तत् पत्राणां कटुत्वाच्च कटुपत्राऽभिधीयते ॥
सुभगा सुन्दरी सा च स्तूयते कार्य्यसिद्धये ।

सा सदा रक्तवस्त्रा स्यादथर्वश्रुतिसम्भवा ॥
मन्त्रस्य देवतायाश्च हव्यस्याऽप्यैक्यवुद्धितः ।
घोरा विषमरूपा सा घोरकर्मणि कारिका ॥
प्रस्थितौ च स्थितौ वाऽपि शयने च प्रबोधने ।
चतुःस्थानेषु साध्यस्य गति काम मनोहृदाम् ॥
दाहं प्रार्थयते मन्त्री साध्यस्योद्वेगकारणम् ।
न गच्छतु न तिष्ठतु न शेतां न प्रबुध्यताम् ॥
साध्यः प्राप्यमहोद्वेगं समायातु वशादिकम् ।
वा दाहय, वा मन्थय साध्यं प्रार्थयते पुनः ॥
वशादेराशुसिद्ध्यर्थमुद्योगो हितकारणम् ।
अनवस्था निवृत्यर्थं फलं सा मां करोति च ॥
तावत् त्वं दह यावन्मे वशमायाति नाऽन्यदा ।
भविष्यत् कालसामीप्ये वर्त्तमानः प्रयुज्यते ॥
आगच्छति भवेत् प्राप्तिरनेकार्थविधानतः ।
अथर्वणस्य दुहित्रे स्वाहा ते रक्तवाससे ॥
स्वस्य हव्यस्याऽऽवाहनान्महात्यागः कृतो मया ।
देवमुद्दिश्य हव्यस्य त्यागो यागोऽभिधीयते ॥
मन्त्राऽर्थो दुर्लभोऽप्येषः मयोक्तः फलसिद्धये ।
अर्थज्ञानं विना मन्त्रो न कदाचित् फलप्रदः ॥
॥ इत्याङ्गिरसे आसुरीमन्त्रार्थकथनम् ॥

* अथ कुण्डलक्षणम् *

अङ्गिरा उवाच - कुण्डस्य लक्षणं वक्ष्ये सर्वकर्मार्थसिद्धये ।
यस्य दोषेण सर्वत्र कृतमप्यकृतं भवेत् ॥
शान्तिकं चतुरस्रं स्यात् कुण्डं वृत्तं तु पौष्टिकम् ।
चतुरस्रं भवेत् कुण्डं वशेऽप्याकर्षणेऽपि च ॥
सप्तास्रं स्तम्भने कुण्डं षडस्रं मोहने भवेत् ।
विद्वेषणे त्रिकोणं स्याद् उच्चाटेऽष्टास्रकं भवेत् ॥

एवमुत्सादने कुण्डं पञ्चास्रं मारणे भवेत् ।
कुण्डं वा चतुरस्रं स्यात् प्रशस्तं सर्वकर्मसु ॥
कुण्डे तु मेखलास्तिस्रः तास्वाद्या चतुरङ्गुला ।
द्वितीया त्र्यङ्गुला तत्र तृतीया द्व्यङ्गुला मता ॥
एवं कुण्डं खनेन् मन्त्री हस्तमात्रं प्रमाणतः ।
योन्याकारो भवेन्नाभिः शिष्टमन्यत्र विस्तृतम् ॥
एष कुण्डविधिः सर्वश्चतुरास्येन चोदितः ।
विधिहीनं तु यत् कुण्डं तत् फलाय न कल्पते ॥
॥ इत्याङ्गिरसे कुण्डविधिः ॥

* अथाऽऽसुरीस्वरूपकथनम् *

पिप्पलाद उवाच - भगवन् ! का हि सा देवी या मन्त्रेणाऽभिधीयते ।
तामहं श्रोतुमिच्छामि महत् कौतुहलं मम ॥
अङ्गिरा उवाच - देवीं दुर्गां प्रवक्ष्येऽहम् एकतानमनाः शृणु ।
अद्वैतं सच्चिदानन्दं शुद्धं ब्रह्मप्रकाशते ॥
इदमङ्गमुदासीनं न किञ्चित् कर्तुमीश्वरः ।
तस्य माया पराशक्तिर्माया मायाविनो यथा ॥
यत् प्रभावादकर्त्ताऽपि कर्त्तेव परमेश्वरः ।
सर्वशक्तिस्वरूपा सा मूलशक्तिरिति स्मृता ॥
ब्रह्मसन्निधिमात्रेण या सर्वं तनुते जगत् ।
प्राणीनां कर्मभोगाय साऽन्यथाऽनुपपद्यते ॥
इयं स्वान्तस्य सान्निध्याद् यो यद् यच्च प्रवर्त्तते ।
उत्पत्तिस्थिति संहारकर्त्री सा परमेश्वरी ॥
तद्भेदांश्च न जानाति सर्वज्ञोऽपि महेश्वरः ।
तस्याः काऽप्यभिधा दुर्गा सर्वदैत्याऽभिघातिनी ॥
दर्पहा साऽऽसुरी नामा सुरदर्पविभञ्जनी ।
आर्त्तदेहा च सा देवी सर्वलोकाऽनुकंपया ॥
मायामयशरीराऽपि ध्येया षट्कर्मसिद्धये ।

एतदाकारसंपर्ण्णा ब्रह्मैषा परमार्थतः ॥
इष्टदात्रीमिमां देवीं सर्वे देवा उपासते ।
सेयं षट्कर्म सिद्ध्यर्थमीश्वरेण नियोजिता ॥
ततः प्रभृति सा देवी तत्साधनकृताव्रती ।
ततस्तां मुनयः सर्वे सर्वदा समुपासते ॥
ततस्तां महतीं देवीं त्वमुपास्व दृढव्रतः ।
ययेदं जन्यते सर्वं रक्षते च विनाश्यते ॥

॥ इत्याङ्गिरसे आसुरीस्वरूपकथनम् ॥

* अथासुरी महायन्त्रम् *

अङ्गिरा उवाच - अथाऽऽसुरीमहायन्त्रं प्रचक्ष्यामि महामुने !
होमं विना यत् पूजाया महिम्ना लभ्यते फलम् ॥
विशुद्धस्य सुवर्ण्णस्य शतमात्रेण तद्भवेत् ।
आदौ अष्टदलं पद्मं द्वितीयं द्वादशच्छदम् ॥
तृतीयं षोडशदलं चतुस्त्रिंशद् दलं ततः ।
तस्य मध्ये लिखेद् वीजं (ॐ) तस्याऽधो विलिखेत् फलम् ॥
अष्टपत्रे लिखेन्मायां श्रीवीजं द्वादशच्छदे ।
ततः षोडशपत्रेषु सविन्दु षोडशस्वरान् ॥
चतुस्त्रिंशत् तु पत्रेषु एकैकम् व्यञ्जनानि च ।
चतुष्पद्माऽऽत्मकं यन्त्रं महायन्त्रमिदं स्मृतम् ॥
एवं यन्त्रं विनिर्माय प्रतिष्ठाप्य विधानतः ।
तत्राऽर्च्चयेन्महादेवीं मन्त्री षट्कर्मसिद्धये ॥
एतत् प्रोक्तं महायन्त्रं दुष्प्राप्यं भुवनत्रये ।
अत्र देव्यर्च्चनाद् भूयाद् होमादप्यधिकं फलम् ॥

वि. द्र. - अत्रावाहनादारभ्य सर्वपूजाकर्माणि भविष्यन्ति ।

अथास्मिन् यन्त्रयन्त्रिता देवताः - नारसिंहे चक्रे -
महायन्त्रान्तरं वक्ष्ये देवता यन्त्रयन्त्रिताः ।
तत्र पूजां महादेवी भूयो भूयोऽभिकांक्षति ॥

नारसिंहे महाचक्रे नाभौ वीजमधः फलम् ।
विलिखेत् षडरे चक्रे ऐशान्यादि क्रमेण वै ॥
जलाऽऽकाश काम मया श्रीदुर्गावीजकानि षट् ।
अष्टारे द्वादशारे च षोडशारे तथैव च ॥
द्वात्रिंशदरके चक्रेऽप्यरसंख्यानुसारतः ।
अष्टषष्टीर्मन्त्रवर्ण्णान् चतुश्चक्रे लिखेत् क्रमात् ॥
वहिर्भूमण्डलाद्* शिष्टान् वर्ण्णान् प्राच्यामिहाष्टकम् ।
दक्षिणस्यां दशैवं च पश्चिमायां द्वयं दश ॥
दशोदीच्यामिहैवं स्यादष्टोत्तरशताक्षरः ।
प्रणवान्तो महामन्त्रो भवेदेव तदात्मकः ॥
महायन्त्रं प्रतिष्ठाप्य देवीमत्रप्रपूजयेत् ।
न होमो न जपो नैव बलिर्नैव च तर्पणम् ॥
महामन्त्रार्च्चनाजात षट्कर्मफलभाग् भवेत् ।
उक्तमेतं महायन्त्रं षट्कर्म सिद्धिसञ्ज्ञकम् ॥
यस्य धारणमात्रेण वाञ्छितादधिकं फलम् ।

वि. द्र. - अष्टद्वादशषोडशद्वात्रिंशद्दलेषु आसुरीमहामन्त्रस्य ॐ नमः इत्यारभ्य प्रबुद्धं यावत् लिखित्वा महायन्त्राद् वहिः प्राच्यां स्य इत्यारभ्य अष्ट, दक्षिणस्यां दश, ततः पश्चिमायां द्वादश, उदिच्यां च दश एवं अष्टोत्तरशतमन्त्रवर्ण्णान् लिखेत् । यत्र एकाधिक पद्मानि सन्ति सर्वत्र षड्दलादि पद्मनिर्माणक्षेत्रे एकस्मिन्नेव स्थाने एकस्य पद्मकोषस्य उपरि अन्यानि सर्वाणि पद्मदलानि कर्त्तव्यानि । नाभौ अर्थात् कोषमध्ये मन्त्रस्य वीजं, अथवा यत्र यदस्ति तल्लिखेत् ॥

॥ इत्याङ्गिरसे षट्कर्मसिद्धिनामाऽऽसुरीमहायन्त्रम् ॥

* अथ सर्ववशीकणरम् *

नृपः सर्ववशं वाञ्छन्नेतद् यन्त्रञ्च धारयेत् ।
त्रयस्तु स्ववशं यान्ति मित्रं दासी च शत्रवः ॥

* भूमण्डले

राजा सर्ववशं काङ्क्षन्नाऽऽसुरीं सर्वदा जपेत् ।
अथ सर्ववशं वक्ष्ये दुष्करं ब्रह्मचोदितम् ॥
चिरवैरी महावीरः प्रियपुत्रायते जितः ।
पूजाक्रमः - यजमानेन सङ्कल्पकृतः शुद्धः कृतक्रियः ।
वशार्थम् - आदावासनमासाद्य विहितप्राणसंयमः ॥
कृतभूतविशुद्धिश्च मातृकान्यासमाचरेत् ।
एकावह्निमुखी देवी एको देव इति श्रुतिः ॥
राजिकां मृदुसंपेष्य अर्कपत्रेषु पुत्तलिम् ।
तया चाद्या हस्त मात्रीं रिपोः सुसदृशीं सृजेत् ॥
स्वस्य दक्षिणतो देशे रक्तवस्त्रेण संस्कृते ।
उत्तानशायिनीं पूर्वशीर्षां विस्तृतदोस्पदाम् ॥
तस्यां प्रतिकृतौ शत्रोः प्राणानाहृत्य वेशयेत् ।
रिपुणाऽधिष्ठिता सा वै चेतनेत्येव भावयेत् ॥
अरे ! पापाऽपकारेऽस्य वर्त्तसे मम भूपतेः ।
अप मे पतितोऽस्यग्रे तद्वशायच्छिनद्म्यहम् ॥
खण्डखण्डं जुहोम्यद्य वह्निदग्धा भवाऽधुना ।
जानासि वह्निदाहस्य दुःखमुद्वेजकं यथा ॥
भद्रेण यदि ते कार्य्यम् एतस्य वशमाव्रज ।
अन्यथा वशपर्य्यन्तं महोद्वेगमवाप्स्यसि ॥
इति क्रुद्धसमाऽऽपन्नः शत्रुदृष्ट्यैव तां वदेत् ।
ततस्तां मूलमन्त्रेण वाचा नष्टेति मन्त्रयेत् ॥
प्राग्दाक्षिण्येन पादादि तीक्ष्णखड्गेन खण्डयेत् ।
अष्टोत्तरशतं, स्वस्मिन् ऋष्यादिन्यासपूर्वकम् ॥
क्रुद्धः क्रुद्धां स्मरेद्देवीं तान् खण्डान् सर्पिषाऽञ्जितान् ।
मन्त्रेण जुहुयान्मन्त्री सपत्नाङ्गानि भावयन् ॥
एवं तामुपयुञ्जानां वशयन्तीं रिपुं बलात् ।
आनीय यजमानस्य पादलग्नां च कुर्वतीम् ॥
आसुरीं भावयेन्नित्यं होमकाले जितेन्द्रियः ।

ततो रात्रौ बलिं दद्याद् यजमानोऽतितोषिणीम् ॥
वि. द्र. - अत्राऽपि होमो वर्त्तते ततः नक्षत्रकल्पविधिना भविष्यति ।
मूलमन्त्रेण = आसुरी दुर्गामन्त्रेण ॥
आकर्षणार्थम् - एवमाकर्षणे कुर्य्याद् विशेषो भावनादिषु ।
एषः शत्रुवशः प्रोक्तः यथोवाच प्रजापतिः ॥
यत् कर्मप्रवणो राजा विगताऽरिः प्रजायते ।
विगतारिर्महीपालो भुंक्ते राज्यं सुखं सदा ॥
उच्चाटारिर्महीभर्त्ता सदा दुःखी भवेदिह ।
तस्मात् सदा सुखं वाञ्छन् नृपोऽरीन् वशमानयेत् ॥
॥ इत्याङ्गिरसे शत्रुवशः ॥

* अथ सर्वस्तम्भनम् *

अथ चलितस्तम्भनम् -

चलितस्तम्भनं वक्ष्ये दुःसाध्यं मन्त्रवादिना ।
आगच्छन् बलवान् यस्मात् प्रेर्य्यमाणोऽपि न ब्रजेत् ॥
दूरादागच्छतः शत्रोरेकविंशतिरात्रिकम् ।
स्तम्भनं कर्म कुर्वीत निकटात् सप्तरात्रिकम् ॥
त्रिकालकरणादेतन्महास्तम्भनमुच्यते ।

अथ स्थितस्तम्भनम् -

स्थितस्य स्तम्भनं कार्य्यं महास्तम्भनमाद्यतः ।
पूर्ववत् सर्वमेतत् स्याद् विशेषो भावनादिषु ॥
सपत्नस्तम्भनं कृत्वा निःशत्रुर्नृपतिर्भवेत् ।
विलंघ्य स्तम्भनं शत्रुर्यद् वा गच्छति दैवतः ॥
तदा दुर्गं समाश्रित्य जयार्थं कर्मकारयेत् ।
ततो बलवता येन युध्यमानो जयत्यसौ ॥
जेतुं यदि न शक्नोति तदोत्सादनमाचरेत् ।
उत्सादनेऽप्यशक्तश्चेन् मारणं कुरुते तदा ॥
॥ इत्याङ्गिरसाऽऽसुरीकल्पे स्तम्भनम् ॥

* अथ मोहनम् *

मोहनं धीमतः शत्रोः प्रवक्ष्ये वुद्धिनाशनम् ।
बलवानपि निर्बोधः, पराभवमुपैति च ॥
पूर्ववत् सर्वमत्र स्याद् विशेषो भावनादिषु ।
वुद्धिहीनं परं कृत्वा कृतकृत्यो भवेन्नृपः ॥
वुद्धिहीनः परो यस्माद् जीवदेव मृतो भवेत् ।
मृतो शत्रुर्यथा राजा मोहने भुवि शत्रुवत् ॥
विमोहितास्तथा राजा मोदते परिपालयन् ।

* अथ विद्वेषणम् *

विद्वेषणं प्रवक्ष्यामि रिपूणां रिपुनाशनम् ।
चतुरो नृपतिः शत्रुं विनाशयति शत्रुणा ॥
वशवत् सर्वकर्माऽत्र विशेषो भावनादिषु ।
परस्परं प्रविद्विष्टैः रिपुं कृत्वा धराधरः ॥
अन्योन्यं विघ्नति शत्रोः साक्षी चेत्येत विग्रहम् ।
अन्योन्यं च विगृह्णन्तौ त्यजतः शत्रुतापहम् ॥
रिपुं विद्वेषयन् राजा निश्चिन्तो राज्यभुग् भवेत् ।

* अथ उच्चाटनम् *

उच्चाटनमहं वक्ष्ये योद्धुमागच्छतो रिपोः ।
यत्रोद्वेगमरिः प्राप्य पलायति महाभयात् ॥
उद्विग्ने विद्रुते वाऽपि रिपौ राजासुखी भवेत् ।
वशस्याकरणं सर्वं विशेषो भावनादिषु ॥
रिपुरुच्चाटनं याति स्वयं स्वास्थ्यं समृच्छति ।
इत्थं नरपतिस्तत्र सदा कर्म न कारयेत् ॥
तस्माद् राजा विशेषेण परोच्चाटन तत्परः ।
सर्वदा वर्त्तते कोऽभिमुखं स्वस्य परित्यजेत् ॥

* अथ मारणम् *

अथातो मारणं वक्ष्ये शत्रुप्राणविनाशनम् ।

सदा सुखकरं राज्ञः कर्त्तुर्वहुधनप्रदम् ॥
वशादिकर्मणः सर्वं परतः तद् भवेदिह ।
दक्षिणाऽभिमुखो मुक्तकेशः दक्षोपवीतकः ॥
वामेन पाणिना तीव्रक्रुद्धश्चात्यन्तसाहसः ।
सर्वतो निर्भयः क्रूरः जगद्रक्षापरायणः ॥
शुद्धो मन्त्रार्थतात्त्विकः क्रुद्धो लोभादिवर्जितः ।
दीक्षितः कृष्णवस्त्राढ्यः ब्रह्मचारी जितेन्द्रियः ॥
यतप्राणश्च विश्वासी मेखलादण्डधारकः ।
स्वानुकूले सपत्नस्य प्रतिकूले दिन दिने ॥
मारणं कर्म कुर्वीत राजा राष्ट्रसुखावहम् ।
यन्त्रं दशसुवर्ण्णेन कारयेत् पूर्ववन्नृपः ॥
पीठं दशसुवर्ण्णेन राजतेन प्रकल्पयेत् ।
कुर्य्यात् पलशतं कांस्यं पीठं कर्त्ता तु सम्वसेत् ॥
कुम्भं पलशतेनाऽत्र ताम्रेण परिकल्पयेत् ।
देव्या नानाविधानेन भूषणानि च कारयेत् ॥
शतं सुवर्ण्णपुष्पाणां प्रतिरात्रं च पूजयेत् ।
भूयो भिरति विस्तारैरुपचारै वृहद्वृधैः ॥
अतिक्रुद्धां महादेवीं यत्नेन प्रतिपूजयेत् ।
कार्पासंवसनं रम्यं पट्टं नानाविधं तथा ॥
कोशोद्भवं च दिव्यं च परिधानाय सम्भवेत् ।
तेषां मध्ये प्रदद्याच्च दिव्ये वस्त्रे दिने दिने ॥
वासो नवं नवं कुम्भे प्रत्यहं प्रतिपादयेत् ।
हेम्नो दशसुवर्ण्णेन कुर्य्यादर्घ्यस्य भाजनम् ॥
ततः पानादिपात्राणि राजतानि प्रकल्पयेत् ।
संपादयेदहरहो विप्रद्वादश भोजनम् ॥
द्विहस्तं पञ्चकोणं च शालायां वेदिकोपरि ।
खनेत् कुण्डं प्रयत्नेन त्रिकोणं वाऽपि हस्तकम् ॥

क्रुद्धाग्निरतिचक्रा* च जिह्वा तत्र प्रकीर्त्तिता ।
नृसमा प्रतिमा च स्याद् उत्ताना दक्षिणा शिरा ॥
रिपोर्नखांश्च केशांश्च यथास्थानं विनिक्षिपेत् ।
अत्राऽरेराहरेत् प्राणान् विधिनाऽऽकर्षपूर्वकम् ॥
प्राग्देहादाहृतः प्राणः निर्जीवीकृतविग्रहः ।
सूक्ष्मपिष्टाऽऽसुरी देह उत्तानशयनः परः ॥
जीवन्नेव परः कर्त्ता साक्षाद् देवीव वा भवेत् ।
कर्त्ता तं पार्श्वतः सुप्तं रिपुं प्रागिव भावयेत् ॥
संक्रुद्धो वामपादादि प्रसिद्धं निशिताऽसिना ।
प्रागिवाऽऽशु शतं छित्वा दक्षपादाद् वशादिकम् ॥
मूलमन्त्रेण तान्खण्डान् राजिकातैलमजिज्जतान् ।
होमयेच्छत्रुवुद्ध्याऽग्नौ रिपुं खड्गेन निघ्नति ॥
देवीं ध्यायन् महामन्त्री निर्भयकृत शत्रुभिः ।
एवमष्टशतं हुत्वा निशि कुर्य्यान्महाबलिम् ॥
पशुपूजाविधानेन पूजयेत् तां निशां निशाम् ।
छागलानां शतं दद्याद् प्रौढांश्च महिषान् दश ॥
एवं बलि समाचर्य्य प्रार्थयेदासुरीमिमाम् ।
सच्चित्सुखपरंब्रह्म मायाशक्ते ! महेश्वरि !
मायादेहं समाश्रित्य मायाखड्गैन मे रिपुम् ।
मयामयं विहितं भो ! मायामयमिदं जगद् ॥
स तस्य ब्रह्मणो मायाविनः सन्निधिमात्रतः ।
महामाये ! जगत्सर्वं निर्मिमीषे त्वमासुरी ॥
त्वया हि निर्मितः शत्रुस्त्वया संहृत्यतीत्यपि ।
मनसा कल्पिते सोऽस्तु संहृतस्त्वत् प्रसादतः ॥
जगत् संहारिणी त्वं हि संहारेऽस्य किमद्भुतम् ।
नमस्ते विश्वरूपेशे ! ऽमुकं मारय मारय ॥

---

* अतिचक्रा - शत्रुनाशिनी षष्ठीजिह्वा " स्फुलिङ्गिनी "।

त्रिःषष्ठि*नक्तमेवं च कृत्वा संमारयेद् रिपुम् ।
त्रिकालं यदिकुर्वीत तन्महामारणं भवेत् ॥
नृपोऽस्मै दक्षिणां दद्याद् धनशाठ्यं विवर्जयेत् ।
रत्नं ग्रामवरं धान्यं यानानि कनकानि च ॥
सुवर्ण्णशत संख्यानि दक्षिणाः पञ्चमारणे ।
इत्थं नृपतिराचार्य्यं परितोष्य सुखीभवेत् ॥
विना युद्धं रिपुं हत्वा सुखी न स्यात् कथं नृपः ।
॥ इत्याङ्गिरसान्तर्गताऽऽसुरीकल्पे वशादि षट्कर्माणि ॥

* अथ आसुरीविधान कल्पः *

(अस्य लेखकः कश्चित् तान्त्रिकः न पिप्पलादः)
भगवन्तं महादेवं प्रणमामि सनातनम् ।
शान्ता रौद्राः शिवाः शत्रुमूर्त्तयो यस्य कोटिशः ॥
गुरुपादाम्वुसं सेकविमलज्ञानलोचनः ।
रचयाम्यासुरीकल्पमुपदेशक्रमादहम् ॥
देशे कोषे बले दुर्गे प्रबलेऽनुजिगीषिणा (षुणा) ।
आक्रान्त नृपतिस्तत्र घोरकर्म समाचरेत् ॥
घोरकर्म समाख्येय मासुरी परिकीर्त्तिता ।
ब्रह्मणाऽङ्गिरसे पूर्वमुपदिष्टा महात्मना ॥
पिङ्गलाख्या तथोच्छुष्मा प्रत्यङ्गिराश्चतुर्थिकी ।
लवणा, पञ्चमीज्ञेया सर्वकामप्रदरयिनी ॥

वि. द्र. - आसुरी, पिङ्गला, उच्छुष्मा, प्रत्यङ्गिरा, लवणा च पञ्च ।

वशिष्ठ वामदेवश्च तस्माज्जगृहतुस्ततः ॥
तथाऽसुरैस्तु देवानां युद्धमासीत् सुदारुणम् ।
न देवा स्तत्र पर्य्याप्ता वभूवुः युधि संगमे ॥
ततः पलायिता देवा विद्रुताश्च दिगन्तरम् ।

---

* अष्टशतं - १०८ * त्रिः - ३, षष्ठि - ६

गत्वोद्ध्र्ववाहवोभीता विशस्त्रास्त्यक्तभूषणाः ॥
चिन्तयित्वैकमनसस्तुष्टुवुस्ते पितामहम् ।
प्रदुर्भूयाऽव्रवीद् ब्रह्मा कुतो वोभयमागतम् ॥
उचुः प्राञ्जलयोदेवा ब्रह्माणं जगतः पतिम् ।
अस्त्रयुद्धं दितिसुतैरस्माकमति दारुणम् ॥
उद्विग्नमनसो देवा विद्रुतास्ते यतस्ततः ।
नाऽशक्नुवन् दिवि स्थातुमसुरैरतितापिताः ॥
स्यात् कथं बलमस्माकं ? द्विषत्प्राणविपर्य्ययम् ।
कुरुष्व सत्वरं ब्रह्मन् ! इत्युक्त्वा शरणं गताः ॥
विचिन्त्य भगवान् देवो ब्रह्मलोकपितामहः ।
तपस्तप्त्वा श्रुतीः सम्यग् विचार्य्य च पुनः पुनः ॥
अथर्वभ्यः समुत्कृष्य शान्त्यादीनि ससर्ज सः ।
सात्विकाच्च शान्तिं पुष्टिं, राजसाद् यः स मोहने ॥
स्तम्भनोच्चाटने चैव मारणं रोगसंप्लवम् ।
ससर्ज भगवान् ब्रह्मा तामसाद् वाक्यसंचयात् ॥
तमः स्वभाववाक्यानि समालोच्य प्रजापतिः ।
यतः ससर्ज तां देवीमथर्वाङ्गिरसश्रुतेः ॥
अथर्वा दुहिता तस्माल्लोके सा ख्यातिमागता ।
ततोऽङ्गिरसमाहूय प्रजापतिरुवाच ह ॥
कुरुष्वाऽवहितो भूत्वा देवानां प्रतिसाधनम् ।
उपदिश्यमहामन्त्रं कटुकादि पदादिकम् ॥
स्वरवर्ण्णार्थसंयुक्तं दक्षकर्ण्णसमागतम् ।

आसुरीमन्त्रस्य ऋष्यादिन्यासः -

अङ्गिराः स्याद् ऋषि स्त्रिष्टुप् छन्दश्च परिकीर्त्यते ॥
तमोन्विता महारौद्री कालशक्तिस्तु देवता ।
वदन्ति वीजमोङ्कारमाऽऽपोवै शक्तयो मताः ॥
वर्ण्णोऽसितो स विज्ञेयोऽन्तरीक्षं स्थानमुच्यते ।
जीवो माया समाख्याता कामः कीलो निगद्यते ॥

उमा स्यात् प्रकृतिः दुर्गाऽधिष्ठात्री देवता मता ।
हृदयादि षडङ्गानि यथा शास्त्रं प्रयोजयेत् ॥
असुरेभ्यो यतः पूर्वं योजिता त्रिदशैरियम् ।
आसुरीति ततो देवी राजकर्मसु गीयते ॥

मन्त्रः - ॐ नमः कटुके ! कटुकपत्रे ! इत्यादि -
शान्त्यादिषु प्रयोगेषु विशेष उपदिश्यते ।
स्वाहाकारस्य मन्त्रान्ते फट्कारो वै प्रयुज्यते ॥

कर्मस्थानम् - नदीतीरे पर्वताग्रे स्वयम्भूसन्निधौ तथा ।
पश्चिमद्वारप्रासादनिकटे गुप्तपाठके ॥
हिमवत् प्रदेशे पुण्येऽथवाऽरण्येऽम्वुसन्निधौ ।
तिथिनक्षत्रयोगेषु करणसद्ग्रहादिषु ॥
आरभेत शुभेष्वादौ सम्भारकृतसञ्चयः ।

कर्मारम्भः - वासोभिर्भूषणैश्चित्रैर्गन्धमाल्यानुलेपनैः ॥
संकल्प्य प्रथमा वृत्तिं वृणुयाद्धोमकारिणौ ।
आचार्य्यं वृणुयात् पूर्वं ब्रह्माणं तदनन्तरम् ॥
सुस्थनियममास्थाय देशकालै विमर्षयेत् ।
उद्रिक्तवैर आर्त्तस्तु न मुहूर्त्ततिथिक्रमम् ॥
देशं वाऽपेक्षयेत् पूर्वसेवां वा फलसिद्धये ।
मितादिलोकपालान्तं यथादेशं प्रपूजयेत् ॥
प्रत्यहं तूभयं (त्वभयं) कर्म कर्त्तव्यं शान्तिनाऽब्जिषु ।

मूर्त्तिगठनम् - आसुरीभिः सुपिष्टाभिरुदकैराकृतिं रिपोः ।
दलेष्वर्कस्य कुर्वीत करवाहु प्रमाणिकाम् ॥

प्रादेशमात्रहृदयां - अङ्गुष्ठस्य प्रादेशिन्या व्यासः प्रादेशः ।
वितस्तिविहितोदरीम् - द्वादशाङ्गुलपरिमाणे वितस्तिः ।
रत्निमात्रमृजुगलां - वद्धमुष्टिहस्तपरिमाणे रत्निः ।
नवाङ्गुलितमस्तकां, रिपोराकृतिं कुर्य्यात् ।

वि.द्र. - अमरकोषे - तर्जन्यङ्गुष्ठयोः विस्तारः प्रादेशः । अङ्गुष्ठकनिष्ठा-

ङ्गुल्योः विस्तारः वितस्तिः । द्वादशाङ्गुलः मुष्टिवद्धहस्तं सरत्निः ।
कनिष्ठाङ्गुलिभिन्नः मुष्टिवद्धहस्तम् अरत्निः ॥
करवाहु प्रमाणिकाम् - स्कन्धदेशादारभ्य अङ्गुल्यग्रं यावत् प्रति-
कृतिम् इत्यर्थः ।

प्राणान् सम्यक् प्रतिष्ठाप्य याम्याशाकृतमस्तकाम् ।
कनकध्वजखड्गेन छिन्द्यात् कर्मसु कौशलात् ॥
नक्षत्रकल्पविधिना, संक्रुद्धो मुक्तमस्तकः । आचार्य्यः ।
हुत्वा विभीतकसमित् कुर्य्यात् तु द्वादशाऽऽहुतिः ॥
साज्यं कटुकतैलेन, हुनेत् प्रतिकृर्ति ततः ।
१ - लाङ्गलीकल्कसंयुक्तैर्लवणैरासुरीफलैः ।
देशिनी मध्यमाङ्गुष्ठपर्वद्वितीयवर्त्तिभिः ॥ (तर्जनी)
सप्ताहमेवमावर्त्य द्वितीयेऽन्यदथोच्यते ।
२ - समिधोऽर्कस्य होतव्यस्तत्क्षीरेण फलाञ्जनम् ।
३ - भल्लातकस्य समिधस्तृतीये च फलेत्वचः ।
४ - शेफालिकां चतुर्थे च फलहोमस्त्वचा सह ।
५ - पञ्चमे करञ्जशमी फले संमिश्रयेत् त्वचः ।
६ - करवीर शमी षष्ठे त्वचा च फलमिश्रणम् ।
षडावृतेस्तु संपूर्णे द्वाचत्वारिंदिनान्तरे ॥
स्थण्डिलोक्तविधानेन स्थापयित्वा हुतासनम् ।
शान्त्युदकं शालायां त्रिः पर्य्युक्ष शान्तिवाचनैः ॥
दिक्पालेभ्यो जुहुयाद् यद् यथा मन्त्रेण शान्तया ।
तिलैर्धान्यैर्यवैर्माषैः घृताक्तैर्बलिमाहरेत् ॥
तद्वत् प्रतिकृर्ति कृत्वा दग्ध्वाऽऽच्छिद्य च पूर्ववत् ।
पादादिनवकं कृत्वा तेनैव ममुना सुधीः ॥
शिरोऽञ्जलौ समाऽऽदायाऽऽसुरीफल समायुतम् ।
नारिकेलान्वितं स्थित्वा हुनेत् पूर्णाहुर्ति ततः ॥
ब्रह्मादिनानुवाकेन योजयित्वा महामनुम् ।

वि. - ऋष्यादिन्यासपूर्वकम् आसुरीमहामन्त्रमित्यर्थः । अनेन मन्त्रेण प्रतिमायाः शिरः नारिकेलयुतं पूर्णाहूतिरूपेण अग्नौ हुनेत् ।

अग्नेः - ततः विसर्जयेद् वह्निं पुष्पाञ्जलित्रयं ददेत् । (दद्यात्)

प्रार्थना - उद्रिक्त सत्वः प्रबलोऽभिकाङ्क्षितरिपुश्रियम् ॥
क्षिप्रं यमपुरं यातु जातवेदो नमोऽस्तुते ।
आरोग्यमायुरैश्वर्य्यं शक्तिं मे प्रयताश्रियम् ॥
लभतां यजमानोऽसौ हुताशनो नमोऽस्तुते ।
कर्मसिद्धिं श्रियं मेधां प्रज्ञां सद्वृत्तिमुत्तमाम् ॥
प्रयच्छ भगवन्नग्ने ! यज्ञमूर्त्ते ! नमोऽस्तुते ।
ततो भगवर्ती देवीं पूजयित्वा विसर्जयेत् ॥

प्रार्थना - सृष्टिस्थिति विनाशेषु रजस् सत्वतमोमयि ।
त्वमेव व्याप्नुषे देवि ! सनातनि ! नमोऽस्तुते ॥
शान्ता रौद्रा महासौम्या सर्वकामफलप्रदा ।
मायाशक्तिर्मोहिनी त्वं नमस्तुभ्यं महेश्वरि !
देहि मे कर्मणां सिद्धिं यजमानस्य काङ्क्षितम् ।
त्रायस्व विपदः शत्रोः त्वामस्मि शरणं गतः ॥
ततोऽभिषिक्तः नृपतिर्दद्याद् विप्राय दक्षिणाम् ।
रत्नं सुवर्ण्णं धान्यानि यानानि च वसुन्धराम् ॥
दद्यात् भूमिपतिः प्रीत्या दक्षिणा भूतिमिच्छता ।
प्रथमे तेजसो नाशो द्वितीये बलसंक्षयः ॥
तृतीये निधनं शत्रोस्त्रिस्रः कुर्य्यात् तदाऽऽवृतीः ।
त्रिगुणं त्रिगुणी कुर्य्याद् यदि स्याद् दूरतः फलम् ॥
कटाक्षतो महालक्ष्म्याः फलान्याशु भवन्ति हि ।
महाशान्तिचतुष्टयं कुर्य्याद् इत्थं समादरात् ॥
ऐन्द्री च पार्थिवी चैवाऽभयाचामुक कीर्त्तिताः ।
आङ्गयाङ्गिरसो भूत्वाऽऽचार्य्यो वशिष्ठ एव हि ॥
ब्रह्मा च वामदेवश्च चक्रतुः कर्मसिद्धये ।

वि. द्र. - अङ्गिरसः आज्ञया वशिष्ठः आचार्य्यः वामदेवश्च ब्रह्मा ।
विजयस्तेन देवानामभवत् सर्वतोमुखः ।
निर्जिता दितिजा भीता विद्रुताश्च दिगन्तरम् ॥
॥ इत्याऽऽसुरीविधानकल्पः ॥

* अथ आसुरीकल्पः *

अथात आसुरीकल्पमुपदेश्यमथर्वणाम् ।
यस्य तिथिर्न नक्षत्रं नोपवासो विधीयते ॥
घृतादि सर्वद्रव्येभ्यो आसुरी शतजापिता ।(भाविता)
पादाद्यवयवः स्याद् या राजिकैषामुपादिनी ॥
हन्तुकामस्त्वमित्रांश्च वशीकुर्वंश्च भूपतीन् ।
आसुरीं सूक्ष्मपिष्टान्तामाकृतिं जहुयाद् वुधः ॥
अर्कैर्धसाऽग्निं प्रज्वाल्य च्छित्वाऽस्त्रेणाऽऽकृतिं ततः ।
पादां गतोऽष्टसाहस्रं जुहुयाद् वशकर्मणि ॥
घृताक्तया स्त्रीवश्याच पालाशाऽग्नौ द्विजोत्तमाः ।
गुडाक्तया क्षत्रियास्तु वैश्यास्तु दधिमिश्रया ॥
आसप्ताहात् सर्व एव आसुरीहोमतो वशाः ।
कटुतैलेन त्रिसन्ध्यं कुलोत्सादं करोति हि ॥
शुर्नी तु लोमभिः सार्द्धमपस्मारी त्रिभिर्दिनैः ।
निवृत्तिः क्षीरसर्वाजैः लवणेन तु सज्वरी ॥
अर्कैर्धसा समिद्धाऽग्नौ पुरविस्फोट सम्भवः ।
तेषामुपशमं विद्यात् सुरेश्वर्य्या घृतेन च ॥
अर्कक्षीराक्तयाऽर्काऽग्नौ अक्षिणी स्फोटयेद् द्विषः ।
शतायुमांसं तस्यैव निर्माल्यं चित्रभस्मतः ॥
एषां हृतेन (हुतेन) संस्पृष्टो ह्रस्यशीलोऽभिजायते ।
अजाक्षीराक्तजा होमास्तस्य मोक्ष विधीयते ॥
डगरं कुष्ठं मांसी च तस्याः पत्राणि चैव हि ।
एतैः श्लक्ष्णैस्तु संस्पृष्टः पृष्ठतः परिधावति ॥

तस्याः (जटामांस्याः) फलानि मूलानि रसरस हस्ती मेदसा ।
सूक्ष्मे तु द्रव्यसंस्पर्शादनुधावयते जनः ।
अच्छिद्रपत्राण्युपशा (मा) रं मुस्तकं सर्षपस्तथा ॥
एतच्चूर्णात् पूर्वफलम् एतेनैव पराजयः ।
कुसुमानि मनःशिला प्रियङ्गु .....पराणि च ॥ (पत्राणि च)
गजेन्द्रं मद संयुक्तं विकुर्वाणं वशीकुरु ।
याश्च स्त्रियोऽभिगच्छन्ति ता वश्याः पादलेपतः ॥
सपुष्पां तां समादाय अञ्जनं नागकेशरीम् ।
अनेन रञ्जिताऽक्षिभ्यां यं यं पश्येत् स किङ्करः ॥
अञ्जनं डगरं कुष्ठं देवीजं काष्ठमेव वा ।
मांसी च सर्वभूतानां सौभाग्यं स तु कारणम् ॥
तत् समिधां लक्षहोमाग्निधानं पश्यते महत् ।
सर्पिमध्यक्त पत्राणि वृद्धपत्रा सहस्रतः ॥
राज्यं तु लभतेऽवश्यं नृपा यान्ति सहस्रसः ।
हुत्वा स्वर्ण्ण सहस्राऽऽप्ति स्तत् पुष्पाणां तु लक्षशः ॥
सहस्र पादान्तद्दत्त उदये क्षीरलक्षिताः ।
वारि युक्तेतु कलशे क्षीरं पुनर्नवान् क्षिपेत् ॥
स्नानादलक्ष्मान् मुच्येत सौवर्ण्णे कलशेऽपि तु ।
विनायकस्य स्नानतो दौर्भाग्याच्चैव दुर्भगा ॥
पृष्ठतश्चाऽनुधावति संस्पृष्ट उदकेन तु ।
उशीरं डगरं कुष्ठं मुस्तकं सितसर्षपाः ॥
हुतेनाऽभिमत स्तूर्ण्णमीश्वरोऽपि वशो भवेत् ।
न स्यात् तस्याद्रुतं किंचत् न चान्योपद्रवस्तथा ॥
नाऽनैश्वर्य्यं तस्य गृहे यस्य देव्याऽऽसुरीगृहे ।
॥ इति आसुरीकल्पः ॥

* अथ परविद्या निवारणम् *

पप्रच्छाङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
ब्रूहि मे भगवन् ! विद्यां परविद्या निवारणीम् ॥
अङ्गिरा उवाच - उपदेश्यामि विद्यां ते परविद्यानिवारिणीम् ।
यतः पुरस्कृता कृत्याऽप्युपन्मुखा स्यात्पराङ्मुखा ॥
प्रणवं पूर्वमुच्चार्य्य मायावीजं ततः परम् ।
ततो नमः पदं प्रोच्य कृष्णवासस् भवत्यपि ॥
ततः शतसहस्रस्य प्रान्ते स्यात् सिंहवाहिनि !
सहस्रवदने तस्मात् पदमेतदुदाहरेत् ॥
महाप्रवलेऽपराजिते ! प्रियङ्गिरे ! पदत्रयम् ।
परसैन्यात् परकर्म विध्वंसिनि ! समुच्चरेत् ॥
परमन्त्रोत्सादिनीतः सर्वभूतविमर्द्दिनि !
सर्वदेवान् निगद्याऽतो विध्वंसय वदेद्द्वयम् ॥
सर्वविद्या निगद्याऽतो निम्नोक्तवचनं वदेत् ।
कृन्तयद्वयमाभाष्य परमन्त्राणुंदीरयेत् ॥
स्फोटय स्फोटयेत्युक्त्वा ज्वलज्ज्वालेति पूर्वकम् ।
जिह्वे करालवदने ! प्रियङ्गिरे पुनर्वदेत् ।
क्लीं नमः पुनरोङ्कारः द्वात्रिंशच्छतवर्ण्णिकी ॥
भवेद् राज्ञां प्रियो मन्त्रः परकर्म निवारकः ।
ऋषिः स्यामहमेवाऽत्र छन्दोऽस्य स्यादनुष्टुतः ॥
देवी प्रत्यङ्गिरा नाम्नी परकर्मनिवारिणी ।
वीजं तु प्रणवोज्ञेयो माया शक्तिः प्रकीर्त्तिता ॥
विनियोगोऽस्य मन्त्रस्य परकर्मनिवारणे ।
मायया स्युः षडङ्गानि ध्यानमस्य निगद्यते ॥

वि. द्र. - एवमपि मन्त्रः भविष्यति -

ॐ माया ॐ नमः कृष्णवाससे, शतसहस्र सिंहवाहिनि ! सहस्रवदने ! महाप्रवले ! अपराजिते ! प्रियङ्गिरे ! परसैन्य विध्वंसिनि !

परकर्मविध्वंसिनि ! परमन्त्रोत्सादिनि ! सर्वभूततविमर्द्दिनि ! सर्वदेवान् विध्वंसय विध्वंसय, सर्वविद्याः कृन्तय कृन्तय, परमन्त्रान् स्फोटय स्फोटय, सर्वशृङ्खलास्त्रोटय त्रोटय, जलज्ज्वाल जिह्वे ! करालवदने ! प्रत्यङ्गिरे ! क्लीं नमः ॐ । अस्य मन्त्रस्य प्रयोगः परविद्या निवारणयन्त्रेऽपि भवति । तत्र पञ्चपद्मानि, एकस्मिन् कोषे भवन्ति । दलानि च एषां द्वात्रिंशदुत्तरं शतं अत्र द्वात्रिंशच्छत-वर्ण्णान्तं मन्त्रं पद्मदलेषु तथा ॐ माया कोषमध्ये लिखेत् ।

पूर्णोमन्त्रः - ॐ परविद्या निवारिणी मन्त्रस्य अङ्गिरा ऋषिः अनुष्टुप् छन्दः प्रत्यङ्गिरा देवता ॐमिति वीजं, माया शक्तिः कर्ली कीलकं, परकर्मनिवारणार्थे विनियोगः ॥ ॐ माया ॐ नमः कृष्णवाससें, शतसहस्र सिंहवाहिनि ! सहस्रवदने ! महाप्रवले ! अप्राजिते ! प्रियङ्गिरे ! परसैन्य परकर्मविध्वंसिनि ! परमन्त्रोत्सादिनि ! सर्वभूतविमर्द्दिनि ! सर्वदेवान् विध्वंसय विध्वंसय, सर्वविद्याः कृन्तय कृन्तय, परमन्त्रान् स्फोटय स्फोटय, सर्वशृङ्खलास्त्रोटय त्रोटय, जलज्ज्वाल जिह्वे ! करालवदने ! प्रियङ्गिरे ! (वा प्रत्यङ्गिरे) क्लीं नमः ॐ ।

ध्यानम् - कृष्णाभां कृष्णवसनां सहस्रमुखभीषणाम् ।
द्विसहस्रे भुजे तूच्चैः तावत्यस्त्राणि विभ्रतीम् ॥
त्रिभिः सहस्रैर्नयनैरीक्षमाणां प्रकोपनाम् ।
सिंहलक्षं समारुह्य परकर्मनिवृत्तये ॥
समुधतां महाकायां प्रशमनां जगत्त्रयम् ।
स्थितां विचिन्तयेदेतां परविद्यानिवारिणीम् ॥
पूजयेदासुरीपीठे तावन्त्यावरणानि च ।
अन्तरिष्ट्वा वहिरिष्ट्वा जप्त्वा होमं समाचरेत् ॥
लाखैस्तिलैर्वा मध्वक्तैरयुतं जुहुयाद् वुधः ।
भयश्चिर प्रयोगेषु त्र्ययुतं वाऽयुतं हुनेत् ॥
एतन्मन्त्रं जपेन्मन्त्री होमाऽशक्तौ चतुर्गुणम् ।
द्विगुणं प्रजपेद् वाऽपि परविद्यां निवारयेत् ॥
य इमां प्रजपेत् विद्यां नित्यमष्टोत्तरं शतम् ।

दहेत् परकृतं कर्म तत्र पिण्डमिवाऽनलः ॥
तस्माद् राजा परित्यज्य सर्वमन्त्रं महामतिः ।
जपेदेतं महामन्त्रं परकर्मनिवृत्तये ॥
एतन्मन्त्रंसदा जप्त्वा (समाजप्य वा)
निश्चिन्तो राज्यभुग् भवेत् ।
॥ इत्याङ्गिरसे परविद्यानिवारणम् ॥

* अथ कालिका मन्त्रविधानम् *

कालिकायै नमो नमः । अष्टाक्षरैः अष्टाङ्गन्यासः ।
ॐ कालिकायै नमः । सप्ताक्षरैः सप्ताङ्गन्यासः ।
कालिकायै नमः - षडक्षरैः षडङ्गन्यासः ॥
पप्रच्छाङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
कालिका देवता प्रोक्ता, द्वयोः 'कां' वीजमुच्यते ॥
'मः' शक्तिर्विनियोगस्तु जय एव न संशयः ।
षड्भिः वर्णैः षडङ्गानि मन्त्रयोरुभयोरपि ॥

न्यासः - शिरो वदन हल्लिङ्ग जानुपादतलं क्रमात् ।
प्रत्यक्षरं प्रविन्यस्य कालिकारूपवद् भवेत् ॥
मूलेन व्यापकं न्यस्य हृदये तां विचिन्तयेत् ।

वि. द्र. - मूलमन्त्रेण 'कालिकायै नमः' सर्वाङ्गन्यासः भवेत् ।

आद्या कृष्णा रक्तवस्त्रा खड्गपाशधरा भवेत् ।
अन्यां कृष्णां कृष्णगन्धमाल्यरक्ताऽम्वरावृताम् ॥
त्रिनेत्रां भीमवदनां मुकटेन्दुजटाधराम् ।
सर्वाऽलंकारदीप्ताङ्गीम् अधो द्विर्दोः सवीणिकाम् ॥
पद्गेति यदुरोचक्रं सुप्ते शत्रौ निवासिनीम् ।
सिंहविन्यस्त दक्षां घ्रीं दक्षिणोद्विक्रमादभुजाम् ॥
डम्वरु प्रज्वलद् खड्गकर्त्तितावरधारिणीम् ।
वामे तु पाशचषक नृमुण्डाऽभयशोभिनीम् ॥
उपासकाय जयदां कालिकां चिन्तयेत् पराम् ।

अन्तरिष्ट्वा जपेन्मन्त्रं जयकामो यथाविधि ॥

शक्तयः - प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनीमता ।
सुप्रभा विजया सर्वसिद्धिदा नवशक्यः ।
कालिका पाठाय नमः, पाठमन्त्रो निगद्यते ॥
केशरेऽङ्गानि पूज्यानि दले ब्रह्मादयो मताः ।
दिक्पलांश्च दलान्तेषु तदस्त्राणि दलाद् वहिः ।
कालिकां पूजयित्वाऽत्र नरो विजयमश्नुते ॥

वि. द्र. - अष्टदलपद्मो परि एषा पूजा भविष्यति ।
अयुतं जुहुयाल्लाजै र्घृताक्तैर्जयकाङ्क्षया ॥
घृतेन जुहुयाद् वाऽपि सहस्रं वा त्वरा यदि ।
॥ इत्याङ्गिरसे षडक्षर कालिका मन्त्रविधिः ॥

अथातः कालिकामन्त्रमभिधास्याम्यतोऽनघ !
यत् प्रसादान्नृपः शत्रुमजेयं (मजय्यं) जेतुमीश्वरः ॥
प्रणवाद्यं नमः प्रान्तं मध्ये स्यात् कालिकापदम् ।
सप्तवर्णाऽऽत्मकोऽयं हि मन्त्रो विजयसाधकः ॥
निरोङ्कारो द्विर्नमोऽन्तो मन्त्रो वाऽष्टाक्षरो भवेत् ।
ऋषिर्वशिष्ठ एवाऽऽस्य छन्दोऽनुष्टुप् प्रकीर्त्तितम् ॥
कालिका देवता प्रोक्ता या खड्गैकेन निवासिनी ।
माया शक्तिः ध्रुवोवीजं विनियोगो जयो भवेत् ॥
मायया स्युः षडङ्गानि प्रणवं मूर्द्धिन विन्यसेत् ।
का ललाटे लि वदने हृदिकायै च नाभितः ॥
न लिङ्गे च म आधारे मन्त्री प्रत्यक्षरं न्यसेत् ।
न कारोऽष्टाक्षरे तूर्वोः पादयोर्म इति न्यसेत् ॥

वि. द्र. - सर्वत्र मायाशब्देन पूर्णोमन्त्रः गम्यते । अतः अत्राऽपि कां वीजं, मः शक्तिः, पूर्ववत् भवेत् । अष्टाक्षरमन्त्रे मूर्द्धानं विहायाऽऽधारं यावत्, तथा सप्तमाक्षरे 'न' ऊर्वोः, शेषे तु ' मः' पादयोरिति ।

कार्लीं कृशोदरीं दंष्ट्रजिह्वां भीमोद्ध्वर्मूर्द्धजाम् ।
पिङ्गत्रिनयनां कालमाला रक्तानुलेपनाम् ॥
चिन्तयेदसिनाकण्ठे प्रहरन्तीं रणे रिपुम् ।
एवं कृत्वा तत्र खड्गे कालिकां प्रतिपूजयेत् ॥
अनेन विधिना खड्गसहस्रमभिमन्त्रयेत् ।
गव्येन सर्पिषा तावन्जुहुयाज्जयसिद्धये ॥
सप्ताहं त्र्यहमेकाहमथवा कर्म कारयेत् ।
ततस्तं खड्गमादाय राज्ञे दद्याज्जयार्थिने ॥
राजन् ! खड्गमुपाधत्स्व त्वमनेन रिपुं जय ।
एतद् ग्रहणमात्रेण विद्रवन्ति तवाऽरयः ॥
विधिना खड्गमादाय यावद्दूरं नृपो भवेत् ।
रिपवः प्रतितिष्ठन्ति तावद्योद्धुं समुद्यताः ॥
एतं मन्त्रं सदाजप्त्वा विजयी स्यान्नृपो रणे ।
॥ इत्याङ्गिरसे कालिका मन्त्रविधानम् ॥

* अथ धनुषः मन्त्रणविधिः *

अथाऽतो जयकामस्य नृपतेर्जयकाङ्क्षया ।
धनुर्मन्त्रविधिं वक्ष्ये निर्वलोऽपि जयार्थकम् ॥
धन्वना गा ह्या मन्त्रः पितेव नृपतेर्हितः ।
यन्मन्त्रितधनुर्योगाद् रिपुं जयति दुर्जयम् ॥

मन्त्रः - ॐ धन्वना गा धन्वनाऽऽजिं जयेम, धन्वना तीव्रास्समदोजयेम ।
धनुश् शत्रोरपकामं कृणोतु धन्वना सर्वाः प्रदिशो जयेम ।*

ऋष्यादि न्यासः - ऋषिर्वशिष्ठो निर्दिष्टश्छन्दस्त्रिष्टुप् उदाहृतम् ।
प्रोक्ताः स्युर्देवता स्तिस्रः ब्रह्माविष्णुमहेश्वराः ॥
प्रणवोवीजमित्याहुः स्वाहा शक्तिः प्रचक्षते ।
सर्वदिग्विजये राज्ञो विनियोगो वदन्ति च ॥
धन्वना गा जयेमेति हृदयं कथयन्ति च ।

* १५-१०-२ पैः संहिता

धन्वनाऽऽजिं जयमेति शिरः प्रणिगदन्ति च ॥
धन्वना तीव्रास्समदो जयेमेति शिखां विदुः ।
धनुश् शत्रोरपकामं कृणोतु कवचं जगुः ॥
धन्वना सर्वाः प्रदिशो जयेमेति च नेत्रकम् ।
अस्त्रं सर्वेण मन्त्रेण षडङ्गान्यस्य मेनिरे ॥

प्रत्यक्षरन्यासः - शिरो ललाटदृक्कर्ण्ण नासाऽऽस्य चिवुकेष्वपि ।
कण्ठे च स्कन्धयो र्वाहुद्वितये सन्धिपञ्चके ॥
हृदये स्तनयोः कुक्षौ नाभौ लिङ्गे च मुष्कयोः ।
आधारे च गुदे चांघ्रेः प्रत्येकं सन्धिपञ्चके ॥

वि. द्र. - मन्त्रे चतुश्चत्वारिंशदक्षराणि सन्ति, ४४ स्थानेष्वक्षरन्यासः । एवं प्रत्यक्षरं न्यस्य ब्रह्मा विष्णुः शिवः स्वयम् । सर्वेण व्यापकन्यासो ध्यानमस्याऽभिधीयते ।

ध्यानम् - चतुरास्योऽरुणो ब्रह्मा दण्डं कमण्डलुं वरम् ।
अक्षसूत्रं दधद् यज्ञोपवीतीत्वं सनोऽवतु ॥
खड्गचक्र गदापद्मधरस्तार्क्षेस्थितोऽच्युतः ।
पञ्चास्यो जटिलः श्वेतः भस्मलिप्तशरीरिकः ॥
मृगपर्शुवराऽभयं विभ्रद् एति वृषे शिवः ।
योद्धुं जिगमिषुर्यात्रादिनात् पूर्वं विचक्षणः ॥
ब्रह्माविष्णुशिवानेतान् राज्ञो धनुषि पूजयेत् ।
सहस्रमभिमन्त्र्येदं सहस्रं सर्पिषा हुनेत् ॥
सप्ताह्नं वा त्र्यहं वाऽपि एकाऽहं वाऽपि कारयेत् ।
मन्त्रितं धनुरादाय नृपतिर्यदि गच्छति ॥
दिशो दश जयत्येषः नाऽस्याऽरिःपुर आव्रजेत् ।
पुरा दिग्विजयं कर्तुं दिलीपाद्याः क्षितीश्वराः ॥
पुरोधसा वशिष्ठेन कर्मेदं चक्रिरे महत् ।
ततो दिग् विजयं चक्रुः निर्विघ्नं ते नृपोत्तमाः ॥
एवं क्रमेण यो राजा धनुरर्च्चनपूर्वकम् ।

प्रयाति धनुरादाय जयत्येषः दिशोदश ॥
धनुश् शक्त्या पलायन्ते पुरो नाऽऽयान्ति शत्रवः ।

॥ इत्याङ्गिरसे कल्पे धनुर्मन्त्रणविधिः ॥

* अथ शरमन्त्रविधिः *

अथातः शरमन्त्रस्य विधिं वक्ष्यामि संप्रति ।
विजीगीषुरनुष्ठाय येन शीघ्रं जयत्यरिम् ॥
विद्मा शरस्य मन्त्रस्य प्रजापतिर्भवेदृषिः ।
छन्दोऽनुष्टुप् समाख्यातं पृथिवी देवता स्मृता ॥
प्रणवं वीजमित्याहुः स्वाहा शक्तिरुदाहृता ।
विनियोगो रिपुजये नृप एवाऽधिकारिता ।
पादैश्चतुर्भिः सर्वैश्च पश्चाङ्गानि प्रकल्पयेत् ॥
अनुष्टुप् मन्त्रराजस्य रीत्या प्रत्यक्षरं न्यसेत् ।
व्यापकं विग्रहे न्यस्य पृथ्वीं वीजं च चिन्तयेत् ॥
अन्तरिष्ट्वा मनुं जप्त्वा पूजां कृत्वाऽथ होमयेत् ।
सहस्रं सर्पिषा हुत्वा शरसं पातमानयेत् ॥
सहस्रं मभिमन्त्र्येमं नृपहस्ते विनिक्षिपेत् ।
जयं प्रेहीति मन्त्रेण नृपं प्रस्थापयेद् वुधः ॥
ततो राजा व्रजेन्नत्वा रिपुं जयति नाऽन्यथा ।
मन्त्रितं कार्मुकं वाणमुपादाय महीपतिः ॥
सुराऽसुरौ जयत्येव का कथा मनुजाऽधिपे ।
मन्त्रः - ॐ विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम् ॥
विद्मोह्यस्य मातरं पृथिवीं विश्वधायसम् ।*

॥ इत्याङ्गिरसे शरमन्त्रः ॥

* पै. संहिता - का १ / २ सूक्तम्

* अथ ग्रहशान्तिविधिः *

पिप्पलादः उवाच - भगवन् ! विपदः पुंसां कथमायान्त्यचिन्तिताः ।
प्रतिकारान् कथं तासां भवेद् ब्रूहि मम प्रभो !

अङ्गिरा उवाच - ग्रहाणां वैपरीत्येन विपदः प्रभवन्ति हि ।
ग्रहशन्ति विधिस्तत्र प्रतिकाराय जायते ॥

पिप्पलाद उवाच - भगवन् ! सर्वधर्मज्ञ ! सर्वप्राणीहिते रतः ।
ग्रहशान्तिविधिं ब्रूहि तुष्टाः स्युर्येन वै ग्रहाः ॥

अङ्गिरा उवाच - ग्रहशान्ति विधिं वक्ष्ये सर्वप्राणीहितेच्छया ।
येन यान्त्यनुकूलत्वं प्रतिकूला अपि ग्रहाः ॥
प्रतिकूला ग्रहा यस्मात् सर्वाऽनिष्टविधायकाः ।
तस्माद् राजा विशेषेण ग्रहशान्तिं समाचरेत् ॥
सौवर्ण्णैः प्रतिमाः कार्य्याः शतमाढविनिर्मिताः ।
तासु पूजां प्रकुर्वीत स्वस्व मन्त्रैविधानतः ॥
प्रतिकूलान् ग्रहान् तत्र (ग्रहांस्तत्र) पूजयेदति यत्नतः ।
रक्तार्कस्य सितार्कस्य मधुकस्य वटस्य च ।
औदुम्वरस्य शम्याश्च अश्वत्थ पर्ण्ण* वर्हिषाम् ॥

पुःसर्वस्वे - ग्रहाणां समिधस्त्वेताः क्रमशः श्रुतिचोदिताः ।

ग्रन्थे तु - अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः ॥
औदुम्वरशमीदूर्वा कुशाश्च समिधः क्रमात् ।

वि. द्र. - सूर्य्यस्य रक्तार्क समित्, चन्द्रस्य श्वेतार्क समित्, मङ्गलस्य मधुक-समित् (महुल) वुधस्य वट समिद्, वृहस्पतेः औदुम्वर समित्, शुक्रस्य शमी समित्, शनेः अश्वत्थः, राहोः दूर्वाः, केतो कुशसमित्, किन्तु पुरोहितसर्वस्वानुसारं पृथक् पृथक् वर्त्तते ॥

समिद्भिराद्यैश्चतुर्भिः प्रत्येकहोममाचरेत् ।
सहस्रं प्रतिकूलानां इतरेषां शतं शतम् ॥

* पर्ण्ण - दूर्वा

ततः पूर्णाहूर्ति कुर्य्याद् अभिषेकं ततः परम् ।
ऋत्विजे दक्षिणां दद्याद् यथा शास्त्रविनिश्चिताम् ॥
गावो गावो वृषः स्वर्ण्णं धेनुरश्वश्च दासिका ।
खड्गश्छागी क्रमेणैता दक्षिणा ग्रहशान्तिषु ॥
य एता कुरुते यत्नाद् ग्रहशान्तिं विधानवित् ।
तस्य सर्वा विनश्यन्ति ग्रहपीडाश्च दारुणाः ॥
॥ इत्याङ्गिरसे ग्रहशान्तिविधिः ॥

* अथ प्रायश्चितार्थं विज्ञानभैरवपूजनविधिः *

पिप्पलाद उवाच - षट्कमाण्युपदिष्टानि यानि पापकराणि मे ।
कृत्वा तानि कथं पापान् मुच्येऽहं तद्वद प्रभो !
अङ्गिरा उवाच - नाना पापानि संपाद्य यत् प्रसादाद् विमुच्यते ॥
तमहं ते प्रवक्ष्यामि मन्त्रं त्रैलोक्य दुर्लभम् ।
विज्ञानभैरवो मन्त्रं विज्ञानैकफलप्रदः ।
स सर्वपापं संदह्य ज्ञानमेव प्रयच्छति ॥
ज्ञानं न प्राप्यते क्वाऽपि शिवस्योपासनं विना ।
शिवं भैरवमित्याहुः पापेभ्योऽभयदायकम् ।
तस्मादेषः महामन्त्रः सर्वपापप्रणाशकः ॥
प्रक्षीणपाप्मने पुंसे ज्ञानं च प्रददात्यसौ ।
तस्मादमुं महामन्त्रं पिप्पलाद ! जपाऽनिशम् ॥
षट्कर्म जनितात् पापान्मोक्षसे नाऽत्र संशयः ।
ब्रह्महत्या सुरापानं स्वर्ण्णस्तेयं प्रसूगतिः ॥
एतान्यपि विनश्यन्ति षट्कर्मजनितं न किम् ?
विज्ञानभैरवं जप्त्वा सर्वपापाद् विमुच्यते ।
पिप्पलाद उवाच - विज्ञानभैरवमन्त्रः कीदृशः किं विधिः स च ?
तमिमं मे महामन्त्रं भगवन् ! कृपया वद ॥
अङ्गिरा उवाच - देवाह वै रुद्रलोकं गता रुद्रदिदृक्षया ।
उपगम्याऽथ तं रुद्रं नमस्कृत्य पुनः पुनः ॥

ते तत्र परिपप्रच्छुः को भवान् इति शङ्करम् ।
सर्वाऽऽत्मकत्वञ्च स्वस्य कथयमास शङ्करः ॥
ततः स दूरतो गत्वा पुनः प्राह विशेषतः ।
सर्वस्वरूपतां स्वस्य तेजसाऽन्तर्दधे विभुः ॥
ततस्ते ध्यायमानं तं तुष्टुवुः सकलाः सुराः ।
स प्रीतमनसा तेभ्यो मन्त्रमेक मभाषयत् ॥
विज्ञानभैरवो योऽसौ विज्ञानैक फलप्रदः ।
जपद्भिस्तं महामन्त्रं चिन्तयेत् तं सदाशिवम् ॥
एतैः साक्षात्कृतो देवो भैरवो लोकभैरवः ।
अखण्डः सर्वदाऽऽनन्दः सर्वमोहाऽन्त एककः ॥
ते च ते सैन्यमाजग्मु स्तेऽमृतं चैव लेभिरे ।
अथास्य मन्त्रराजस्य विधिं वक्ष्यामि तत्त्वतः ॥
मन्त्रः - ॐकारं पूर्वमुच्चार्य्य व्याहृतित्रयमुच्चरेत् ।
ततः स्वाहां समाभाष्य निगदेज्जनदोमिति ॥
दशाऽक्षरो महामन्त्रः स्वप्रादुर्भावदायकः ।
ॐ भूः भुवः स्वः स्वाहा जनद् ॐ । दशाक्षरमन्त्रः ।
ऋषयस्तु सुराः सर्वे विराट् छन्द उदाहृतम् ।
विज्ञानभैरवो रुद्रो देवताऽस्य निगद्यते ॥
प्रणवो वीजमेतस्य स्वाहा शक्तिः प्रकथ्यते ।
विनियोगोऽस्य मन्त्रस्य स्वाऽऽत्मतत्त्वप्रकाशने ॥
न्यासः - प्रणवो हृदयं ज्ञेयं शिरोभूरिति गीयते ।
शिखाभुव इति प्रोक्ता कवचं स्वरिति स्मरेत् ॥
स्वाहा नेत्रत्रयं ज्ञेयं जनदो अस्त्रमुच्यते ।
मस्तके च ललाटे च मुखे कण्ठे उरस्यपि ॥
उदरे च तथा गुह्ये उर्वो र्जान्वोः पदद्वये ।
एवं प्रत्यक्षरं न्यस्य रुद्ररूपी स्वयं भवेत् ॥
ध्यानम् - ध्यायेत् प्रसन्नगम्भीरं स तेजोन्नतमस्तकम् ।

अनाख्यमनभिव्यक्तं सच्चिदानन्दलक्षणम् ।
सहस्रं वा शतं वाऽपि नित्यमेव जपेद्द्विजः ॥
वत्सराद् ज्ञानसिद्धिः स्याच्छिवोक्तं नाऽन्यथा भवेत् ।
न यमः नियमः कश्चिन्न पुरश्चरणं भवेत् ॥
न सिद्ध्यादि विचारं स्याद् द्रुहिणोक्तमिदं वचः ।
विज्ञानभैरवस्यार्थः कथ्यते ज्ञानसिद्धये ।
मन्त्रार्थः - ॐकारः सोऽहमर्थः स्यात् त्रिलोकी व्याहृतित्रयम् ॥
स्वाहा तन्मयिहोमः स्यात् प्रादुर्भावो जनः स्मृतः ।
प्रादुर्भावं च यो दत्ते जनदः स शिवः स्वयम् ॥
ॐकारः शिवतादात्म्यं स्वस्य जीवस्य गायति ।
शिवोऽहं तत्र देवे च त्रैलोक्यं प्रणुदाम्यहम् ॥
स्वप्रादुर्भावदो रूद्रः सोऽहमस्मीति भावयेत् ।
दशमोऽसीति वाऽन्येन दशमोऽस्मीति भावयन् ॥
यथा दशमतां याति तथा याति भवः स्वयम् ।
अपामपाममृताय अभ्रम इति ह श्रुतिः ॥

॥ इत्याङ्गिरसे विज्ञानभैरवो मन्त्रः ॥

* अथ महाकृत्याविधिः *

अथेदानीं प्रवक्ष्यामि महाकृत्यामनोर्विधिम् ।
यतो युद्धं विना हन्याद् दुर्बलोऽपि महाबलम् ॥
मन्त्रः - ॐ खट् फट् हृदयं प्रोच्य वदेद् यद्विपदं ततः ।
महाकृत्ये ! पदं तस्माद् विधूमाग्निर्वदेत् ततः ॥
समप्रभे ! प्रणिगदेद्धन शत्रूनिगद्यते ।
त्रिशूलेनेति संभाष्य क्रुध्यस्वेति पुनः पठेत् ॥
पिवशोणितमुच्चार्य महाकृत्यां समुद्धरेत् ।
ऋषिरस्याऽङ्गिराः प्रोक्तश्छन्दोऽनुष्टुप् प्रकीर्तितम् ॥
देवता स्यान्महाकृत्या खड्गवीजं समुदाहृतम् !
फडित्येतद् भवेत् शक्तिः विनियोगोऽरिमारणे ॥

न्यासः - वीजं शक्तिश्च हृदयं जवीयान्मन्त्र उत्तमः ।
शिरो देवि ! महाकृत्ये ! शिखा द्वितीयपादकः ।
तृतीयपादः कवचं क्रुद्ध्यस्वेति त्रिनेत्रकम् ॥
पिवशोणितमित्यस्त्रं षडङ्गानि विदुः वुधाः ।

मन्त्रः - ॐ खट् फट् हृदयं अमुक विपदं मम शत्रून्नित्यादिः ।
महाकृत्ये ! विधूमाग्निसमप्रभे ! हननशत्रून् त्रिशूलेन क्रुद्ध्यस्व, पिवशोणितम् ।

ॐ महाकृत्यामन्त्रस्य अङ्गिरा ऋषिः अनुष्टुप् छन्दः महाकृत्या देवता खड्वीजं फट् शक्तिः अरिमारणे विनियोगः ।

षडङ्गन्यासः - ॐ खट् फट् हृदयं हृदयाय नमः । महाकृत्ये ! शिरसे स्वाहा, विधूमाग्निसमप्रभे ! शिखायै वषट्, हनशत्रून् त्रिशूलेन कवचायं हूं, क्रुध्यस्व नेत्रत्रयाय वौषट् । पिवशोणितम् अस्त्राय फट् ।

प्रत्यक्षरं न्यसेन मन्त्री नृसिंहाऽनुष्टुभे यथा ।
व्यापकं त्रिविधायैतां संचिन्त्य मनसाऽर्च्चयेत् ॥

ध्यानं - विधूमाग्निसमप्रख्यां सम्यक् क्रुद्धां रिपुं प्रति ।
महादंष्ट्रां महाविद्यां लम्वमानपयोधराम् ॥
मुक्तकेशीं रक्तवस्त्रगन्धमाल्यविभूषणाम् ।
कृशोदरीं लम्वकर्णीमतिसंरक्तलोचनीम् ॥
सद्यः कृन्तशिरोमाला रक्तधारोपशोभिताम् ।
ऋक्षशृगालगृध्राश्च डाकिनीभूतवेष्टिताम् ॥
महाकायां महाभीमां धावतीं गगनाऽङ्गणे ।
सिंहध्वनीं प्रकुर्वाणामरेः शूलेन वक्षसि ॥
निघ्नतीं दक्षहस्तेन वामहस्तस्थभाजने ।
रिपोः रुधिरधाराभिः पूर्य्यमाणां पुनः पुनः ॥
प्रवदन्तीं महाकृत्यां यतः प्राणो जपेन्मनुम् ।
लक्षसंख्यं महामन्त्री ततः होमं समाचरेत् ॥

वि. द्र. - नक्षत्रकल्पोक्तविधिना स्थण्डिलं विधाय महाकृत्या मन्त्रेण निम्नोक्तविधिना होमं कुर्य्यात् । विषचूर्णम् = महुराविष ।

विषचूर्णविमिश्रेण सर्पिषा लक्षसंख्यकम् ।
जुहुयाद्यत्नतो मन्त्री नाशयत्यचिरं रिपुम् ॥
होमाऽशक्तौ होमसंख्याद्विगुणं जपमाचरेत् ।
ततो रिपुविनाशः स्यान्नाऽत्र कार्य्याविचारणा ॥

अथ अन्यत् महाकृत्या विधानम् -

महाकृत्यान्तरं वक्ष्ये सर्वशत्रुविनाशनम् ।
मन्त्रः - प्रणवं पूर्वमुच्चार्य्य शक्तिः वीजं ततः परम् ॥
महायोगिनि ! संभाष्य वदेद् गौरीपदं ततः ।
समुद्धरेत् त्रिभुवनं ततः करि हूमित्यपि ॥
फडन्तोऽयं महाकृत्यामनुरष्टादशाऽक्षरः ।
अस्याऽङ्गिरा ऋषिर्देवी गायत्री छन्दरीरितम् ॥
सिंहवक्त्रा महाकृत्या देवता रिपुनाशिनी ।
प्रणवोवीजमेतस्य शक्तिः शक्तिरुदाहृतः ॥
मारणे विनियोगऽस्य प्रणवो हृदयं स्मृतम् ।
मयाशिरः (पूर्णमन्त्रः) समादिष्टं शिखा पञ्चाक्षरं तथा ॥
कवचं गौरि ! निर्दिष्टं नेत्रत्रयं षडक्षरम् ।
हुं फडस्त्रायफट् ज्ञेयं षडङ्गानीत्थमेवहि ॥

मन्त्रस्य न्यासः - ॐ अष्टादशाक्षर महाकृत्या मनोः अङ्गिरा ऋषिः, देवी गायत्री छन्दः, सिंहवक्त्रा महाकृत्या देवता ॐ वीजं, शक्तिः शक्तिः, ॐ हृदयं, मारणे विनियोगः ।

मन्त्रः - ॐ शक्तिः ॐ महायोगिनि ! गौरि ! त्रिभुवनङ्करि ! हूं फट्, अष्टादशक्षरमन्त्रः । ॐ हृदयाय नमः । ॐ माया शिरसे स्वाहा, ॐ महायोगिनि ! शिखायै वषट्, ॐ गौरि ! कवचाय हूम्, ॐ त्रिभुवनङ्करि ! नेत्रत्रयायवौषट्, ॐ हुं फट् अस्त्राय फट् ।

ध्यानम् - सिंहाननां कृष्णमुखीं लम्वमानस्तनीं पराम् ।

दंष्ट्राकरालवदनां त्रिनेत्रां सर्वतोज्ज्वलाम् ॥
कृष्णकञ्चुकसंयुक्तां विधूमाग्निसमप्रभाम् ।
त्रिशूलचक्र चषक खट्वाङ्गकरपङ्कजाम् ॥
लेलिहानां महाजिह्वां विद्युत्प्रेक्षणभीषणाम् ।
ध्यात्वा देवीं महाकृत्यां पूजयेन्मन्त्रवित्तमः ॥

पूजाविधिः - कृष्णाऽष्टम्यां प्रतिकृतिं मधूच्छिष्टेन कारयेत् ।
शत्रोर्लोमकेशनखैः समायुक्तां मनोरमाम् ॥
फट्कारान्तं रिपोर्नाम हृदि तस्याः समालिखेत् ।
साध्यप्राणान् प्रतिष्ठाप्य मरीचैर्लेपयेदिमाम् ॥
मृतब्राह्मण चाण्डालकेशान् तद् पादयोः क्षिपेत् ।
अधोमुखीं प्रवध नीयात् कारस्कर (तारस्कर) यतो रणे ॥
तस्याधो निखनेत् कुण्डं त्रिकोणं मन्त्रपारगः ।
जुहुयान्निम्वतैलाक्तं काकोल्लुकस्य पिच्छकम् ॥
द्रावयैनं द्रावयैनं शोषयेत्यभिधीयते ।
अष्टोत्तरशतं हुत्वा बलिं रात्रौ प्रकल्पयेत् ॥
नवरात्रं रिपोर्नाशं पुत्तलिनाशतोऽपि वा ।
होमाऽशक्तौ विधानेन मन्त्रवीजायुतं जपेत् ॥
ततोऽस्य म्रियते शत्रुर्निर्विचार्य्यमिदं वचः ।
आत्मोत्सादकरं शत्रुं युद्धे जेतुमपारयन् ॥
देशरक्षाकरो राजा मारयेद् बलिनं रिपुम् ।
अन्यथा न नृपोधीमान् मर्त्याकर्म समाचरेत् ॥
उद्देश्यो यजमानो वा कर्त्ता वा म्रियते यतः ।
तस्माद् विचारको राजा संशयं न प्रपद्यते ॥
पराजयमपि प्राप्य जीवन् भद्राणि पश्यति ।
नायेत् कुपिता कृत्या देवतां किमु भूपतिम् ॥

॥ इत्याङ्गिरसे महाकृत्याविधानम् ॥

* अथ कृत्यामन्त्रविधिः *

कृत्यामन्त्रविधिं वक्ष्ये रिपोराशु विनाशकम् ।
मन्त्रः - कृष्णवर्ण्णं ! समुच्चार्य्य वृहद्रूपि ! समाचरेत् ॥
वृहत्कर्ण्णि ! समाभाष्य महद्भयि ! पदं भवेत् ।
देवि ! द्वयमुदाहृत्य महादेवि ! ततः परम् ।
मम शत्रून् उच्चार्य्यान्ते विनाशय समुद्धरेत् ॥
कृत्यामन्त्रोऽयमाख्यातो द्वात्रिंशद् वर्ण्णमात्रकः ।
महाकृत्याविधानेन जपं होमं समाचरेत् ॥
न्यासः - अङ्गिरा ऋषिरुदिष्टश्छन्दोऽनुष्टुप् प्रकीर्त्तितम् ।
देवता स्यान्महादेवी कृत्या प्रागिव सम्मता ॥
विशेषः प्रणवो वीजं माया शक्तिः प्रकथ्यते ।
हृदयादीनि चत्वारि चतुर्भिः कुरुते पदैः ॥
तृतीयेन च पादेन नेत्रत्रयमुदाहृतम् ।
चतुर्थेन च पादेन तस्याऽस्त्रं परिकीर्त्तितम् ॥

मन्त्रः - ॐ कृष्णवर्ण्णि ! वृहद्रूपि ! वृहत् कर्ण्णि महद्भयि !
देवि ! देवि ! महादेवि ! मम शत्रून् विनाशय ।

अस्य मन्त्रस्य अङ्गिरा ऋषिः । अनुष्टुप् छन्दः । महादेवी कृत्या देवता । ॐ वीजं, माया शक्तिः, ॐ हृदयं, शत्रुमारणे विनियोगः । ॐ कृष्णवर्ण्णि ! हृदयाय नमः, वृहद् रूपि ! शिरसे स्वाहा, वृहद्कर्ण्णि ! शिखायै वषट्, महद्भयि ! कवचाय हूं, देवि ! देवि ! महादेवि ! नेत्रत्रयाय वौषट्, मम शत्रून् विनाशय अस्त्राय फट् ।

ध्यानम् - प्रतिसारविधौ ध्यानं यदुक्तं तदिह स्मरेत् ।
प्रत्यहं जपमात्रेण सर्वशत्रुक्षयो भवेत् ॥
प्रकटा वा निगूढा वा शत्रवो द्विविधा मताः ।
ते सर्वे प्रलयं यान्ति मन्त्रस्यास्य प्रभावतः ॥
तस्माद् राजा प्रयत्नेन कृत्यादेविं प्रपूजयन् ।
जपेदेतां महाविद्यां सर्वान् शत्रून् विनाशयेत् ॥

नित्यं संपूजिता येन तस्य प्रीता भवत्यसौ ।
परेण प्रेरिताऽप्येवं कदाचिन्नैव वाधते ॥
कृत्या पूजारतो राजा सदास्यादकुतो भयः ।
॥ इत्याङ्गिरसे कृत्या मन्त्रविधानम् ॥

* अथ कृत्याप्रतिसारविधिः *

सबन्धुश्चेत्ययं मन्त्रः शत्रुक्षयकरः परः ।
मन्त्रः - १. ॐ सबन्धुश्चासबन्धुश्च योऽस्माँ अभिदासति ।
सबन्धून् सर्वांस्तीर्त्वाऽहं भूयासमुत्तमम् ॥(पैः सं: ११/५)
२. ॐ सबन्धुश्चासबन्धुश्च यो न इन्द्राऽभिदासति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्मवर्म ममान्तरम् ॥ (१-२०/४)
३. ॐ सबन्धुश्चासबन्धुश्च यो जातो यश्च निष्ट्यः ।
यजमानाय सुन्वते सर्वं तं रीरधासि नः । (११/८)
वि. द्र. - मन्ये द्वितीयमन्त्रोऽत्र व्यवहर्त्तव्यः । ४र्थः मन्त्रः प्रथमो वा ॥
४. ॐ सबन्धुश्चासबन्धुश्च यो न इन्द्राऽभिदासति ।
वृश्चाम्या तस्याहं मूलं प्रजां चक्षुरथोबलं ॥ (१/ ६६)
न्यासः - अस्याऽङ्गिरा ऋषिः छन्दोऽनुष्टुप् कृत्या च देवता ।
तारो वीजं शक्तिरस्य माया संप्रोच्यते वुधैः ॥
महाकृत्याविधिर्यद्वत् तद्वदस्य विधिर्भवेत् ।
सबन्धुश्चेति हृदयमसबन्धुश्शिरो भवेत् ॥
योऽस्मान्निति शिखाज्ञेया कवचं त्वभिधासति ।
नेत्रं तृतीयपादेन चतुर्थेनाऽस्त्रमुच्यते ॥
सर्वेण व्यापकं न्यासः कृत्याध्यानं पुरोदितम् ।
विषचूर्ण्णयुतं सर्पिस्त्रिलक्षं जुहुयान्निशि ॥
होमाऽशक्तौ होमसंख्या द्विगुणं जपमाचरेत् ।
सबन्धुमसबन्धुम्वा रिपुं शीघ्रं विनाशयेत् ॥
शुक्रशिष्याः पुरा कृत्यां शक्रनाशाय चक्रिरे ।
ततोऽसौ लक्ष्ययामास कृत्याचिह्नानि वासवः ॥

ततोगुरुमुपागम्य तानि चिह्नानि पृष्टवान् ।
ततोऽसौ प्रणिधानेन कृत्याचिह्नान्यवुध्यत ॥
शुक्रान्मन्त्रं समादाय कृत्यां चक्रुः सुरद्विषः ।
एवं ज्ञात्वा गुरुः सम्यग् वासवाय न्यवेदयत् ॥
अथेन्द्रस्तद्वचः श्रुत्वा भयेनगुरुमब्रवीत् ।
केनोपायेन वै अस्मान् कृत्याकर्म न वाधताम् ॥
प्रत्युतोऽमून् शुक्रशिष्यान् कृत्येयं प्रतिवाधताम् ।
ततो वृहस्पतिः सम्यक् चतुर्वेदी व्यचारयत् ॥
भूयो भूयो विचार्य्याऽन्यामथर्वाङ्गिरसश्रुतिम् ।
प्रत्यङ्गिरसमन्त्रेषु मन्त्रमाद्यमवोधत ॥
कृत्यां कृत्याकृतं नेतुमयं शक्तो न चापरः ।
एवं विचार्य्य शक्राय यथावत् तं न्यवेदयत् ॥
तत इन्द्रस्तथा कृत्वा शुक्रशिष्यानमारयत् ।
ततस्त्वं पिप्पलादेमं मन्त्रराजं जपाऽनिशम् ॥
यत् प्रसादात् कृतं कर्म कर्त्तारं प्रतिगच्छति ।

मन्त्रः - ॐ अस्य श्रीप्रत्यङ्गिरास्तोत्रमन्त्रस्य वामदेव ऋषिः । अनुष्टुप् छन्दः, प्रत्यङ्गिरा देवता, ह्रीं वीजं, हूं शक्तिः, क्लीं कीलकं, सर्वार्थसाधने विनियोगः।

ॐ नमः शिवाय सहस्रसूर्य्येक्षणाय, ॐ अनादिरूपाय अनादि-पुरुषाय पुरुहूताय महामयाय महाव्यापिने महेश्वराय, ॐ जगत् साक्षिणे सन्तापभूतव्यापिने, महाघोराऽतिघोराय, ॐ ॐ महाप्रभावं दर्शय दर्शय, ॐ ॐ हिलि हिलि, ॐ हन हन ॐ गिलि गिलि ॐ मिलि मिलि, ॐ ॐ भूरि भूरि विद्युज्जिह्वे ! ज्वल ज्वल, प्रज्वल, प्रज्वल, धम धम, बन्ध बन्ध, मथ मथ, प्रमथ प्रमथ, विध्वंसय विध्वंसय, सर्वान् दुष्टान् ग्रस ग्रस, पिव पिव, नाशय नाशय, त्रासय त्रासय, भ्रामय भ्रामय, दारय दारय, द्रावय द्रावय, दर दर, विदुर विदुर, विदारय विदारय, रं रं रं रं रं रक्ष रक्ष त्वं मां साधकं मां पाठकञ्च रक्ष रक्ष हुं फट् स्वाहा ॥ श्रीप्रत्यङ्गिरास्तोत्रं द्रष्टव्यम् ॥

॥ इति कृत्याप्रतिसारविधिः ॥

* अथ षट्कर्म प्रतिसारविधिः *

पिप्पलाद उवाच - पप्रच्छाऽङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
त्वयोक्तं नाथ ! तत्वेन परविद्यानिवारणम् ॥
इदानीं श्रोतुमिच्छामि गूढाद्गूढतमं मनुम् ।
षट् त्वयोक्तानि कर्माणि वशादीनि मम प्रभो !
केन तान्येव कर्त्तारं गच्छन्ति तमिमं वद ॥

अङ्गिरा उवाच - साधु पृच्छसि मां शिष्टपिप्पलाद ! वदामि तम् ।
कर्माणां प्रतिसारोऽयं सुरैरपि सुदुर्लभः ॥
मया यत्नेन पृष्टेन ब्रह्मणा कथितं पुरा ।
कर्मणां वारणं कर्त्तुमस्ति कश्चित् क्वचिज्जनः ॥
तेषां प्रतिगतं कर्त्तुं न शक्तोऽन्यो महेश्वरात् ।
मन्त्रोऽपि सर्ववेदेषु न तादृक्विद्यते क्वचित् ॥
एकोऽप्यसौ महामन्त्रः षट्कर्मप्रतिसारकः ।
तमिमं ते प्रवक्ष्यामि सविधिं सादरं शृणु ॥

मन्त्रः - यानत्येति, यदेवाऽऽद्यं द्वितीयं कल्पयन्ति च ।
तृतीयं न इति प्रोक्तं चतुर्थमरयो भवेत् ॥
क्रूरां स्यात् पञ्चमं वाच्यं षष्ठं कृत्यामिति स्मृतम् ।
वधूं सप्तममुद्दिष्टमिवेत्यष्टममीरितम् ॥
नवमं तामिति ज्ञेयं दशमं ब्रह्मणेति च ।
अद्धेत्येकादशं विद्याग्निरिति द्वादशं मतम् ॥
कर्त्तारं पञ्चदशं त्वृच्छत्विति च षोडशम् ।
पदषोडशिको मन्त्रो द्वात्रिंशद् वर्ण्णको मतः ॥

मन्त्रः - ॐ यत् कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणाऽद्धानिर्णुह्म प्रत्यक् कर्त्तारमृच्छतु ॥
प्रत्यङ्गिरसमन्त्राणामग्रणी सार उच्यते ।

न्यासः - ऋषिरस्याऽङ्गिराः प्रोक्तश्छन्दोऽनुष्टुप् प्रकीर्तितः ॥
कृत्या च देवता याऽधिष्ठात्री षट्सु च कर्मसु ।

विश्वसंहारिणी शक्तिर्ब्रह्मणः साऽभिधीयते ॥
प्रणवो वीजमेतस्य क्रीं शक्तिः परिकीर्त्यते ।
परेण स्तम्भनादीनां कृतानां प्रतिसारणे ॥
विनियोगोऽस्य मन्त्रस्य ब्रह्मणा चोदितः पुरा ।
मायया स्युः षडङ्गानि ततः पदानि विन्यसेत् ॥
शीर्षे भालेऽक्ष्णोः श्रोत्रयोः नासायां वदने गले ।
वाह्वोः हृदि कुचे कुक्षौ नाभिलिङ्गोरुपादतः ॥
एवं पादादि विन्यस्य ततः प्रत्यक्षरं न्यसेत् ।
स्वोरुललाटदृग्मूर्द्धन् मुखे वाह्वोर्दशाक्षरम् ॥
एवं पदस्तथा नाभौ हृदयांशक पार्श्वतः ।
त्रिके ककुदि च न्यसेद् द्वात्रिंशद् वर्ण्णकं मनुम् ॥
ततोऽसौ व्यापकं न्यस्य कृत्यारूपः स्वयं भवेत् ।

वि. द्र. - अत्र न्यासस्थाननिर्द्देशे भ्रमोऽस्ति, नृसिंहस्य न्यासवद् भविष्यति ।

ध्यानम् - कृष्णां क्रुद्धां महाकायां चलज्जिह्वां सदंष्टिकाम् ॥
कृष्णवासोगन्धमाल्याभरणां त्र्यक्षभीषणाम् ।
दक्षिणे दधतीं पाशं त्रिशूलं परशुं वरम् ॥
वामेऽङ्कुशं मुद्गरं च मूषलं चाऽभयं तथा ।
उपासनावशाच्छत्रुकृतकर्म निवर्त्तिनीं (विनाशिनीं वा) ॥
ध्यायेत् कृत्यां महादेवीं शन्तिरूपां स्वकं प्रति ।
पूजयेदासुरी पीठे (पाठे वा) कृत्यादेवीं विधानवित् ॥
आसुरी मन्त्रवत् कुर्य्याद् यन्त्रं प्रतिशमेच्छया ।
पूजयित्वा विधानेन यन्त्रे कृत्यां भयङ्करीम् ॥
त्र्ययुतं वाऽयुतं हुत्वा परकर्म निवर्त्तयेत् ।
ज्ञात्वा रिपुहुतं द्रव्यं हुत्वाऽनेन निवर्त्तयेत् ॥
अज्ञाते तु घृतं हुत्वा स्वयं कृत्यां निवर्त्तयेत् ।
कृत्या नाम परकृतस्तम्भनादि निगद्यते ॥

षण्णां तु कर्माणां क्रूरं वशः संस्तम्भनं तथा ।
मोहनं द्वेषणं चैवोच्चाटः क्रूरतरं त्रयम् ॥
मारणं स्यात् क्रूरतमं क्रूराणि स्युः षडेव हि ।
मुनेरपि वनस्थस्येमानि कर्माणि कुर्वतः ॥
सम्भवन्ति त्रिभिः पक्षैरिन्द्रोदासीन शत्रवः ।
किमुत क्षितिपालस्यनिग्रहं नृषु कुर्वतः ॥
ततोऽस्य वहवः क्रूराः शत्रवो हननोद्यताः ।
साक्षात् कर्त्तुं न शक्ता ये ते कुर्य्युः स्तम्भनादिकम् ॥
ततः परकृतं कर्म निवर्त्तयितुमुद्यतः ।
नृपोत्तम इमं मन्त्रं सर्वदा जपति स्वयम् ॥
अष्टोत्तरशतं नित्यं जपन् कृत्यां निवर्त्तयेत् ।
सहस्रं जपतो ज्ञातिकृता कृत्या निवर्त्तते ॥
कृत्यां चिह्नैः परिज्ञाय कर्त्तारं प्रतिसारयेत् ।
प्रतिसार्य्य नृपः कृत्यां भुंक्ते राज्यमकण्टकम् ॥

॥ इत्याङ्गिरसे कृत्याप्रतिसारविधिः ॥

पिप्पलाद उवाच - अथ या दुर्निवार्य्या सा कृत्या लोकभयङ्करी ।
कर्त्तारं प्रतिसृत्यैव कथं पीडयति स्वयम् ॥

अङ्गिरा उवाच - उद्देश्यमारणे युक्ता ब्रह्मणा शिवरूपिणा ।
प्रेरितेयं तदायत्ता कर्त्तारं हन्ति निश्चितम् ॥
अरिभिः कल्पिता कृत्या कल्पितत्वान् मृषैव सा ।
वद्ध्वा व्यवहृता सेयं सत्यवत् प्रतिभासते ॥
सच्चिदानन्दरूपं यद् ब्रह्म तत् प्रेरकं विदुः ।
अतस्तत् प्रेरिता कृत्या कर्त्तारं हन्ति नाऽन्यथा ॥
शिवस्य शक्तयः सर्वाः शिवयन्ती प्रकीर्त्तिता ।
शिवेन प्रेरिता सेयं किं न कुर्य्याच्छिवेप्सितम् ॥
शिवः कर्त्ता शिवः कृत्या शिव उद्देश्य इष्यते ।
शिवध्वस्तं जगत्सर्वं शिवे ज्ञाते विलीयते ॥

॥ इत्याङ्गिरसे कृत्याप्रतिसारे द्विः ॥

* अथ कृत्याचिह्नानि *

पिप्पलाद उवाच - अथ चिह्नानि कृत्यायाः समाचक्ष्व समासतः ।
नृपतिर्यानि विज्ञाय प्रतिकुर्वन् सुखी भवेत् ॥

अङ्गिरा उवाच - कृत्याचिह्नान्यनन्तानि शक्यते नैव भाषितुम् ।
सर्वकर्मक्षमा कृत्या किं न कुर्य्याद् विकम्पतः ?
तथापि लेशतो वक्ष्ये तानि चिह्नान्यहं मुनेः ।
चिह्नानि स्तम्भनादीनां स्तम्भनादिषु सेमुषी ॥
स्तम्भनादि वचो वाऽपि स्तम्भनादिक्रियाऽथवा ।
चिह्नान्येतानि लोकेषु प्रसिद्धानि महामुने !

मारणचिह्नानि - ततो मारणचिह्नानि प्रवक्ष्यामि तथा शृणु ॥

शरीरे - क्रमेणाऽऽरोहते कृत्या मनोवचनकर्मसु ।
कल्पनेयं कृतापूर्वं ब्रह्मणा सृष्टिकर्मणा ॥
सर्वकर्माण्यनुत्साहो वैमुख्यं सर्वदा भवेत् ।
आलस्य भोजनादौ वा वहुवाञ्छाऽपि वा भवेत् ॥
अनाहारः सदातिष्ठेद् विनाऽऽहारोऽथवा भवेत् ।
सदा कोपभराक्रान्तिरुद्वेगो वा महान् भवेत् ॥
देहज्वाला वा महती ज्वरो वा तीव्र सम्भवेत् ।
देहव्यथा वा महती क्षुधात्यन्तं प्रवर्त्तते ॥
वृहती मैथुनेच्छा वा अनिच्छा वाऽपि सम्भवेत् ।
क्षणं क्षणं तृडवासिरुत्थानं वा पुनः पुनः ॥
आसनं प्रहरेद् वाऽपि अनर्थं वहुजल्पति ।
क्षणं क्षणं भ्रमद्वाऽपि नानारोगा भवन्ति वा ॥
अकस्मात् पतनं मूर्च्छा भूयो विनष्टचेष्टता ।
ददाति वहु वा नित्यं कदाचिन्न ददात्यपि ॥
स्वप्नो नानाविधो वाऽपि निद्राच्छेदोऽथवा भवेत् ।
अतिनिद्रा भवेद् वाऽपि कृत्याच्छायां च पश्यति ॥
भूतप्रेत पिशाचादिदर्शनं वहु वा भवेत् ।

सर्पकीटपतङ्गानां वन्यानां पक्षिणां तथा ॥
अदृष्टश्रुतवस्तूनि भूयो भूयः प्रपश्यति ।
एवमादीनि चिह्नानि कृत्यायां यदि लक्षयेत् ॥
न कुर्य्याच्चेद्प्रतिकारमवश्यं स विनश्यति ।

* अथ कृत्याप्रतिसारयन्त्रम् *

कृत्यायाः प्रतिकारार्थं यन्त्रं वक्ष्यामि साम्प्रतम् ।
सुवर्णशतमानेन निर्मितं यन्त्रमुच्यते ॥

वि. द्र. - परिभाषायां - मानेनोक्ते समं ज्ञेयम् ।
चतुर्दलमष्टदलं ततः षोडश पत्रकम् ॥
द्वात्रिंशत् पत्रकं चेति चत्वार्य्यब्जानि कारयेत् ।
नाभौ तारं फलं चापि लिखेन्मायां चतुर्दले ॥
अष्टपत्रे च विन्यस्येत् कालिकामन्त्रवर्ण्णकान् ।
स्वराख्यान् षोडशदले द्वात्रिंशत्पत्रके पुनः ॥
मन्त्राऽक्षराणि विन्यसेत् ततो यन्त्रं प्रतिष्ठयेत् ।
विधिनैतत् प्रतिष्ठाप्य राज्ञो हस्तेऽथ वन्धयेत् ॥
एतद् वद्‌ध्वा नृपश्रेष्ठः षट्कर्म प्रतिसारयेत् ।
षट्कर्म प्रतिसार्य्याऽसौ अकुतोभयतां ब्रजेत् ॥
तस्माद् राजा विशेषेण प्रतिसारपरो भवेत् ।

वि. द्र. - कृत्याप्रतिसारमन्त्रोऽत्र व्यवहर्त्तव्यः । प्रतिष्ठाकर्म च कार्य्यम् ।

॥ इत्याङ्गिरसे प्रतिसारयन्त्रम् ॥

* अथाऽभयमन्त्रः *

पुराशुक्रो भयं प्राप्य दितिजानामुपद्रवात् ।
उपगम्य गुरुं सोऽथ ययाचे स्वस्य निर्भयम् ॥
स तस्य वचनं श्रुत्वाऽभयमन्त्रम् उपादिशत् ।
इन्द्रस्तं प्रजपन् मन्त्रं सद्यो निर्भयमाप्नुवान् ॥

पिप्पलाद उवाच - अथर्वाङ्गिरसो मन्त्रो मया सम्यगधीयते ।

ततोऽभयमनुः कस्मान्मया ज्ञातुं न शक्यते ॥

अङ्गिरा उवाच - अभयं सोम इत्यादि मन्त्रोऽयं भयनाशकः ।

मन्त्रः - पैप्पलादसंहितायाः प्रथमकाण्डसप्तविंशतिसूक्तम् :-

ॐ अभयं सोम इत्यादिमन्त्रस्य सप्तर्षयः ऋषयः, त्रिष्टुप् छन्दः । सोमो देवता, अकारो वीजम्, माया शक्तिः । सर्वभयनाशने विनियोगः । सूक्ते चत्वारः मन्त्राः सन्ति । अत्र प्रथमो मन्त्रः, सर्वे मन्त्राः वा इति सन्देहः । षडङ्गन्यासे केवलं षट्दीर्घस्वराणां निर्देशत्वात् चतुर्थमन्त्रं विना न्यासः न सम्भवेत् । ततः चत्वारः मन्त्राः ग्रहणीयाः । मत्प्रकाशित-पैप्पलादविवाहादि संस्कारपद्धतौ अभयगणे मन्त्राः सन्ति । पुनः प्रयच्छामि -

ॐ अभयं सोमस्सविता कृणोत्वभयं द्यावापृथिवी उभे ।
अभयं स्वरन्तरिक्षं नोऽस्तु सप्तर्षीणां हविषाऽभयं नोऽस्तु ।१।
अभयं द्यावा पृथिवी इहास्तु नोऽग्निनाऽमित्रान् प्रत्योषतां प्रतीचः ।
मा ज्ञातारं मा प्रतिष्ठां विदन्ति मिथो विघ्नाना उपयन्तु मृत्युम् ।२।
पञ्चदेवा अभयस्येशतामिन्द्रत्स्वष्टा वरुणो मित्रोऽग्निः ।
मायं ग्रामो दुरितमेव आगाद् (आराद् वा)
अन्यत्र राज्ञामभियातु मृत्युः ।३।
अस्मै ग्रामाय प्रदिशश्चतस्र ऊर्जं सुभूतं सविता दधातु ।
अशत्रुमिन्द्रो अभयं कृणोतु मध्ये च द्विषां सुकृते स्याम् ।४।

ऋषिसप्तर्षयोऽस्य स्युः त्रिष्टुप् छन्द उदाहृतम् ।
सोमोऽत्र देवता प्रोक्तो यो जगत्सर्वतः शिवः ॥
सहोमया (सहमया वा) वर्त्तमानः सोमो माया महेश्वरः ।
अकारो वीजमेतस्य माया शक्तिः प्रकथ्यते ॥
विनियोगोऽस्य सर्वत्र सर्वदा भयनाशने ।
षडङ्गान्यस्य मन्त्रस्य क्लीववर्जगुरुस्वरैः ॥

यथा - ॐ आं, ईं, ऊं, एं, ऐं, औं, षड्दीर्घस्वरैरित्यर्थः ।
अस्य प्रत्यक्षरं न्यास आनुष्टुभनृसिंहवत् ॥
सर्वेण व्यापकं न्यस्य शिवं ध्यायन् जपेन्नृपः ।

ध्यानम् - दक्षे कपालमभयं वामे शूलवरं दधत् ।
रुद्रस्त्र्यक्षः सरक्तो हि भूषोऽपि वृषभेन तु ॥
अष्टोत्तरसहस्रं यो नित्यमेनं जपेन्मनुम् ।
सर्वत्र सर्वदा तस्य भयं न स्यात् कुतश्चन ॥
अथवाऽऽष्टोत्तरशतं नित्यमेतं सदा जपेत् ।
तदर्द्धं वा तदर्द्धं वा यथाशक्त्यथवा जपेत् ॥
सर्वत्र सर्वदा तस्य भयं राज्ञो न वर्त्तते ।
तस्मादिमं मनुं राजा शिवं ध्यायन् सदा जपेत् ॥
न तस्य त्रिषु लोकेषु भयमस्ति कदाचन ।
घृतेन त्र्ययुतं यस्तु होमयेदयुतं तथा ॥
उच्चाटादि कृतोद्वेगस्तस्य शाम्यत्यशंसयम् ।
तस्मादेतं सदा जप्त्वा निर्भयः सुखमश्नुते ॥

॥ इत्याङ्गिरसेऽभयमन्त्रविधिः ॥

* अथ ऐन्द्राऽभयं विधिः *

ऐन्द्राऽभयमनुं वक्ष्ये भयङ्कररिपुक्षयम् ।
यत् प्रसादात् सदा देवा अकुतोभयतां गताः ॥
यतः पदं समुच्चार्य्य पश्चादिन्द्रेति संपठेत् ।
भयामहे समाभाष्य ततो नोऽभयमुच्चरेत् ॥
कृधीत्येतत् पदं प्रोच्य मघवञ्छग्धि संपठेत् ।
तव त्वं नः समुद्धृत्य ऊतिभिर्विद्विषो भवेत् ॥
विमृधो जहि संगद्य दिशेदैन्द्राऽभयं मनुम् ।

पैः सं:(३/३५) ॐ यत इन्द्र ! भयामहे, ततो नो अभयं कृधि ॥
मघवञ्छग्धि, तव त्वं न ऊतिभिर्विद्विषो विमृधो जहि ।
ऋषिः सप्तर्षयः प्रोक्ताः छन्दोऽनुष्टुप् प्रकीर्त्तितम् ॥

इन्द्रोस्य देवता वीजं व्यञ्जनानि प्रचक्षते ।*
स्वराः* स्यु शक्तयः ख्याता विनियोगो निगद्यते ।
यस्माद् भयं समुत्पत्तिः तन्नाशादभयो भव ॥

षडङ्गन्यासः – ॐ यत इन्द्र भयामहे हृदयाय नमः, ॐ ततो नो अभयं कृधि, शिरसे स्वाहा, ॐ मघवञ्छग्धि शिखायै वषट्, ॐ तव त्वं न ऊतिभिः कवचाय हूं, विद्विषो विमृधो जहि नेत्रसहस्राय वौषट्, पूर्णमन्त्रेण अस्त्राय फट् । अनेन व्यापकं न्यस्य ध्यात्वाऽर्च्चित्वा मनुं जपेत् ।

ध्यानम् – ऐरावते सहस्राक्षं पीतदिव्याम्वरादिकम् ।
दक्षे वज्रं शृणिं वामे इन्द्रं बिभ्राणमास्मरेत् ॥
त्र्ययुतं वाऽयुतं वाऽपि यो जपेन्मन्त्रवित्तमः ।
तस्य शत्रुविनाशेन भयं शीघ्रं निवर्त्तते ॥
सहस्रं वा शतं वाऽपि तदर्द्धं वाऽपि यो जपेत् ।
तस्याऽन्तकभयं नास्ति का कथा मनुजे रिपौ ॥
महाभये समुत्पन्ने त्र्ययुतं सर्पिषा हुनेत् ।
तत इन्द्रः सु सन्तुष्टः स्वयं हन्ति भयाऽवधिम् ॥

॥ इत्याङ्गिरसे ऐन्द्राऽभयं मन्त्रविधिः ॥

* अथ सर्वकामभैरवविधिः *

अथातो भैरवं वक्ष्ये सर्वकामार्थसिद्धये ।
आद्यं तारं विजानीयाद् भैर्वीजं स्याद्द्वितीयकम् ॥
तृतीयं भैरवायेति चतुर्थं नम इत्यपि ।
अयमष्टाक्षरो मन्त्रः सर्वकामाय भैरवः ॥

मन्त्रः – ॐ तारं भैरवाय नमः – अष्टाक्षरं मन्त्रः ।
ऋषिः प्रजापतिः प्रोक्तश्छन्दोऽनुष्टुप् प्रकीर्त्तितम् ॥
देवता भैरवश्चात्र भं वीजं प्रणिगद्यते ।
द्यौः शक्तिः विनियोगः स्यात् सर्वकामार्थसिद्धितः ॥

---

* ३४ व्यञ्जनानि * १६ स्वराः

चत्वारि हृदयादीनि चतुर्भिः कुरुते पदैः ।
सर्वैः नेत्रत्रयं विद्याद् एतदेवाऽस्त्रमिष्यते ॥

षडङ्गन्यासः यथा –ॐ ॐ हृदयाय नमः । ॐ तारं शिरसे स्वाहा, ॐ भैरवाय शिखायै वषट् । ॐ नमः कवचाय हुं, ॐ तारं भैरवाय नमः नेत्रत्रयाय वौषट्, ॐ तारं भैरवाय नमः अस्त्राय फट् ।

अक्षरन्यासः – शिरोवदनहृत्कुक्षि लिङ्गाऽऽधारोरुपादतः ।
प्रत्यक्षरं न्यसेन्मन्त्री स्वयं भैरवरूपभाक् ॥

ध्यानम् – जटाभस्मविलिप्ताङ्गः कृष्णः शूलकपालभृत् ।
योगनिद्रागततिष्ठन्नेकपाद् भैरवोऽवतु ॥
एषः गूढतमो मन्त्रः पुण्यात् पुण्यतरो मतः ।
सर्वपापाच्च पाति, स्याद् विषस्यात्यन्तदूषकः ॥
सद्यः दुःस्वप्ननाशी च योषावल्लभता प्रदः ।
राजवशप्रदश्चैव सर्वलोकवशप्रदः ।
विवादे च जयं दत्ते युद्धे चापि विशेषतः ॥
यात्रायां शुभहेतुः स्यात् खेचरत्वं ददाति च ।
ब्राह्मणाय श्रुतिं दत्ते राज्ञे भूमिं ददात्यपि ॥
वाणिज्ये वृद्धिं वैश्याय पादजाय च सद्गतिम् ।
योगमभ्यस्यते योगी योगिने ज्ञानमात्मगम् ॥
ज्ञानिने स्वावधानं च मुक्तिश्चेति चतुष्टकैः ।
व्याधिभ्यो मुच्यते रोगी स्मरबन्धोऽपि बन्धनात् ॥
सत्पतिं कन्यकाऽऽप्नोति गुर्विणी पुत्रमेव च ।
जपन् वाप्यजपन् वाऽपि मन्त्रज्ञो रुद्रतां ब्रजेत् ॥
वेतालास्तद्वशं यान्ति सहस्रं यः सदा जपेत् ।
यो नित्यं शत जापीस्यात्सभूतादीन् निवारयेत् ॥
प्रेक्षणान्मन्त्रणाद् भस्मविलेपात् सर्षपेरणात् ।
केशेषु मुद्राबन्धाच्च कुर्वीत भूतवारणम् ॥
शतजपात् सदा योगी ज्ञानीरुद्रत्वमाप्नुयात् ।

॥ इत्याङ्गिरसे सर्वकमाभैरवविधिः ॥

* अथा स्वरक्षारिपुघातविधिः *

पिप्पलाद उवाच - स्वस्य रक्षा रिपोर्घातो द्वयं स्याद् युगपत् कथम् ।
एकैकं कथितं पूर्वमिदानीं युगपद् वद ॥
अङ्गिरा उवाच - न दृष्टं न श्रुतमेतद् यत् पृष्टं भवताऽधुना ।
मन्त्रमध्ये न चैकोऽस्ति स्वरक्षा रिपुघातकः ॥
अवेत्याद्यं पदं विद्याद् द्वितीयं ब्रह्मसंपठेत् ।
तृतीयं द्विष इत्याहुश्चतुर्थं जहि संपठेत् ॥
स्वरक्षार्थोऽरिघातार्थो मन्त्रराजेश्वरो ह्यसौ ।
यथा - ॐ अव ब्रह्मद्विषो जहि , अष्टाक्षरमन्त्रः ॥
न्यासादिः - ऋषिस्यादहमेवाऽत्र छन्दोऽनुष्टुप् प्रकीर्तित ।
देवता स्यात् परंब्रह्म वीजं चाऽकार इष्यते ॥
माया शक्तिर्विनियोगाः स्वरक्षारिपुघातयोः ।
चतुर्भिर्हृदयादीनि सर्वेणाऽस्त्रं प्रकीर्त्तितम् ॥
अर्थात् - नेत्रवर्जितं पञ्चाङ्गन्यासः भवेत् ।
शिरो वदनहृत्कुक्षि लिङ्गाधाऽऽरोरुपादतः ।
मन्त्रं प्रत्यक्षरं न्यस्य ब्रह्मरूपं स्वयं भवेत् ॥
निष्प्रपञ्चं परंब्रह्म सर्ववाधाविवर्जितम् ।
यत् सर्वं रक्षति ब्रह्म तत् कथं न स्वरक्षकम् ॥
प्रपञ्चाऽन्तर्गतत्वेन रिपोर्नाशं करोत्यसौ ।
सर्वाऽन्तर्यामिरूपेण ब्रह्मध्येयं निरञ्जनम् ॥
आदौ माऽप्यत्र संयोज्यं द्विषः पूर्वं मदित्यपि ।
यथा - 'ॐ मामव ब्रह्म, मद्द्विषो जहि' इति मन्त्रः ।
स्वं रक्षति रिपुं हन्ति नित्यं जप्त्वा शतं मनुम् ॥
परानभिचरद् राजा पराऽभिचरणेऽपि वा ।
अयुतत्रितयं जप्त्वा मन्त्री स्याद् ब्रह्मरूपीतः ॥
राजा वान्योऽपि वा कश्चित् परानभिचरन्नपि ।
आत्माभिचारशङ्कावान् त्र्ययुतं संजपेन्मनुम् ॥
कृत्याचिह्नानि संलक्ष्य त्र्ययुतं सर्पिषा हुनेत् ।

स्वरक्षारिपुघातोऽयं मन्त्रस्त्रैलोक्यदुर्लभः ॥
॥ इत्याङ्गिरसे स्वरक्षारिपुघातविधिः ॥

* अथ प्रत्यङ्गिरायन्त्रम् *

(परविद्यानिवारणाय)

अथ प्रत्यङ्गिरायन्त्रमस्माभिरभिधीयते ।
यस्य धारणमात्रेण परकर्मनिरर्थकम् ॥
सुवर्णशतमानेण निर्मितं यन्त्रमुच्यते ।
भुर्जपत्रमयं वाऽपि यन्त्रमेतं निगद्यते ॥
भुर्जपत्रे लिखेत् पद्मं प्रथमेऽष्टदलं वुधः ।
ततः परं लिखेत् पद्मं द्वितीयं द्वादशच्छदम् ॥
तृतीयं षोडशदलं द्वात्रिंशत् पत्रकं ततः ।
चतुः षष्टिदलं तस्माच्चतुरस्रं ततः परम् ॥
मध्ये तारादिकां मायां मध्येवाऽत्र लिखेत् क्रमात् ।
द्वात्रिंशच्छतवर्ण्णान्तं मन्त्रं पश्चाऽब्जके लिखेत् ॥
मण्डले चतुरस्रे तु पञ्चाशन्मातृकां लिखेत् ॥
एतद् यन्त्रं सदाधृत्वाऽरि कृतैर्नैव वाध्यते ।
विधिना तत्र संपूज्य परविद्यानिवारिणीम् ॥
सहस्रं च मनुं जप्त्वा सहस्रं जुहुयात् ततः ।
ततोऽस्मै दक्षिणां दत्वा राजा हस्तेन धारयेत् ॥
एतन्मन्त्रवरं धृत्वा निश्चिन्तो नृपतिर्भवेत् ।
असुरैर्यत्कृतं पूर्वं समुद्दिश्य पुरन्दरम् ॥
सर्वं नानाविधं कर्म तस्माद् भूतमनेन वै ।
प्रत्यङ्गिरा महाविद्या त्रिदशैरपि दुर्लभा ॥
शिवस्याऽनुग्रहाल्लभ्या शत्रुकृत्य निवारिणी ।

वि. द्र. - पञ्चपद्मानां द्वात्रिंशच्छतदलेषु क्रमेणैव परविद्यानिवारिणीमन्त्रस्य प्राग्वर्ण्णितस्य द्वात्रिंशद्वर्ण्णान् लिखेत् । चतुरस्रे मण्डले पञ्चाशद् वर्ण्णान् विलिखेत् । यन्त्रमध्ये शक्तिं, वीजं च लिखेत् । मायाशक्तिः ॐ वीजम् ।

॥ इत्याङ्गिरसे परविद्यानिवारणयन्त्रविधिः ॥

* अथ एकाक्षरभैरवमन्त्रः *

भैरवेकाक्षरं वीजम् वक्ष्ये योगेन मुक्तये ।
भू(भ)कारात् परतोऽकारस्ततोऽनुस्वार इत्ययम् ॥
वर्णानां त्रितयं वीजं मुक्तिप्रदमिदं भवेत् ।
यथा - भू + अ + ं (अनुस्वार) = भ्वं , भू वीजं, अं शक्तिः ।
वा - भ् + अ + ं (अनुस्वार) = भ वीजं, अं शक्तिः ।
सर्वकामप्रदः तस्य ऋषिश्छन्दोऽधिदैवतम् ॥
भकार(भूकार)मात्रं वीजं स्याच्छक्तिस्यादमिति स्फुटम् ।
योगेन मोक्षसिद्ध्यर्थे विनियोग उदाहृतः ॥
मूलेनैव करन्यासमङ्गन्यासं प्रकल्पयेत् ।
मूलेन व्यापकं न्यस्य भैरवः स्वयमुद्भवेत् ॥
ध्यानम् - कृष्णभस्म विलिप्ताऽङ्गो विमुक्तोद्धर्वजटाब्रजः ।
दिगम्वरो मर्हिं पश्यन् प्रत्यक् प्रवणमानसः ॥
दक्षिणे कर्परं वामे शूलमुद्यम्य चान्तरे ।
पुरः सन्नेकपादपातु भैरवो मोक्षदायकः ॥
सहस्रं वा शतं वाऽपि चतुष्कालो जपन् मनुम् ।
योगन्निष्ठः जपन्नेतं भैरवत्वं प्रपद्यते ॥
पुरारुद्रः स्वयं नित्यं मन्त्रमेतत् समभ्यसत् ।
निष्कलं ज्योतिरापन्नो नित्यमुक्तिः स उच्यते ॥
सहस्रपत्रे कमले ज्योतिरेतद् विभावयन् ।
एतद्वीजं जपन् योगी परंब्रह्माऽधिगच्छति ॥
सर्वत्र सर्वदा योगी सर्वावस्थागतेऽपि वा ।
योगं युञ्जन् उत्पन्ने तत् परनिर्वाणमृच्छति ॥
॥ इत्याङ्गिरसे एकाक्षरभैरवमन्त्रः ॥

* अथ त्रिपुरभैरवीविधिः *

अथ त्रिपुरभैरवीविधिं वक्ष्यामि संप्रति ।
महादेवमृर्षि विद्यात् गायत्रीछन्द इष्यते ॥

देवता भैरवेणाऽस्य दृष्टा त्रिपुरभैरवी ।
आद्यं वीजं भवेद्वीजं भवेच्छक्तिस्तथाऽन्तिमम् ॥
योगसिद्ध्यर्थमेतस्य दक्षहस्ततले न्यसेत् ।
द्वितीयं वीजमेतस्य वामहस्ततले न्यसेत् ॥
मन्ये - त्रिं, पुं, रं, वीजं ! वीं शक्तिः, त्रिपुरभैरवीं,
त्रिभिर्वीजैस्त्रिरावृत्तैः षड्भिर्वर्ण्णैः षडङ्गकम् ।
यद् वा दीर्घस्वरोपेतं षडवृत्त्या षडङ्गकम् ।
यथा - ॐ भैं वीं हृदयाय नमः इत्यादिः ।
मूर्द्ध्नें हृदयपर्यन्तमाद्यं वीजं प्रविन्यसेत् । (त्रिं)
हृदयान्नाभि पर्य्यन्तं द्वितीयमपि विन्यसेत् । (पुं)
अथवा - भैं प्रथमं, रं द्वितीयं वीजम्, वीं शक्तिः ॥
नाभेः पादतलं यावत् तृतीयश्चापि विन्यसेत् ।(रं)
पादाग्रान्नाभिपर्य्यन्तं पुनराद्यं प्रविन्यसेत् ॥
नाभेः हअदयपर्य्यन्तं द्वितीयमपि पुनर्न्यसेत् ।
सर्वेण व्यापकं कुर्य्यादूर्द्ध्वाधः क्रमतः त्रिधा ॥
वि. द्र. - त्रिभिः वीजैः इत्यत्र सन्देहत्वात् न्यासेऽपि सन्देहः ।
ध्यानम् - उद्यदादित्य सङ्काशां कपर्देन्दु कलावतीम् ।
चतुर्भुजां त्रिनेत्रां च पूर्ण्णचन्द्रनिभाननाम् ॥
ऊर्द्ध्वं दक्षेऽक्षमालां च तस्याऽधो विभ्रतीं वरम् ।
ऊर्द्धं च पुस्तकं वामे विभ्राणां तदधोऽभयम् ॥
पीनोत्तुङ्गस्तनादूर्द्ध्वं रक्त चन्दन लेपिताम् ।
रक्तमाल्यवस्त्रयुग्मां व्योम्नि पद्मासनाऽऽस्थिताम् ॥
आगलात् पादपर्य्यन्तं मुण्डमालाति शोभिताम् ।
कुर्वतीं शाम्भवीं मुद्रां मूलबन्धे कृतोदराम् ॥
सहस्रपत्रात् कमलात् प्रपतन्तं सुधारसम् ।
पिवन्तीं परमानन्दचैतन्यात् पयरूपिणीम् ॥
चिन्तयेत् तन्मयो मन्त्री देवीं त्रिपुरभैरवीम् ।
एवं तद्रुपमाऽऽपर्ण्णो जपन् सिद्धिमवाप्नुयात् ॥

वीजं वीजमुच्छ्रियाणं (मुत्क्रियाणं वा)कुर्वन् वीजत्रयं जपेत्।
अन्यथा निष्फलं जाप्यमिति रुद्रेण भाषितम् ॥
जितेन्द्रियो जपन् लक्षं कामिनीं वशमानयेत्।
लक्षद्वयं जपेद्यस्तु तस्य सर्वो वशो भवेत् ॥
लक्षत्रयमिमंजप्त्वा वशं माण्डलिकान् नयेत् ।
जप्त्वा द्वादशलक्षाणि वशयेद् यक्षराक्षसान् ॥
फलगाधीश्वरांश्चापि वशयेन्नाऽत्र संशयः ।
सिद्धान् विद्याधरांश्चापि गन्धर्वानप्सरोगणान् ॥
पञ्चलक्षसहस्राणि जप्त्वैतान् वशमानयेत् ।
अष्टाविंशति लक्षस्य जपाद् विद्याधराऽधिपः ॥
कामरूपत्वमाप्नोति यद्देवैरपि दुर्लभम् ।
त्रिंशल्लक्षजपान् मन्त्री नृसिंहः स्वयमुद्भवेत् ॥
विंशतिद्वयलक्षेण ब्रह्माविष्णुसमो भवेत् ।
षष्टिलक्षाणि संजप्य रुद्रतुल्यं स्वयम् भवेत् ॥
अशीतिलक्षजपनादीश्वरत्वं प्रपद्यते ।
कोटिसंख्यं जपन् मन्त्री शिवे सम्यग् विलीयते ॥
जातु तस्य क्षयो न स्यान् नाऽत्र कार्य्या विचारणा ।
एवं प्रसाधको मन्त्री भवेत् त्रैलोक्य दुर्लभः ॥
रुद्रेण कथितं ह्येतत् पार्वत्यै कृपया पुरा ।
॥ इत्याङ्गिरसे त्रिपुरभैरवीविधानम् ॥

* अथ मुक्तिमहामन्त्रः *

(पराजपविधिः)

पिप्पलाद उवाच - भगवन् ! सर्वधर्माणां विधानं कथितं त्वया ।
मुक्तिहेतुर्महामन्त्रो न कश्चित् प्रतिपादितः ॥
कर्ममार्गे प्रविष्टोऽहं कथं मुक्तिं ब्रजाम्यहम् ।
अङ्गिरा उवाच - साधु पृच्छसि मां शिष्य ! कृपया ते वदाम्यहम् ॥
मुक्त्यर्थोऽस्ति महामन्त्रः पराशक्त्यभिधायकः ।
चिच्छक्तिरेव मोक्षाय मोक्षाऽऽदानकृतव्रताः ॥

चित्शक्तिं समुपास्यैव मुक्तिं यान्ति प्रसाधकाः ।
चिद्रूपस्य शिवस्येयं पराशक्तिर्निगद्यते ॥
मन्त्रः - मन्त्रोऽस्याः सौरिति प्रोक्तः समुपास्ते शिवः स्वयम् ।
यं मन्त्रं समुपास्य मा म्रियन्तेऽब्जासनादयः ॥
तन्मन्त्रं ते प्रवक्ष्यामि शृणु वत्स ! समाहितः ।
सप्तविंशति वारोऽस्याघोरेण प्राणसंयमः ॥
पद्मासनगतो मन्त्री नमस्कुर्य्यात् स्वमानसम् ।
ऐं क्लीं श्रीं समुच्चार्य्य कृतपद्मासनं नयेत् ॥
ततस्त्रिः क्षीणपाठश्च प्रणमेन्मन्त्रवित्तमः ।
ततः परं शिवं देवं प्रणम्य स्वगुरुं नमेत् ॥
गणेश्वरं क्षेत्रपालं दुर्गां सरस्वतीं तथा ।
ब्रह्माणं च नमस्कृत्य विघ्नशान्त्यर्थमाचरेत् ॥
मूलाऽऽधारे सकारेण तालत्रयं समाचरेत् ।
(वि. द्र.- स+औ+ः= सौः)
उत्तरोत्तरवृद्ध्या तु कुर्य्यात् तालत्रयं वुधः ॥
औकारेण हृदि, ब्रह्मरन्ध्रे कुर्य्यात् विसर्गकैः ।
अमीभिः नवभिः तालैः भूम्याविघ्ननिवारणम् ॥
धृत्वा वामेन हस्तेन दक्षिणं चरणं वुधः ।
सकारोच्चारणैः पृथ्वीं हन्याद् विघ्ननिवृत्तये ॥
औकारेण पुनः कुर्य्यात्तालत्रयमतन्द्रितः ।
विसर्गोच्चारणैः क्रूरदृष्टिमाकाशतः क्षिपेत् ॥
पातलभूमिनभसां विघ्नाः सर्वे निराकृताः ।
अन्तस्ताला वहिस्ताला द्विधाऽमी परिकीर्त्तिताः ॥
हृद्यं तुतर्जनं कुर्य्यात् देवतायाश्च सादरम् ।
(वा - हृदि तु तर्पणं कुर्य्यात् देवतायाश्च सादरम् ।)
भूमिशुद्धिं प्रकुर्वीत मन्त्रमुच्चारयन् सुधीः ॥
मूलादिब्रह्मरन्ध्रान्तं मूलेन दहनात्मना ।
संसारपाशनाशार्थं भावयेद् दहनं मनुम् ॥

वि. द्र. - अग्नेः वीजमन्त्रेण भविष्यति पुनः वायुवीजम् ।
ब्रह्मरन्ध्रादिमूलान्तं भावयेत् पवनात्मकम् ॥

न्यासः - ऋषिः स्याद् दक्षिणामूर्त्तिः त्रिष्टुप् छन्दः प्रकीर्त्तितम् ।
देवता स्यात् पराशक्तिः सकारो वीजमिष्यते ॥
औः शक्तिर्योगसिद्ध्यर्थे विनियोग उदाहृतः ।
पद्भिर्द्विरौश्च संयुक्तैः सकारैरुद्ध्र्वविन्दुकैः ॥
मन्त्री कुर्य्यात् षडङ्गानि प्रकारान्तरमुच्यते ।
एभिर्वर्ण्णैर्द्विरुक्तैर्वा सच्चिदानन्दलक्षणैः ॥
प्रकुर्वीत षडङ्गानि ततः प्रत्यक्षरं न्यसेत् ।
मस्तके चैव जिह्वायां हृदये गुह्यके तथा ॥
सर्वाङ्गे च पञ्च पञ्च न्यासान् कुर्य्यान्महामनोः ।
सप्तविंशति वारञ्च शिखायां विन्यसेद्द्विजः ॥
हृदयान्नाभिपर्य्यन्तम् औकारञ्च प्रविन्यसेत् ।
नाभेश्चरणपर्य्यन्तं विसर्गञ्च प्रविन्यसेत् ॥
भूयोऽधः क्रमतोऽप्येवं मन्त्री प्रत्यक्षरं न्यसेत् ।
सर्वेण व्यापकं न्यासं मन्त्रीपूर्ववदाचरेत् ॥
ततो ध्यायेन्महादेवीं साक्षान्मुक्तिप्रदायिनीम् ।

ध्यानम् - अकलङ्कशशाङ्काभा त्र्यक्षा च चन्द्रकावती ॥
सूत्रपुस्तकमद्वाहुः पातु मामीश्वरी परा ।
ध्यात्वा देवीं धेनुमुद्रां योनिमुद्राञ्च दर्शयेत् ॥
शुक्लाञ्च शुक्लवसनां पीनोन्नत पयोधराम् ।
वसुत्रयकरां देवीं त्रिनेत्रां चन्द्रशेखराम् ॥
सर्वालङ्कारसर्वाङ्गीं पद्मासनगतां पराम् ।
शक्तिस्थानेऽथवाऽऽकाशे मोक्षार्थी प्रविचिन्तयेत् ॥
अपान मूद्ध्र्वमाकर्षन् शाम्भवीं (मुद्रा) सम्यगाचरन् ।
प्रत्यहं प्रजपेन् मन्त्रं यथाशक्ति प्रसाधकः ॥
यो द्वादशसहस्राणि प्रत्यहं प्रजपेदिमम् ।

सोऽवश्यं ज्ञानमाप्नोति ततो मुक्तिं ब्रजत्यपि ॥
गूढाद्गूढतमो मन्त्रः मया ते कृपयोदितः ।
योगिनेऽयं प्रदातव्यो न देयो यस्य कस्यचित् ॥
मुहूर्तं स्मरते यस्तु चुम्बकेनाऽभिमुद्रितम् ।
स बध्नाति तदा देहे मन्त्रमुद्रागणं महत् ॥
अतीताऽनागतानर्थान् पृष्टोऽसौ कथयत्यपि ।
प्रहराद् यदभिप्रेतं देवतारूपमुच्चरन् ॥
साक्षात् पश्यत्यसंदिग्धमाकृष्टं रुद्रशक्तिभिः ।
प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन् ॥
त्रयेण मातरः सर्वा योगेश्वर्य्यो महाबलाः ।
वीरा वीरेश्वराः सिद्धाः बलवान् शाकिनीगणः ॥
आगत्य समयं दत्वा भैरवेण प्रचोदिताः ।
यच्छन्ति परमां सिद्धिं तामानयत् समीरितम् ॥
अनेन सिद्धाः सेव्यन्ते साधयन्ति च मन्त्रिणः ।
यत् किञ्चित् भैरवे तन्त्रे सर्वमस्मिन् प्रसिद्ध्यति ॥
॥ इत्याङ्गिरसे पराजपविधिः ॥

* अथ घर्मटिका विधिः *

(विद्वेषणार्थम्)

अथ घर्मटिका नाम्ना विद्याविद्वेषणं ब्रूवे ।
पुत्रपित्रोरपि द्वेषो यया शीघ्रं प्रजायते ॥

मन्त्रः - द्विरुच्चरेत् घर्मटिके ! तथा मर्कटिके ! द्वयम् ।
घोरे ! द्वयं विद्वेषिणि ! द्वयं विद्वेषकारिणि !
द्विरमुकाऽमुकयोश्च परस्परद्विः संपठेत् ।
द्वेषं कुरु कुरु स्वाहा वषट् पञ्चदश पदैः ॥
अयं घर्मटिकामन्त्रः प्रद्वेषैक फलप्रदः ।

यथा- ॐ घर्मटिके ! घर्मटिके ! मर्कटिके ! मर्कटिके ! घोरे ! घोरे !

विद्वेषिणि ! विद्वेषिणि ! विद्वेषकारिणि ! विद्वेषकारिणि ! अमुका-
मुकयोः परस्परद्वेषं,परस्परद्वेषं ,कुरु कुरु स्वाहा वषट् ।

एतस्य नारदऋषिः पंक्तिश्छन्दः प्रकथ्यते ।
देवीघर्म टिका दूर्गा प्रणवो बीज मुच्यते ॥
स्वाहा शक्तिः प्रविद्वेषे विनियोग भवेत् परम् ।
पञ्चभिश्च पदद्वन्द्वैः हृदयाद्यङ्गपञ्चकम् ॥
शेषेणाऽस्त्रं विजानीयात् सर्वेण व्यापकं न्यसेत् ।

ध्यानम् - दीर्घकायां कृष्णवर्णां कपिलमुक्त मूर्द्धजाम् ॥
एकहस्तान्तरस्थायि वल्मिकर्गरजोऽनलम् ।
क्षिपन्तीं साध्वसं मूर्ध्नि विचलद्दीर्घजिह्विकाम् ॥
घोरां घर्मटिकां ध्यायेत् स्मितां घोरविराविणीम् ।
अष्टोत्तरसहस्रं वा जपेदष्टोत्तरं शतम् ॥
अथवा संजपेदार्षः सप्ताहात् कलहो भवेत् ।
मरीचैः कटूतैलाक्तैः अयुतं जुहुयाद् वुधः॥
परमप्रिययोश्चापि कलहो भवति ध्रुवम् ।
फलाभावे त्रिरावृत्या फलं भवति निश्चितम् ॥

॥ इत्याङ्गिरसे घर्मटिका विधिः ॥

* अथ असिद्धे कर्मणि प्रतिकारव्यवस्था *

अङ्गिरा उवाच - अथाऽतः कर्मणोऽसिद्धे प्रतिकारं वदामि ते ।
न हि सिद्ध्यन्ति कर्माणि दोषैर्यैस्तान् शृणुष्व मे ॥
यजमानस्य कर्त्तुश्च सदस्यानां च दुष्कृताम् ।
तथा पापाच्च साध्यस्य पुण्यात् कर्म न सिद्ध्यति ॥
तथा तस्यैव पुण्याच्च मारणादि न सिद्ध्यति ।
अथैतानि न सिद्ध्यन्ति परविद्यानिवारणात् ॥
कर्मणः क्रमभङ्गाच्च संख्याया न्यूनभावतः ।
आधिक्यादशुभाद्वाऽपि विलम्बाच्च प्रमादतः ॥
कर्त्तुश्चकुलहीनत्वाज्ज्ञातकर्माद्यभावतः ।

मन्त्रस्याऽनुपदेशाच्च लिखित्वा पठनादपि ॥
स्वरवर्णाद्यशुद्धेश्च प्रस्मृतेः स्तोकसंस्मृतेः ।
लोभाद्दम्भाच्च मोहाच्चाप्यालस्यादनृतान् मुने !
देवताऽनुग्रहाऽभावाद् हर्षात् कामान्महामदात् ॥
कायाऽङ्गानाञ्च वैकल्यादाधिक्याच्चापि दोषतः ।
अर्थाऽज्ञानात् पदाऽज्ञानादक्षराणामनिश्चयात् ॥
ऋष्यादीनामसंवित्ते ब्राह्मणस्याऽप्यसंविदः ।
न्यासस्य विनियोगस्य ध्यानाऽर्च्चनविधेरपि ॥
तथैवोपासनाहीनरागस्यच विर्वर्जयेत् ।
कायवाङ्मनसोऽशुद्धेर्नियमस्य च भञ्जनात् ॥
अशमाददमाच्चापि कोपतश्चा प्रसादतः ।
रोगाणां चैव सम्बन्धादिन्द्रियाणामनिग्रहात् ॥
विधानस्याऽपरिज्ञानाद् विहिताऽकरणात् तथा ।
निषिद्धस्याऽप्यनुष्ठानाद् व्यवहारनिराकृतेः ॥
सङ्कल्पाद्यकृतेश्चापि दक्षिणा अप्रदानतः ।
इत्येवमादिदोषेभ्यो न सिद्धिः कर्मणां भवेत् ॥
अत्राऽस्माभिः प्रतिकारः वक्ष्यते कर्मसिद्धये ।
प्रायश्चित्तं यथाशास्त्रमत्रकृत्वा विचक्षणः ॥
कर्मणस्तु त्रिरावृत्तिं विद्याद् यत्नेन कारयेत् ।
एवं यदि न सिद्ध्येच्च कलिकालप्रभावतः ॥
ततश्चामुखमप्राप्य नास्तिकत्वं कदाचन ।
त्रिगुणं त्रिगुणीकृत्य सोऽवश्यं सिद्धिमश्नुते ॥

॥ इत्याङ्गिरसे कर्माऽसिद्धिप्रतिकारः ॥

* अथ कर्मविघ्नप्रतिकारः *

अथवा कर्मणां विघ्नाः संपद्यन्ते परागतः ।
तस्य चिह्नानि वक्ष्यामि संक्षेपाश्छृणु सत्तमः ॥
यजमानस्य रोगो वा विपत्तिर्मृतिरेव वा ।

अथवा यजमानादेः पुत्रादिषु भवत्यमी ॥
फलं वा सर्वथा न स्यात् किञ्चित् स्यान्न भवेत् पुनः ।
स्थितस्य पूर्वोतो हानिर्विपरीतं भवेदपि ॥
उद्वेगयजमानादेः कर्मविघ्न उपस्थिते ।
वैष्णवः यजमानश्चेन्न स विघ्नेन पीड्यते ॥
कर्त्ता च वैष्णवः स्याच्चेन्न स विघ्नेन पीड्यते ।
सदस्या वैष्णवाश्चेत् स्युर्न ते विघ्नेन पीडिताः ॥
तस्माद् विष्णुमुपासीत प्राणैः कण्ठगतैरपि ।
तत्र शान्तिं प्रकुर्वीत सर्वविघ्नो निवर्त्तते ॥
अथवा तेन मन्त्रेण त्र्ययुतं वाऽयुतं हुनेत् ।
सहस्रं वाऽपि जुहुयाद् विघ्नानामनुसारतः ॥
अथवा विघ्नतुण्डेन हुत्वा विघ्नान् विनाशयेत् ।
अथ सर्वगुणोपेतं विद्वांसं वृणुयात् ततः ॥
मन्त्रेणाऽन्येन तेनाऽपि फलार्थी फलमाप्नुयात् ।

॥ इत्याङ्गिरसे कर्मविघ्नप्रतिकारः ॥

* अथ परकर्मनिवारणम् *

उपरेदुः पुरा देवाः स्रष्टारं प्रष्टुमुत्तमम् ।
क्रियमाणं परैः कर्म न सिद्ध्येत् तत् कथं विधे !
ब्रह्मोवाच - कर्मणां स्तम्भनात् कर्म क्रियमाणं न सिद्ध्यति ।
यद् वा विरुद्धकरणे कर्मैवं नैव सिद्ध्यति ॥
आवर्त्तयेद् विरोधं चेत् कर्मयायाद् विपर्य्ययम् ।
वशे च द्वेषणं कुर्य्यादाकर्षे च पलायनम् ॥
स्तम्भनं कथनास्तम्भेऽप्याकर्षणं पलायिने ।
मोहने वुद्धि वृद्धिं च विद्वेषे वशकर्म च ॥
उच्चाटने स्थिरीभावं विद्रवे तत्समानयः ।
मारणे वाऽमृताशान्तिः मृतसंजीवनी हि सा ॥
स्तम्भनं वा विरुद्धं च कुर्य्यात् सर्वत्र वारणम् ।

सम्यक् ज्ञात्वा द्वयं चैतत् परकर्मभयं जहुः ॥
एवमाचर्य राजाऽपि जह्यात् परकृताद् भयम् ।

॥ इत्याङ्गिरसे कल्पे परकर्मनिवारणम् ॥

* अथ जयदुर्गा भद्रकाली विधिः *

अथ देव्या भद्रकाल्या मन्त्रोऽयं सोऽभिधीयते ।
यो राज्ञो जयकामस्य ददाति जयमिप्सितम् ॥
मन्त्रः - प्रणवं पूर्वमुच्चार्य मायावीजं समुच्चरेत् ।
महाचण्डपदं प्रोच्य योगेश्वरिपदं भवेत् ॥
फडन्तो मन्त्रराजोऽयं भवेदेकादशाक्षरः ।
मन्त्रः - ॐ माया महाचण्डयोगेश्वरी फट् । इति नमः स्वाहा च ।
पूजाकाले नमोऽन्तः स्याद् होमे स्वाहान्त इष्यते ॥
पिप्पलाद ऋषिः प्रोक्तः छन्दो नास्ति यजुष्ट्वतः ।
देवता स्याद् भद्रकाली जयदुर्गेति यां विदुः ॥
प्रणवो वीजमेतस्य हृल्लेखा शक्तिरिष्यते ।
जये च विनियोगः स्यादथर्व मुनि भाषितः ॥
नियमो नास्ति मन्त्रेऽस्मिन् न पुरश्चरणं भवेत् ।
अङ्गन्यासः - सानुस्वारो त्रिराकारः हृदयः स निगद्यते । आं, आं, आं,
तथेकारः शिरः प्रोक्तः ईं, ईं, ईं, शिरसे ।
ऊकारश्च शिखा स्मृतः - ऊं, ऊं, ऊं शिखायै ।
ऐकारः कवचो ज्ञेयः, ऐं, ऐं, ऐं कवचाय ।
औ च नेत्रत्रयं विदुः - औं, औं, औं नेत्रत्रयाय ।
अस्त्रं मः स्यात् खकारोऽत्र प्रे प्रयोज्यं च पूर्वतः ।
प्रेखं मः अस्त्राय फट् ॥
कराङ्गन्यासमेतस्य मन्त्रस्येत्थं वदन्ति वै ।
ध्यानम् - श्यामामिन्दुधरां देवीमाऽऽताम्रनयन त्रयीम् ।
वामे रक्तकपालं च त्रिशूलं दक्षिणे तथा ॥

कृशोदरीं रक्तवस्त्रां पीनस्तनीं नितम्विनीम् ।
पद्मस्थां युवतीं ध्यायेत् स्मेराऽऽस्यामति सुन्दरीम् ॥
भद्रकालीं महादेवीं जयदात्रीं सुशीतलाम् ।
पूजयेदासुरीपीठे स्युस्तदाऽऽवरणानि च ॥
त्र्ययुतं वाऽयुतं वाऽपि घृतहोमाज्जयो भवेत् ।
आज्येनाऽऽक्ताः पलाशस्य समिधो वा हुनेद् वुधः ॥
अथवा जपनात् तावज्जयः स्यान्न च संशयः ।
भद्रकाली भवत्यस्य ऋग्द्वयस्य विधिं व्रूवे ॥
पूर्ववत् सर्वमन्त्रः स्याद् विनियोगोऽस्य मारणे ।
जये वा विनियोगः स्याद्धोमेन जपनेन वा ॥

ऋग्द्वयम् - भद्रकालि ! भवाऽभीष्टभद्रसिद्धि प्रदायिनी ।
सपत्नान् मे हन हन दह शोषय तापय ॥
शूलाऽसि शक्तिवज्राद्यैरुत्कृत्योत्कृत्य मारय ।
महादेवि ! महाकालि ! रक्ष्योऽस्मि रक्षताऽम्विके ॥

न्यासः - भृगुः ऋषिः स्यादेवाऽस्य छन्दोऽनुष्टुप् प्रकीर्त्तितम् ।
देवता भद्रकालीति वीजानि व्यञ्जनानि च ॥
स्वराः शक्तयः उच्यन्ते आज्यहोमाज्जयो भवेत् ।

वि. द्र. - चतुस्त्रिशंद् व्यञ्जनानि, षोडश स्वराः, इति पञ्चाशद् वर्ण्णाः ।

मारणं कटुतैलेन होमेन भवति ध्रुवम् ।
माया वीजेन कर्त्तव्या न्यासाश्चैव कराङ्गयोः ॥

शस्त्राणि - शूलाऽसि शक्ति वज्राणि शङ्खचक्रधनुः शरान् ।
मारयन्ती महाकाली घोरा विकटदंष्ट्रिका ॥
चलज्जिह्वा तथा तुली विलम्वितपयोधरा ।
मुखादग्निं वमन्ती च त्रासयन्ती जगत्त्रयम् ॥
धावन्ती जिघ्नती शत्रुं ध्येया युद्धे जयैषिणा ।
गजं वा वाजिनं वाऽपि समारूढो महारणे ॥
धायन्नेतां महाकालीं जपन्मन्त्रं रिपुं जयेत् ।
अक्षतां भावयन्नेतां स्वयमक्षततामियात् ॥

तृणकूटं यथा वात्याप्रेरितं शीघ्रतां भवेत् ।
जपतो ध्यायतोऽस्याऽग्रे परसैन्यं पलायते ॥
न चाऽस्ति जपसंख्याऽत्र नियमश्च न विद्यते ।
ध्यायन्नेतां भद्रकालीं परसेनां जयत्यहो !
तस्माद् यत्नेन भूपालो विद्यामेतां समभ्यसेत् ॥
दुर्वलोऽपि बलीयांसं यत् प्रसादाद् रिपुं जयेत् ।

* अथ भद्रकाल्या मन्त्रान्तरमुच्यते *

अथ मन्त्रान्तरं तस्या भद्रकाल्या निगद्यते ।
यस्य प्रसादान्नृपतिरेकछत्री भवेद् ध्रुवम् ॥

मन्त्रः - भद्रकाली पदस्यान्ते जयं देहि पदं वदेत् ।
फडन्तोऽयं महामन्त्रो घोरयुद्धेऽभयप्रदः ॥
ॐ भद्रकाली जयं देहि फट् । नवाक्षरी ।

न्यासः - अस्याऽङ्गिरा ऋषिः प्रोक्तश्छन्दोऽनुष्टुप् प्रकीर्त्तितम् ।
देवता भद्रकाली या जयदुर्गेति गीयते ॥
क्लीं वीजं फट् च शक्तिः स्याद् विनियोगो जये नमः ।
शक्त्या कुर्य्यात् षडङ्गानि प्रत्यक्षरमथोच्यते ॥
मस्तके च ललाटे च मुखे कण्ठे उरस्यपि ।
उदरे च तथा लिङ्गे उरुद्वन्द्वे पदद्वये ॥
(मन्त्रस्य इत्थं प्रत्यक्षरं न्यस्य भद्रकाली स्वयं भवेत् इत्यर्थः)
ततः समस्तमन्त्रेण व्यापकं विग्रहे न्यसेत् ।

ध्यानम् - वालां कालीं रक्तवस्त्रां कुपितां चन्द्रशेखराम् ॥
दक्षिणे दधतीं शूलं वामे रुधिरकर्परम् (खर्परम्) ।
पद्मे पद्मासनां देवीं भद्रकालीं स्मरेद् रणे ।
एवं विचिन्तयेन्मन्त्री यागं मन्त्रं विधाय च ॥
जपेदर्च्चेत् प्रजुहुयात् लाजानामयुतं सुधीः ।
मूलाष्टमीं समारभ्य भवेद् यावन् महाष्टमी ॥
तावदेतां प्रपूज्याऽऽज्यैः त्र्ययुतं जुहुयान् नृपः ।

सर्वत्र पूजयित्वाऽयं भुङ्क्ते राज्यम कण्टकम् ॥
एतत् कृत्वा पुरा शक्रोऽसुरान् च (रांश्च) जितवान् स्वयम् ।
होमाऽशक्तौ जपेत् पूजां तदशक्तौ जपेद् वुधः ॥
केवलं चिन्तयेदेनां जपाऽशक्तौ रणे ब्रजन् ।
नियतं जयमाप्नोति न विचार्य्यमिदं वचः ॥
अथवा मन्त्रमेतस्य हस्ते वध्वा रिपुं जयेत् ।
हेमपट्टगते पद्मे मध्ये मायां फडित्यपि ॥
दलेषु विलिखेदष्टौ मन्त्रमन्त्रान् पृथक् पृथक् ।
दलान्ते वर्मवीजानि मातृकाभिश्च वेष्टयेत् ॥
यन्त्रमेतत् करे वध्वा शूलिनं जेतुमीश्वरः ।
पूजयेद् विधिना यन्त्रं सहस्रं जुहुयाद् घृतैः ॥
तावदेव जपं कृत्वा यन्त्रं वध्वा रणे विशेत् ।
दुर्गा पीठेऽर्च्चयेद् दुर्गां विधिना विधिवित्तमः ॥
अतः परं महावीजं भद्रकाल्या निगद्यते ।
महावीजम् - यत् प्रसादान्महीपालो महान्तं जयमश्नुते ॥
हकारश्च सकारश्च खकारश्च ततः परम् ।
फकारश्च तथा रेफस्तथैकारः सविन्दुकः ॥
मन्त्रः - ॐ ह स ख फ्रैँ महावीजमन्त्रः ।
जयदायी महामन्त्रगणेष्वेषः महामनुः ॥
भद्रकाली महावीजमवश्यं विजयप्रदम् ।
भद्रसुखमिति प्रोक्तं तत् परंब्रह्म कीर्त्तितम् ॥
काली तमोमयी शक्तिः सा च संहारिणी स्मृता ।
संहारशक्ति संयुक्तं परंब्रह्म यदुच्यते ॥
भद्रकाली महावीजमपि तस्याऽभिधायकम् ।
हकारो वीज इत्युक्तः सकारो ब्रह्मकथ्यते ॥
तयोश्चैक्यं परंब्रह्म खकारेणाऽभिधीयते ।
फ्रैँ * स्यात् संहारिणीशक्तिः तत् प्रधानं हि चेतनम् ॥

* स्फेँ इति प्रत्यङ्गिरा

भद्रकालीपदेनाऽपि महावीजेन चोच्यते ।
सदा च शक्तिमद् ब्रह्म महावीर्य्यार्थमिष्यते ॥
संहर्त्ता च विधर्त्ता च स्थिति कर्त्ता च संस्मृतः ।
हंसः सोऽहं महावीजपदार्थं परिभावयन् ॥
महावीजं जपेन्मन्त्री स्वयं संहार शक्तिमान् ।
परमात्मा भवन् राजा जयमाप्नोति चाक्षयम् ॥
अथवा भद्रकालीव घोररूपा स्वयं भवेत् ।
महावीजं जपन् राजा जयमेति न शंसयः ॥
न होमो न बलिर्नार्च्चनं च तर्पणमिष्यते ।
ध्यानाज्जपाऽर्च्चनान् नूनं नृपतिर्जयमश्नुते ॥
भद्रकाली समं वीजं ध्यानं सम्यग् वदाम्यहम् ।
यत् प्रसादान्महादेवोऽप्यात्माऽभिमज्जयद् भृशम् ॥
ध्यानम् - काली रक्ताम्वराऽत्युच्च पीनश्रोणि पयोधरा ।
कृशोदरी महावीर्य्या त्रिजगद् ग्रसनक्षमा ॥
समराऽभिमुखी देवी चण्डिका चण्डविक्रमा ।
भीषणा शवपृष्ठस्था पद्गादन्तपदास्थिता ॥
पञ्चवक्त्र महादंष्ट्र विशत्या पीडितं रिपुम् ।
भूयो भूयः पीडयन्ती महाकोप भरेण च ॥
दक्षेऽधः क्रमतः शूलमङ्कुशं शरमेव च ।
खड्गं च दधती दोर्भिर्वामेऽधः क्रमतस्तथा ॥
रक्तपात्रं च पाशं च धनुः खेटकमेव च ।
एवं दशभुजा भीमा भद्रकाली जयप्रदा ॥

वि. द्र. - यतः पञ्चवक्त्रा ततः दशभुजा, किन्तुशस्त्रधारणस्थले अष्टभुजा इति।

ध्यातव्या भूमिपालेन संग्रामे जयमिच्छता ।
भद्रकाली महावीजं जपता प्राप्यते जयः ॥
ध्यानाऽशक्तोऽवनीपालः केवलं वीजमभ्यसेत् ।
तथापि जयमाप्नोति नाऽत्र कार्य्याविचारणा ॥
॥ इत्याङ्गिरसे भद्रकाली मन्त्रविधिः ॥

* अथ भद्रकाली महाप्रशंसा *

ऋषिरत्र न कश्चित् स्यान्न च छन्दोऽस्य विद्यते ।
देवता भद्रकाली स्यान्न वीजे वीजमिष्यते ॥
जये च विनियोगः स्यात् कराङ्गन्यासवर्जनम् ।
न चैव व्यापकन्यासो न च प्रत्यक्षरं भवेत् ॥
महाविद्या जपात् सद्यो नृपतिः जायमश्नुते ।
न पुरश्चरणं किञ्चित् न कश्चिन्नियमो भवेत् ॥
भद्रकाली स्वयं भूत्वा जपन् जयमवाप्स्यति ।
महेशोऽपि स च सर्वं जगत् संहरते यया ॥
तत् प्रसादान्महाराजो जयत्यत्र किमद्भुतम् ।
न भूतो न भवन् भावी महावीजसमो मनुः ॥

॥ इति भद्रकाली महाप्रशंसा ॥

* अथ भद्रकाली महावीजविधानम् *

अथात पिप्पलादेन पृष्टो महर्षिरङ्गिराः ।
भगवन् ! वेदतत्त्वज्ञ ! सर्वभूतहिते रतः ॥
सर्वेषामपि मन्त्राणां विधानं कथितं मम ।
भद्रकाली महावीजविधिर्न कथितः कथम् ॥

अङ्गिरा उवाच - भद्रकाली महेमन्त्रः जयैकफलदः मुने !
मन्त्रोच्चारणमत्रेण जयः स्यादधिकेन किम् ॥
तथापि त्वयि कारुण्याद् विधानमभिधीयते ।
ब्रह्मणोक्तेन विधिना यन्त्रं कुर्य्यात् प्रयत्नतः ॥

यन्त्रम् - सुवर्णशतमानेन निर्मितं यन्त्रमिष्यते ।(शतमाढेन वा)

वि. द्र. - अर्थादत्र प्रत्यङ्गिरा यन्त्रम् आवश्यकम् । तत्र सर्वं भवेत् ।

विल्यख्यान्तः महवीजं तस्याऽधो विलिखेत् फलम् ।
ततश्च विलिखेन्मन्त्री नवपत्रे नवाऽक्षरीम् ॥
तत एकादशदले मन्त्रमेकादशाक्षरीम् ।

ततः षोडशपत्रे च विलिखेत् षोडशस्वरान् ॥
व्यञ्जनानि लिखेन्मन्त्री पृथिवीमण्डले क्रमात् ।
एवं यन्त्रं विनिर्माय संपूज्य रिपुजिद् भवेत् ॥

नवाक्षरीमन्त्रः - ॐ भद्रकाली जयं देहि फट् ।

एकादशाक्षरीमन्त्रः - ॐ माया महाचण्डयोगेश्वरी फट् ॥

वहुभिर्गन्धपुष्पैश्च धूपदीपैर्निवेदितैः ।
भूयोभिर्महिषाजादिपशुभिः संस्कृतैः स्मिताम् ॥
भद्रकालीं यजेत् तत्र पश्चास्यां रिपुचर्वणाम् ।
उपासकप्रयत्नेषु सुक्रुद्धां शान्तरूपिणीम् ॥
सच्चिदानन्दरूपस्य माया शक्तिं वदन्ति याम् ।

होमविधिः - अथ होमं प्रवक्ष्येऽहं प्रवराऽरिनिवारणम् ॥
वृत्ते कुण्डेऽग्निमाधाय गन्धाद्यैरभिपूजयेत् ।
अष्टोत्तरसहस्रं तु जुहुयाद् गव्यसर्पिषा ॥
तावदेव जपेद् रात्रौ वलिं दद्याद् विधानतः ।
सप्ताहमेवं विधिना कृत्वा जयमवाप्नुयाद् ॥
द्वादशाहं तथा पक्षम् एकविंशतिवासरम् ।
मासं कार्य्यं विधानं वा होमकालोऽस्य षड्विधः ॥

यथा - एकदिवसं, सप्ताहं, द्वादशाहं, पक्षं, एकविंशतिदिवसं मासं च ।

तावद्वा सर्पिषाक्ताश्च अश्वत्थसमिधो हुनेत् ।
सर्पिरश्वत्थसमिद्भिः प्रत्येकं वा हुनेत् वुधः ॥
अथवा युद्धसमये सहस्रं सर्पिषा हुनेत् ।
जुहुयात् तावदेवासौ युद्धं यावद् दिनं भवेत् ॥
पट्टे मन्त्रं विलिख्याऽग्रे वंशदण्डे च धारयेत् ।
जयकामो नृपोयायादवश्यं जयमाप्नुयात् ॥
यन्त्रमेतद् यः स्वहस्ते वद्ध नीयात् जयमाप्नुयात् ।
अथवा युद्धसमये यन्त्रमेतत् स्वसन्निधौ ॥
केनचद्धारयेद् राजा लभते विजयं श्रियम् ।
यन्त्रं कृत्वा भद्रकाली प्रत्यहं यदि पूजयेत् ॥

पराजयं न लभते जयं च लभते सदा ।
अथवा ब्राह्मणद्वारा यन्त्रमेतत् प्रपूजयन् ॥
न पराजयमाप्नोति जयं चावश्यमश्नुते ।
प्रवलारिजयं काङ्क्षन् महीपालो विधानतः ॥
शुक्लायां नवम्यां वापि भद्रकाली व्रतं चरेत् ।
स्वपुत्रं वा स्वपत्नीं वा वान्धवान् वापि कारयेत् ॥
सम्वत्सरेण राजाऽयमजेयं जयमश्नुते ।(अजय्यं वा)
पिप्पलाद ! शृणु मम व्रतमेतज्जयप्रदम् ॥
शतमानेन यन्त्रं तु कृत्वा देवीं प्रपूजयेत् ।
पूपानष्टौ प्रकुर्वीत शालितण्डुलनिर्मितान् ॥
देव्यै निवेद्य विधिवद् एवं विप्राय यच्छति ।
ततो भुञ्जीतबिधिवत् सप्तपूपान् स्वयं व्रती ।
सुवर्ण्णं दक्षिणां दद्याद् गुरवे येन तुष्यति ॥
शत्रुं जेतुं नृपो गच्छन् तत्पूर्वदिवसे घृतैः ।
सहस्रत्रितयं हुत्वाधुवं विजयते रिपुम् ॥
स्वसैन्याऽऽलोकमात्रेण परसैन्यं पलायते ।
यजमानो नृपोऽश्वत्थसमिद्भिरयुतं हुनेत् ॥
रिपुं जेतुं नृपः सैन्यं प्रस्थापयति चेत्तदा ।
तत् सर्वं तु प्रकुर्वीत तत्सैन्यमरिजिद् भवेत् ॥
सहस्रं सर्पिषा हुत्वा संपात्याऽश्वत्थकीलके ।
परसेना स्थितस्थाने खात्वा जयमवाप्नुयात् ॥
सर्पिषाऽयुत होमेन खड्गं संपात्य यो नृपः ।
तमादाय परं जेतुं प्रयाति परमंजयेत् ॥
घृतस्यायुतहोमेन संपात्य शरपञ्चकम् ।
तत् क्षिपन् परसेनायां तां सेनां भञ्जयेन्नृपः ॥
यन्त्रं निर्माय विधिना मन्त्रेणाऽऽनेन मन्त्रवित् ।
स्नापयेद् घृततोयेन सहस्रं तु दिने दिने ॥
एवं फलान्तकं कर्म कालसंख्या न विद्यते ।

मन्त्रमेतं हृदिध्यात्वा युध्यमानो जयं व्रजेत् ॥
आश्विनस्य च मासस्य कृष्णपक्षस्य याऽष्टमी ।
तदारभ्य पूजेद् देवीं भवेद् यावद् महाष्टमी ॥
प्रातर्मध्याह्नयोः सायं त्रिकालं तां प्रपूजयेत् ।
विशेषं तु निशायां हि पूजयेत् पृथिवीपतिः ॥
त्र्ययुतं जुहुयाद् राजा सपत्नविजयेच्छया ।
निशायां होमसंप्राप्तौ बलिं दद्याद् दिने दिने ॥
महिषाऽजाऽऽविपशुभि भोज्यैः प्रतोषयेत् ।

वि. द्र. - आसुरीपूजाविधिहेतोः पशुबलिव्यवस्था वर्त्तते ॥

ततो महानवम्यां तु गन्धाद्यैर्वहुभिर्यजेत् ।
निशायां पूजयेद्देवीं श्रद्धाभक्तिसमन्वितः ॥
गन्धाद्यैरुपचारैश्च बलिभिर्नृत्यगीतकैः ।
तोषयेत् तां महादेवीं जयकामो महीपतिः ॥
एवं देवीं समाराध्य सुखं सम्वत्सरं वसेत् ।
नाऽरिः सम्मुखमायाति आगतोऽपि पलायते ॥
तस्माद् विजयकामो यः स एतत् कुरुते सदा ।

॥ इत्याङ्गिरसकल्पे भद्रकालीबलिमहाविधिः ॥

* अथ कर्मसमुच्चये षट्कर्माध्याये भूधरकृताऽऽसुरीदीपिका *

ऋष्यादिन्यासः - अथाऽऽसुरीमहामन्त्रस्य अङ्गिरा ऋषिः, त्रिष्टुप्छन्दः, आसुरी दुर्गा देवता इति शिरसि जिह्वायां हृदये च क्रमान् न्यसेत् । ततः प्राञ्जलिः ॐ वीजम्, आपः शक्तयः, श्रीप्रतिकृति दुर्गाऽधिष्ठात्री देवता, क्लीं कीलकं षट्कर्मसिद्ध्यर्थे विनियोगः इति चिन्तयेत् । मन्येऽहं - वीजं लिङ्गचक्रे, शक्तिः नाभिचक्रे न्यसेत् । यतः ग्रन्थेऽस्मिन् एतेषां स्थाननिर्द्देशो नास्ति । शरीरस्थितषट्सु चक्रेषु न्यासः कर्त्तव्यः ।

हस्तयोः व्यापकं न्यस्य करन्यासं विनिर्माय, हृदये व्यापकं न्यस्य अर्थात् करन्यासं षडङ्गन्यासं च कृत्वा आसनमनुष्ठाय पदन्यासं कुर्य्यात् आसुरी महामन्त्रे । शिरो ललाटभ्रूद्वय चक्षुःद्वय कर्ण्णद्वय

नासिकाद्वय घ्राणद्वय गण्डद्वय वदनजिह्वाचिवुकहृदयोदरनाभिलिङ्गेषु मन्त्र स्थित शयितस्य इति पर्य्यन्तं विंशति पदानि विन्यस्य अथवा शिरसः पृष्ठभागे सम्मुखभागे च, तथा वामदक्षिणललाटयोः, एवं च विंशति स्थानानि भविष्यन्ति । दक्षिणहस्तस्य सन्धिचतुष्टये अग्रभागे च, वामहस्तस्य सन्धिचतुष्टये अग्रे च, दक्षिणपादस्य सन्धिचतुष्टयेऽग्रे च, वामपादस्य सन्धिचतुष्टये अग्रे च स्वाहान्तानि विंशतिपदानि विन्यसेत् । एवं चत्वारिंशत् पदानि विन्यस्य प्रत्यक्षर न्यासं कुर्य्यात् । ॐ नमः कटुके ! इत्यादि, आसुरीमहामन्त्रस्य न्यासोऽयम् ॥

अथ प्रत्यक्षरं न्यासं प्रवक्ष्यामि महामनोः ।
येन विन्यासमात्रेणाऽसाध्यं साधयति द्विजः ॥
शिरोललाटयोश्चैव भ्रुवोश्चैव तदन्तरम् ।
चक्षुषोर्नासिकादण्डे घ्राणयोर्गण्डयोस्तथा ॥
कर्ण्णयोरन्तराले च मुखजिह्वाऽधरेषु च ।
चिवुके सर्वकेशेषु शिखायाञ्च प्रविन्यसेत् ॥
कण्ठे चैवाऽपरगले कण्ठकूपे ककुद्यपि ।
दक्षिणस्कन्धके हस्तसन्धिषट्केऽग्र पञ्चके ॥
वामस्कन्धादिकेऽप्येवं स्थानद्वादशके हृदि ।
पिङ्गलायामिलायाञ्च सुषुम्नायां स्तनद्वये ॥
उदरपार्श्वे च नाभौ कुण्डलिन्याञ्च लिङ्गके ।
तन्मध्याऽऽधारयोः पायौ तन्मध्येऽप्यत्रेमान्न्यसेत् ॥
पादसन्धिचतुष्के च तन्मध्येषु त्रिषु क्रमात् ।
अङ्गुलि सन्धिदशके अग्रे पञ्चक एव च ॥
इत्थं द्वाविंशति स्थाने वामपादेऽपि विन्यसेत् ।
देवता मन्त्रयोरैक्यं प्रतिशब्दं महामतिः ॥
देहे प्रत्यक्षरं न्यस्य भवति स्वयमासुरी ।
न्यासमूलमिदं सर्वं जपहोमाऽर्च्चनादिकम् ॥
न्यासं विना तु यत्कर्म नैव तत् फलदं भवेत् ।
अथर्ववेदतत्त्वज्ञः पिप्पलादो महामुनिः ॥

आसुरीनाम मन्त्रस्य न्यासस्थानान्यभाषत ।
एवं प्रत्यक्षरं न्यस्य व्यापकं न्यासमाचरेत् ॥
हृत्पद्मे आसुरीं ध्यात्वा अन्तर्जातां प्रकल्पयेत् ।
हृद्गता देवताः सर्वा इति शास्त्रेषु दर्शनात् ॥

वि. द्र. – आसुरीमहामन्त्रे १०८ अक्षराणि सन्ति । ततः १०८ स्थानेषु न्यसेत् ।

हृत्पद्मम् – नाभिमूलोत्थितं पद्मं नालं तस्य दशाङ्गुलम् ।
कोमलं तस्य यन्नालं निम्नं पद्ममधोमुखम् ॥
पद्मं किं जल्क सदृशं तप्तकाञ्चन सन्निभम् ।

दग्बन्धनादि – ॐ महाचक्राय स्वाहा । ज्वालाय सर्वतो रक्ष मां महार्थाय स्वाहा । इति मन्त्रेण तालत्रयमूर्द्ध्वाधः क्रमेण कृत्वा ॐ ऐन्द्रीं दिशं चक्रेण बध्नामि नमश्चक्राय स्वाहा इत्यादि मन्त्रैः दशदिग्बन्धनं कृत्वा ॐ त्रैलोक्यं रक्ष रक्ष हुं फट् स्वाहा इत्यग्निप्रकारमन्त्रेणाऽग्निप्रकारं विचिन्तयेत् । अर्थात् कर्माऽनुसृत्य अग्निं पूजयेत् । यथा – अभिचारेषु सर्वत्र क्रोधाऽग्निः संप्रकीर्त्तितः । अथवा ॐ असपत्नमिति ऋचौ जपेत् । रक्षाकरण मन्त्रौ –

पै. सं. का–१३/३ – ॐ असपत्नं पुरस्तात् पश्चान्नो अभयं कृतम् ।
सविता मा दक्षिणत उत्तरान्मा शचीपतिः ।१।
ॐ दिवो माऽऽदित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः ।
इन्द्राग्नी रक्षतां मा पुरस्ताद् अश्विनावभितः शर्म यच्छताम् ।
तिरश्चीनाऽघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म ।२ ।

गुरुं गणपतिं मुख्य देवतां च नमस्कृत्य ॐ पृथिवी शान्तिरित्यृचं पठित्वा प्रणवस्य अर्थाद् ॐ कारस्य प्रजापतिः ऋषिः देवी गायत्री छन्दः परमात्मा देवता सर्वकर्मारम्भे विनियोगः । इति स्मृत्वा प्रणवैः द्वात्रिंशत् संख्यकैः पूरकं चतुःषष्टि संख्यकैः कुम्भकं षोडशसंख्यकैः रेचकमिति प्राणायामत्रयं कुर्य्यात् । अथवा रेचकादिक्रमेण कुर्य्यात् । अथ स प्रणवव्याहृतीः, सा गायत्रीशिरोमन्त्रैः प्राणायामत्रयं कुर्य्यात् । यथा – ॐ गायत्रीशिरसः प्रजापतिः ऋषिः, अथवा मूलमन्त्रेण सकृज्जप्तेन त्रिः प्राणायामत्रयं कुर्य्यात् । ततः अस्त्रमन्त्रेण ॐ हः अस्त्राय फट् इति गन्धपुष्पेणाऽन्योन्यघर्षणात् मन्त्रैः

सह इत्यर्थः, करशुद्धिं कुर्य्यात् । अथवा मूलेन करौ षड्वारं शोधयेत् । ततो भूतशुद्धिं कुर्य्यात् । नत्वा पुनः तालत्रयं, दिग्बन्धनं मातृकाऽस्त्रेण कृत्वा प्राणानायम्य मातृकान्यासादि न्यासं वीजशक्तिविनियोगान् विधाय कराङ्गन्यासं प्रत्यक्षरं करन्यासं व्यापन्यासान् निर्माय हृत्पद्मे मातृकां ध्यात्वाऽभेदं भावयित्वा मातृकामन्त्रमष्टधा जपेत् । अथ भावना चतुष्टयं कुर्य्यात् मूलाऽऽधाराद्नाभिपर्य्यन्तम् । १ - आधारभावना, २ - हृदयभावना, ३ - हस्तभावना, ४ - देवभावना च ।

आधारभावना यथा - ॐ मण्डूकाय नमः, ॐ कालाऽग्निरुद्राय नमः, ॐ कूर्माय नमः, ॐ आधारशक्तये नमः, एवमुपर्य्युपरि क्रमेण ॐ वाराहाय नमः, ॐ पृथिव्यै नमः, ॐ हयग्रीवाय नमः, ॐ क्षीरार्ण्णवाय नमः, ॐ रत्नद्वीपाय नमः, ॐ मणिपाण्डराय नमः, ॐ मणिमण्डपाय नमः, ॐ रत्नवेदिकायै नमः, ॐ कल्पद्रुमाय नमः, ॐ सर्वत भद्रकालाय नमः, ॐ रत्नसिंहाय नमः । दक्षिणस्कन्धे - ॐ धर्माय नमः । वामस्कन्धे - ॐ ज्ञानाय नमः, दक्षिणोरौ - ॐ ऐश्वर्य्याय नमः, वामोरौ - ॐ वैरागाय नमः, मुखे ॐ अधर्माय नमः, वामपार्श्वे ॐ अज्ञानाय नमः, नाभौ ॐ अवैरागाय नमः, दक्षिणपार्श्वे - ॐ अनैश्वर्य्याय नमः, नाभेरूद्ध्वे ॐ अनन्ताय नमः, नाभिमूले आनन्दकन्दलाय नमः, हृदि ॐ पद्माय नमः, ॐ पत्रेभ्यो नमः, ॐ केशरेभ्यो नमः, ॐ कर्ण्णिकायै नमः, कर्ण्णिकोपर्य्युपरि ॐ अंशुपिमण्डलाय नमः, ॐ ऊं सोममण्डलाय नमः, ॐ शं वह्निमण्डलाय नमः, ॐ सं सत्वाय नमः, ॐ रं रजसे नमः, ॐ तं तमसे नमः, ॐ आं आत्मने नमः, ॐ अं अन्तरात्मने नमः, ॐ पं परात्मने नमः, ॐ क्रीं ज्ञानात्मने नमः, ॐ कालतत्त्वाय नमः, ॐ माया तत्त्वाय नमः, ॐ विद्यातत्त्वाय नमः, ॐ परं तत्त्वाय नमः, ततः पद्मकेशरेषु पूर्वादिक्रमेण ।

शक्तिन्यासः - ॐ प्रभायै नमः ॐ मायायै नमः, ॐ जयायै नमः, ॐ सूक्ष्मायै नमः, ॐ विशुद्धायै नमः, ॐ नन्दितायै नमः, ॐ सुभद्रायै नमः, ॐ विजयायै नमः, मध्ये तु ॐ सर्व सिद्धिप्रदायै नमः, इति शक्तिन्यासानन्तरं ॐ बज्रनख-दंष्ट्राऽऽयुधाय महासिंहाय हुं फट् नमः, इति

सिंहमन्त्रेण कर्ण्णिकामासुरीपीठम् इति परिकल्पलेत् । एषाऽऽधार भावना ।१।

अथ हृदयभावना - ॐ परमेश्वर सन्निधानात् मायाविकारात् स्थूलसूक्ष्मपरमतत्त्वभेदेन त्रिधाविभक्ताद् उत्पन्नाद् वीजागतशब्दब्रह्मणः प्रादुर्भूतं ताराकारं ॐ कारं सर्वमन्त्रवीजभूतं विचिन्त्य तस्मात् सम्भूतं आसुरीमन्त्रं विद्युत्पुञ्जमिव संचिन्तयेत् । एषा हृदयभावना ।२।

तत् तेजोसो दीपाद्दीपान्तरमिव तेजोऽन्तरं निर्गतं स्वहस्तयोर्विन्यस्य करन्यासं विदध्यात् । एषा हस्तभावना ।३।

तत् तेजयुक्तहस्ताभ्यां व्यापकन्यासमुभयमन्त्रेण व्यापकं विन्यस्याऽङ्गन्यासं कुर्वीत, एषा देवभावना ।४। इति भावनाचतुष्टयं न्यासरूपम् ॥

अथ आसुरीमन्त्रस्य अङ्गिरा ऋषिः इत्यारभ्य तप्तकाञ्चनसुप्रभं यावत् सर्वं कृत्वा निम्नोक्तध्यानंध्यायेत् ।

ध्यानम् - कदलीपुष्पसङ्काशं चन्द्रकान्तिसमप्रभम् ।
विशालदलसंपर्ण्णं चारुहासं सुनिर्मलम् ॥
अधोमुखं तं हृत्पद्मम् उद्धृत्य प्रणवेन तु ।
गत्वा तु पद्मकोशं विकासो व्याहृतिभिः पुनः ॥
ततः पश्चाद् भवेत् पद्मं सर्वशास्त्रसुखावहम् ।

हृत्पद्मम् - अष्टपत्रं तु हृत्पद्मं द्वात्रिंशत् केशरं तथा ॥
तस्य मध्ये स्थिता ध्येया इन्द्राद्या दशदेवताः ।
तत्र मध्यगतो भानुः भानोर्मध्यगतः शशी ॥
शशिमध्यगतो वह्निः वह्नेर्मध्यगता प्रभा ।
प्रभामध्यगतं पीठं नानारत्नप्रवेष्टितम् ॥
अनेकरत्नसंकीर्ण्णं ज्वलनार्कसमप्रभम् ।

एवं ध्यानान्ते हृत्पद्मे कर्ण्णिकायाम् ईश्वरस्य मायाशक्तित्वेन नित्यसन्निहितामासुरीमाभिमुर्खी कृत्वा (आभिमुख्याय) मूलमन्त्रेणाऽऽवाह्य यथोक्तलक्षणाऽङ्गुष्ठपर्वमात्रीं स्वसम्मुखमासीनामेनां

ध्यात्वा निम्नमन्त्रं पठेत्।

स्वागतं देवदेवेशि ! भवसान्निध्यमासुरि !
गृहाणमानसीं पूजां यथार्थ परिभाषिताम् ॥

ततः वहिर्जन्मा इव परमाऽमृतोद्भूतैर्मानसैरभ्यर्च्चयेत् । ततो योनिमुद्रां कृत्वा प्रणवसंपूटितं मूलमन्त्रं प्लुतमुच्चार्य्य शुद्धाऽऽत्मना यथाशक्ति जपेत् । तत्रोक्तम् -

अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा ।
(शिरस् अप्राः)

जपविषये - प्रजल्पन्(प्रलूपन्) वा जपेद् यावत् तावन्निष्फलमुच्यते ।
सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत् ॥
प्रोक्ते वाऽमरवाण्यापि प्राणायामं सकृच्चरेत् । वर्त्तते ।

मन्ये - प्रोक्तायां देववाण्यां च प्राणायामं सकृच्चरेत् ।
वहुप्रकारमाचम्य यत् स्वाङ्गानि ततो जपेत् ॥
युतेऽप्येवं तथा स्पृश्यस्थानानां स्पर्शनं भवेत् ।

मन्त्रोक्तदेवतामभीष्टामतिफलप्रयच्छन्तीं ध्यायन् जपेत् ।

* अथ वहिः पूजा *

जलसंस्कारः - तत्राऽर्घ्यपात्रम् । वरुणदेवताऽत्र । ॐ अव्यसश्चेति मन्त्रमुक्त्वा ॐ सम्मासिञ्चन्तु मरुतः इत्यृचा पुरः भूमौ सिक्त्वा स्थण्डिलमुपलिप्य ॐ इन्द्र सीतामिति कृत्वा कुशासनं दत्वा शङ्खाधारं निधाय प्रणवेन शङ्खं प्रक्ष्याल्य ॐ वाताज्जात इति मन्त्रेण शङ्खं निधाय ॐ शंनोदेवीरिति जलं दत्त्वा ॐ यस्ते गन्ध इति गन्धं ॐ श्रियं धातुरिति पुष्पञ्च ॐ आयने ते परायणे मन्त्रेण दूर्वाक्षतं दत्त्वा मूलमन्त्रेण -

ॐ वरुणाय विद्महे पाशहस्ताय धीमहि ।
धियो यो नः प्रचोदयात् ॥ मन्त्रेण मन्त्रयेत् ॥

अथ ॐ गङ्गे च यमुने चैव इति तीर्थमन्त्रेण अङ्कुशमुद्रया गङ्गादीनि सप्ततीर्थानि आनीय अङ्कुशमुद्रया वामपार्श्वे स्थितायां पुरः परिषिञ्च्याऽवलिप्य

चतुरस्रमण्डलं प्रकल्प्य तत्र आग्नेयां हृदयेन पूरयित्वा शिरसि नैर्ऋत्यां शिखायां वायव्यां कवचेनैशान्यां नेत्रेण पुरतः अस्त्रेण प्राच्यां दिशि जलपूर्णकर्कर्य्यामावाह्य संपुर्ण्णेन कवचेन अवगुण्ठ्य अस्त्रेण तालत्रयं दिग्बन्धनं विधाय धेनुमुद्रया अमृतीकृत्य चक्रमुद्रयाऽभिरक्ष्य मूलमन्त्रेण तान् अनुमन्त्रयेत् । इति जलसंस्कारः ।

ततो मूलमन्त्रेण तज्जलेन पुरः परिषेचनं विलेपनं च कृत्वा चतुरस्रं मण्डलं परिकल्प्य, ततः आग्नेय्यां हृदयेन पूजयित्वा शिरसा नैर्ऋत्यां शिखया वायव्यां कवचेनैशान्यां नेत्रेण पुरतः अस्त्रमन्त्रेण प्राचीदिक्षु च तिसृषु दिक्षु ॐ पूजयेत् । ततः शङ्खाऽऽधारं प्रणवेन प्रक्ष्याल्य निधाय तत्र शङ्खं ॐ दशकलात्मने वह्निमण्डलाय नमः, इति संपूज्य ततः शङ्खं प्रणवेन प्रक्ष्याल्याऽष्टधाजप्त्वा पुनः अस्त्रेण प्रक्ष्याल्य शङ्खाधारे निधाय ॐ अं द्वादशकलात्मने सूर्य्यमण्डलाय नमः, इत्यभ्यर्च्च्य ॐ वम् इति अमृतवीजेन जलेन मूलेन मन्त्रेण वा जलं पूरयित्वा ॐ ऊं षोडश कलात्मने सोममण्डलाय नमः इति जलं प्रपूज्य तत्र तेजो रूपां मूलदेवतां हृत्पद्मात् दक्षिणनासारन्ध्रेणाऽऽवाह्य हृदयेन गन्धं शिरसा पुष्पं दत्त्वा शिखया तेजोमयं संस्मृत्य कवचेनाऽवगुण्ठ्य नेत्रेण चिन्मयं ध्यात्वा अस्त्रेण तालत्रयं दिग्बन्धनं कृत्वा पूर्ववद् अङ्गैः पूयिजत्वा धेनुमुद्रयाऽमृती कृत्य चक्रमुद्रयाऽभिरक्ष्य मूलेन दूर्वाऽक्षतादि दत्त्वा अष्टधाऽभिमन्त्र्य क्षितौ किञ्चिन्निक्षिपेत् तज्जलं । तेनाऽऽत्मानं मण्डलदेवतां च सिक्त्वा गन्धपुष्पादिके द्रव्ये प्रोक्षणाऽर्च्चनरक्षणाऽवगुण्ठनचक्रमुद्रादर्शाऽभिमन्त्रणानिकृत्वा मूलेन तिलकं कृत्वा मूर्द्धनि पुष्पं दद्यात् । अथवा ॐ आत्मने नमः, इति तिलकं पुष्पं च दद्यात् । ॐ कमलासनाय नमः इति स्वासने कुसुमं दत्त्वा पूर्वोक्त षडङ्गन्यासक्रमेण मण्डूकादि* पीठान्तान् देवान् सगन्धपुष्पेण पूजयेत् । ततः स्वदेहं देवं भावयित्वा शिरसि हृदये आधारे पाद द्वये सर्वाङ्गे च पञ्चपुष्पाञ्जलीः मूलेन मन्त्रेण प्रयच्छेत् । अथवा शिरसि नाभौ पादे च पूजयेत् । एषाऽऽत्मपूजा।

* वि. द्र. - मण्डूकम् - हृदयम्

* अथ वहिर्यागः - प्राणप्रतिष्ठा *

तत्र अनुज्ञां देहि भगवति ! वहिर्यागे मम प्रभो ! इति प्रार्थी वामे पार्श्वे दक्षिणादुत्तरान्तं ॐ गुरुपादुकाभ्यो नमः ॐ परमगुरुभ्यो नमः ॐ परमगुरुपादुकाभ्यो नमः ॐ परात्परगुरुभ्यो नमः ॐ परात्परगुरुपादुकाभ्यो नमः, इति गुरुपंक्तिं संपूज्य दक्षिणे उत्तरादि दक्षिणाक्रमेण ॐ आचार्य्येभ्यो नमः, ॐ परमसिद्धेभ्यो नमः, ॐ दुर्गायै नमः, ॐ गणपतये नमः ह्रीं सरस्वत्यै नमः इति अभ्यर्च्च्य मध्ये ॐ वास्तुपुरुषाय नमः इतीष्ट्वा पूर्ववत् मण्डूकादि पीठान्तं पूजयेत् । अत्र विशेषः खट्वायां आग्नेय्यादिषु चतुर्षु पादेषु धर्मादयः पूज्याः । पूर्वादिषु चतसृषु दिक्षु अधर्मादयः पूज्याः । मध्ये उपर्य्युपरि क्रमेण अनन्तादयः । अन्यत् सर्वं पूर्ववत् । ततोऽत्र सौवर्ण्णप्रतिमां राजतीं वा अन्यां वा संस्थाप्य ॐ अस्त्राय फट् इत्यस्त्रमन्त्रेण संप्रोक्ष्य देवताहृदयं स्पृष्ट्वा देवतामूलमन्त्रं जप्त्वा देवतां शोधयेत् । ततो पुनः मूलमन्त्रं प्लुतमुच्चार्य्य स्वहृत् पद्मात् तेजोराशिं दीपाद् दीपान्तरमिव दक्षिणघ्राणरन्ध्रे अथाद् रेचकेन नीत्वा पुष्पाञ्जलौ निवेश्य प्रतिमावामनासापुटेन प्रवेश्य हृत्पद्मे स्थापयेत् । अकृत प्राणप्रतिष्ठायां प्रतिमायां तु अमुष्य इति स्थाने देवता नाम योजयित्वा प्राणमन्त्रं प्रतिमाहृदयं स्पृष्ट्वा जपेत् ।

ततः - एह्येहि भगवत्यस्मल्लोकानुग्रहकारिके !
यज्ञभागं गृहाणेमं महादेवि नमोऽस्तुते ॥

इति आवाहन्या मुद्रयाऽऽवाह्य अत्र तिष्ठ, इति संस्थापन्या स्थापयित्वा सन्निहिता भव, सन्निहिता भव इति सन्निधान्या मुद्रया सान्निध्य आकर्मकाण्डं अत्र सन्निरुद्धा भव इति सन्निरोधिन्या सन्निरोध्य प्रतिमायां षडङ्गन्यासं कुर्य्यात् ।

देवताऽङ्गे षडङ्गं स्यात् सकलीकरणं स्मृतम् ।

सकलीकरणाख्यं कृत्वा कवचेनाऽवगुण्ठन्याऽवगुण्ठस्य धेनु मुद्रयाऽमृतीकृत्य व्यापकन्यासं त्रिः कुर्य्यात् । ततो निजमुद्राः - देव्या निजमुद्राः - लिङ्गमुद्रा योनिमुद्रा व्यापिनी छत्रकं गदा ।
घण्टादण्डं खेटकञ्च शूलं चक्रं शरं धनुः ॥
खड्गवीणे पद्मशंखौ मुद्राः षोडश कीर्त्तिता ।

एताः प्रदर्श्य वहिर्ध्यात्वा उपचारैः पूजयेत् । तत्र त्रिविधा पूजा - तथाहि षोडशोपचारिका, दशोपचारिका पञ्चपोचारकिा च । तच्च पञ्चोपचारपक्षे "ॐ यस्ते गन्धः" इति तिसृभिः गन्धं गृहीत्वा मूलमन्त्रमुच्चार्य्य अर्थाद् भगवत्याऽऽसुरी मन्त्रेण गन्धं हृदये प्रतिमायाः दद्यात् । एवं च क्रमेण ॐ श्रियं धातुरिति सूक्तेन पुष्पं मूर्द्धनि माल्यं च गले, दत्त्वा सगन्धपुष्पेण आवरणदेवताः पूजयेत् । पद्मदलकेशरेष्वङ्गानि दलमूलेऽर्घ्याद्या दलमध्येऽर्घ्याद्या दलान्ते ब्रह्माद्या दलवाह्ये दिक्पलाद्याः तद्वाह्ये तदस्त्राणि एवं षडावरणानि पूजयेत् । अथाऽऽवरणपूजा मन्त्रा उच्यन्ते -

हारस्फटिकपीताभाः कृष्णपिङ्गाऽग्निरोचिषः ।
वरदाऽभयहस्तास्ताः प्रधानतनवः स्त्रियः ॥
इत्यङ्गदेवतारूपं चिन्तयेदर्च्चनाविधौ ।

अर्घ्यमथाऽत्रोक्तस्थानेषु, ॐ नमः कटुके कटुकपत्रे ! हृदयाय नमः । सुभगे ! आसुरि ! रक्तवाससे ! शिरसे स्वाहा । आथर्वणस्य दुहित्रे ! शिखायै वषट् । घोरे ! घोरकर्मणः कारिके ! कवचाय हुं । अमुकस्य (इति नाम) प्रस्थितस्य गतिं दह उपविष्टस्य भगं दह शयितस्य मनो दह, प्रवृद्धस्य हृदयं दह, नेत्राभ्यां वौषट्, हनहन दह दह पच पच मथ मथ, तावद् दह यावन्मे वशमागछति स्वाहा अस्त्राय फट् । ॐ आर्य्यायै नमः, ॐ दुर्गायै नमः, ॐ भद्रायै नमः, ॐ भद्रकाल्यै नमः, ॐ अम्बिकायै नमः, ॐ क्षमायै नमः, ॐ वेदगर्भायै नमः, ॐ क्षेमङ्कर्यै नमः, ॐ अपरायै नमः, ॐ दराय नमः, ॐ कृपाणाय नमः, ॐ खेटकाय नमः, ॐ वाणाय नमः, ॐ धनुषे नमः, ॐ शूलाय नमः, ॐ कपालाय नमः, ॐ ब्रह्माण्यै नमः, ॐ माहेश्वर्य्यै नमः, ॐ कौमार्य्यै नमः, ॐ बैष्णव्यै नमः, ॐ इन्द्राण्यै नमः, ॐ चामुण्डायै नमः, ॐ महालक्ष्म्यै नमः, ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुवेराय नमः, ॐ ईशानाय नमः, ॐ अनन्ताय नमः, ॐ ब्रह्मणे नमः, ॐ बज्राय नमः, ॐ शक्तये नमः, ॐ दण्डाय नमः, ॐ खड्गायनमः, ॐ पाशाय नमः, ॐ अङ्कुशाय नमः, ॐ गदाय नमः, ॐ शूलाय नमः, ॐ चक्राय नमः, ॐ पद्माय नमः । ततो मूलदेवतायै प्रकृतकुसुमं दत्त्वा धूपदीपनैवेद्यादीन्

निवेदयत् ।

ॐ गर्जद्वनिमत्तमात्तङ्गः स्वाहा, इति मन्त्रेण घण्टां पूजयित्वा अथ घण्टामस्त्रेण संपूज्य हृदयेनाऽर्च्चयित्वा कवचेनावगुण्ठ्याऽस्त्रेण तालत्रयं दिग्बन्धनं कृत्वा धनुमुद्रां प्रदर्श्य चक्रमुद्रयाऽभिरक्ष्याऽर्घ्यपात्रात् सपुष्पजलं गृहीत्वा ॐ न तं यक्ष्मेति सूक्तं पठित्वा मूलमन्त्रमधीत्य अर्थात् भगवत्यासुरीमन्त्रे धूपं ददानीति पठित्वा धूपं घ्राणं प्रति दद्यात् । तत आचम्य ॐ यो विश्वतः इत्यृचं पठित्वा पूर्ववद् भगवत्यासुरीमन्त्रे दीपं ददानि इति दीपं लोचनेऽमृर्ती कृत्याभिरक्षाऽभिमन्त्रयेत् । अथ धूपालये तप्ताऽङ्गाराह्निक्षिप्या गुरुप्रभृतीन् निधाय तस्मिन् धूमायमानेऽर्घ्यजलेनास्त्रेण संप्रोक्ष्य हृदयेन प्रपूज्य कवचेनाऽवगुण्ठ्याऽस्त्रेण तालत्रयं दिग्बन्धनं कृत्वा धेनुमुद्रां प्रदर्श्य चक्रमुद्रयाऽभिरक्षाऽर्घ्यपात्रात् सपुष्पजलं गृहीत्वा ॐ न तं यक्ष्मेति सूक्तं पठित्वा पूर्ववद् धूपं दद्यात् ? मन्ये सकृद् दद्यात् । देवतायाः समीपे दर्शनविषयाऽग्रे नानाविधं नैवेद्यं संस्थाप्य नेत्रेण निरीक्ष्य अस्त्रेण प्रोक्ष्य शिखया संताड्य पुनरस्त्रेणाऽभ्युक्ष्य हृदयेनाऽऽकृष्य (दोषं वां पच्य, एतत् किम् ?) तोयेन परिशोष्य अग्निहस्तेन संदह्याऽमृतवीजेन वामकरेणाऽऽप्लाव्य कवचेनाऽवगुण्ठ्यास्त्रेण तालत्रयं विधाय मूलेन मन्त्रेणाऽमृतीकृत्य चक्रमुद्रयाभिमृष्य गन्धादिभिः संपूज्य देवतां पुष्पाञ्जलिनाऽभ्यर्च्च्यार्घ्यपात्रात् सपुष्पजलमादाय वीजं मूलमन्त्रं स्वाहान्तम् उच्चार्य्य भगवत्यासुरि ! एतन्नानाविधं नैवेद्यं तुभ्यं ददानीति तज्जलं नैवेद्ये निक्षिपेत् । आपोशानं दत्त्वा अर्थाद् गोकर्ण्णवत् पाणिना जलं नैवेद्य चतुस्पार्श्वे दत्त्वा, ॐ देवस्य त्वा मन्त्रेण ब्रह्मणः स्थाने यथादैवतं योजयित्वा सकुसुमेन दोर्चयेन हस्तेन इत्यर्थः, देवतामुखान् मनसा तेजः प्रसार्य्य तेन तेजसाऽमृतं नैवेद्यमुद्धृत्य त्रिवारं समर्पयेत् । "अग्निना मुखेन वै देवा अश्नन्ति पिवन्ति च एतदेवामृतं दृष्ट्वा तृप्यन्तीति श्रुतेः", निवेदयामि भगवत्यै जुषाणेदं हविः शिवे ! इति मन्त्रेण नैवेद्यं समर्पयेत् । ततः वामहस्तेन ग्रासमुद्रां दक्षिणहस्तेन प्राणादिपञ्चमुद्राः प्रदर्शयन् तन्मन्त्रान् संजप्य जपं निवेद्यतदाऽऽस्वादुतृप्ता इति विचिन्त्य भूयो निजमुद्राः = तद्देवता मुद्रा इत्यर्थः प्रकट्य पुष्पाञ्जलित्रयं पुनः प्रदाय मूलमन्त्रं किञ्चिद् दशांशेनाऽङ्गमन्त्रान् संजप्य "ॐ

गुह्यातिगुह्यगोप्तत्वं गृहाणाऽस्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि ! त्वत् प्रसादात् त्वयि स्थिता, इति मन्त्रेण अर्घ्यपात्रात् सकुसुममुदकमादाय देवतादक्षिणहस्ते दत्त्वा जपं निवेदयेत् । भगवत्यासुरि ! तुभ्यमाचमनीयं ददानीति, आचमनीयं दत्त्वा करघृष्टि मुखवस्त्रं कर्पूरताम्वुलानि दत्त्वा आरात्री नीराजनाऽऽदर्श छत्रचामरादि राजोपचारान् मूलमन्त्रेण प्रदाय अष्टोत्तर शतं जप्त्वा निवेद्य होमं विधाय संस्तुत्य प्रदक्षिणी कृत्य दूर्वाक्षतं मूलेन सूक्तेन वा दत्वा प्रसादं मस्तके गृहीत्वा -

मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वरि !
यत् पूजितं मयादेवि ! परिपूर्णं तदस्तुमे ॥

इति हीन पूरण मावेद्य संभाष्य भगवत्यासुरि ! पराङ्मुखार्घ्यं स्वाहा, इति अर्घ्यजलं पाययित्वा पिशुनायै मातङ्ग्यै वा निवेदितं समर्प्य देवतायां परिचारान् संहृत्य क्षमस्वेति संहारिण्या मुद्रया देवतां तेजोरूपां वामनासारन्ध्रेण प्रवेश्य स्वहृदये स्थापयेत् । कराङ्ग न्यासं कृत्वा त्रिः प्राणानायम्याच्छिद्रा-वधार्य्य ॐ यस्मात् कोषादिति आत्मनो हृदयमनुमन्त्रयेत् । मन्त्राः मत् प्रकाशित पैप्पलादविवाहादिसंस्कारपद्धतिग्रन्थे सन्तिः ।

॥ इति आसुरी पूजाविधिः ॥

* अथ होमविधानमभिधीयते *

तत्र पञ्चब्राह्मणाः कर्मनिर्वाहकाः । तेष्वप्येकः आचार्य्यः । अपरो ब्रह्मा । अन्यः पृष्टप्रतिवक्ता । इतरो मन्त्र निश्चायकः, अपरो द्रव्योपकल्पकः । तथा च - पैठीनसिः -

एकः कर्मणि युक्तः स्यादेको द्रव्योपकल्पकः ।
एकः पृष्ठः (पृष्टः सन्) प्रतिव्रूयात् एको मन्त्रस्य निश्चये ॥

वृहस्पते ! यज्ञं पाहीति ब्रह्मजपविधानात् ब्रह्मा सिद्धम् । तदेव मे तन्मते पञ्च एव ब्राह्मणाः । अथवा - आचार्य्यब्रह्माणौ द्वावेव वृत्तौ । उक्तं च "आसुरीकल्पे" - सङ्कल्प्य प्रथमावृत्तिं वृणुयाद्धोमकारिणौ ।
आचार्य्यं वृणुयात् पूर्वं ब्रह्माणं तदनन्तरम् ॥ इति ॥

यद् वा - एक एव विद्वान् कर्त्ता, ब्रह्मा पुनरुदपात्रम् ।

"वचनं वैतानकल्पे" - अन्यं ब्राह्मणं अनुचानमुपवेश्यमुदपात्रं वा इति । एवं आथर्वण कर्मणि त्रिविधा ब्राह्मणव्यवस्था ।

अथ संकल्पः - आसने प्राङ्मुखोपविष्टः यजमानः प्राणायामं विधाय उदपात्रं गन्धपुष्पदूर्वाक्षत नारिकेलफलसहितमादाय हृदि नारायणं विचिन्त्य ॐ अद्य ब्रह्मणो द्वितीयपरार्द्धे श्वेतवराहकल्पे वैवस्वतमनोरष्टाविंशति तमचतुर्युगस्य कलेरे तावत् परिमितेऽद्धे अमुकायने अमुकर्त्तौ अमुके मासि अमुके पक्षे अमुकस्यां तिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते सवतरि अमुकराशिस्थिते चन्द्रमसि एवं यथास्थानाऽवस्थितेषु भौमादिग्रह-योगलब्नकरणमुहूर्त्तकांशकेषु एवं विधि विशेषणविशिष्टायां पुण्यतिथौ इह पृथिव्यां जम्वुद्वीपे भरतखण्डे भारतवर्षे उत्कलप्रदेशे इह विशिष्ट भूप्रदेशे अमुकस गोत्रः अमुकदेवशर्मा, वर्मा वा राजा मम अमुकफलार्थं अमुककल्पोक्तेन विधिना पूजा अत्र आसुरीकल्पोक्तेना विधिना भविष्यति । अथर्ववेदान्तर्गताऽ-मुकमन्त्रेण अर्थादासुरीमन्त्रेण अमुककर्मणे अर्थाद् वशादिकर्मणे स्वयं कर्मकर्त्तुमक्षमः सन् आचार्य्यद्वारा करिष्ये । इति वाक्यमुच्चार्य्य सङ्कलपयेत् । अत्र सङ्कल्पसूत्रं पठेत् ।

* अथाचार्य्यादिवरणम् *

अद्येह इत्यादि पूर्वोक्तविशेषणविशिष्टायां पुण्यतिथौ अमुकसगोत्रम् अथर्ववेदान्तर्गन्त पिप्पलादशाखाध्यायिनम् अमुकशर्म्माणं ब्राह्मणम् अमुकसगोत्रः अमुकदेवशर्मा राजा मम अमुकफलार्थं सङ्कल्पितैतद् अमुककल्पोक्तं मम कर्मकर्त्तुम् अनेन वासोयुगलेन गन्धपुष्पताम्वुलसौवर्ण्ण-कुण्डलमुद्रिकानारिकेलफलसहितेन आचार्य्यत्वेन त्वामहं वृणे । इति यजमाने उक्ते वृतोऽस्मि, इति आचार्य्यस्य प्रतिवचनम् । एवं अन्येषां ब्राह्मणानां वरणवाक्यम् ऊहनीयम् ।

* अथ मारणादिकर्मणि होम सम्भारा उच्यन्ते *

तत्र प्रत्येकं वरणार्थं वस्त्रयुग्मकुण्डल मुद्रिकागन्धपुष्पताम्वुल-नारिकेलफलानि । सौवर्ण्णप्रतिमा माढशतनिर्मिता, तदर्द्धनिर्मिता, सुवर्ण्णद्वयनिर्मिता, सुवर्ण्णमात्रनिर्मिता वा यजमानसामर्थ्यात् । ताम्ब्रमयः

कुम्भः, पञ्चरत्नानि, प्रतिमाप्रमाणं राजतीपीठम् । घण्टा, धूपालयः, दीपालयः, शङ्खः शङ्खवसतयः, कनकपुष्पं, दिव्यवस्त्रं, खट्वा, तूली, शिरस्त्राणं, पताका, चन्द्रातपः, अर्घ्यपात्री, आज्यस्थाली, कांस्यभाजनं, उदकपात्रं, समुद्रपात्रं, आचमनपात्रं, कर्करी, कम्वलाः, आसनार्थम् । पलाशसमित् सहस्रम् । यवव्रीहितिलघृतानि, भृग्वङ्गिरकलशदिग्पालकलशाः ताम्ब्रमयाः, तण्डूलचूतपल्लवः, पञ्चवर्ण्णरजः, कलशवस्त्राणि, दीपं, तदाधारौ, सुवर्ण्णमयी नवग्रह पट्टिका, गन्धपुष्पधूपनैवेद्यानि, अगुरुकर्पूरजातीफलकक्कोललवङ्ग-प्रभृतयः, नानादि पिष्टकानि, मोदकानि, पक्वकदली, दुग्धसारखण्डादीनि, विशेषनैवेद्यानि, ताम्रश्रुचश्रुवौ, कुण्डवालुका, खनित्रीखुरखड्गाः, एवं संभृतसंभारः साधकवरः स्नातः प्रयतः शुचिः कृतनित्यक्रियः उचिताऽऽसने प्राङ्मुख उपविश्य नक्षत्रकल्पोक्तविधिना अग्निं समाधाय महेध्मान्हुत्वा अर्थादिध्महोमं कृत्वा सद्यपिष्टमासुरीम् अर्थात् (राइसोरिष) अर्कपत्रेषु हस्तमात्रीं साध्यप्रतिकृतीं कृत्वा साध्यशत्रोः प्राणान् प्रतिष्ठाप्य साध्याभेदेनाऽध्यावसीय अर्थादयमेव साध्य इति चिन्तयित्वा दक्षिणपादादारभ्य वामपादाऽवसानम् अमुकं त्वां छिनद्मि इति साध्यवुद्ध्या तीक्ष्णशस्त्रेण अष्टोत्तरशतं च्छिन्द्यात् । अथ कुण्डे अग्निं संपूज्य तस्याऽग्नि पुरषस्य हृत्पद्मे जीवरूपत्वेन आसुरीं चिन्तयित्वा श्रुतिवचनं - योऽग्निः साऽऽसुरी, साऽऽसुरी सोऽग्निरिति, आसुर्य्याकारोपपन्नं ब्रह्मैव युक्तं । तस्माच्च देवा बहुधा संप्रसूता, इति श्रुतेः । स्वात्मानं पुनः पुनः मन्त्राऽभिन्न देवतारूपं भावयित्वा वह्निप्रधानदैवतयोरैक्यं भूयो भूयो भावयित्वा सर्वं ब्रह्ममयमिति भावयेत् । मूलमन्त्रस्य ऋष्यादीन् न्यस्य वीजशक्तिप्रकृत्यधिष्ठात्री देवता विनियोगान् प्राञ्जलिः संचिन्त्य कराङ्गन्यासौ कृत्वा प्रतिपदं प्रत्यक्षरं व्यापकं न्यस्य हृदि सम्मुखाऽऽसीनामासुरीं ध्यात्वा प्रणवेनाऽर्घ्यपात्रं प्रकल्प्य पूर्ववद् वह्नौ पूजयित्वा तस्याऽग्नि पुरुषस्य हृत्पद्मे जीवरूपत्वेन तेजोरूपं स्वहृदयान्नीत्वा आसुरीरूपाम् अग्नौ ध्यात्वा सावरणान् पूजयित्वा नमस्कृत्य "भगवति ! होमं करिष्ये इति संप्रार्थ्य प्रथमतः प्रणवव्याहृत्यादिभिः पञ्चदशाऽऽहुतीः हुत्वा क्रमेणाष्टोत्तरशतसंख्याः प्रधानाहुतीः हुत्वा देवतेयं वह्निमुखे हूयमाना हुतिमुपयुज्य यजमानाऽभीष्टं स्वाऽभीष्टं ददातीति

भावयेत् ।" यस्यै एव देवतायै हविः हव्यं तां मनसाऽनुध्यायन् जुहुयात् । मनसा संकल्पयतीति इह भवतीति पैठीनसिः । तदुक्तम् -

देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ इति ॥

ततः सृष्टिस्थितिसंहारा इत्यादि श्लोकत्रयेणाऽऽसुरीं स्तौति ।

वि. द्र. - अथर्ववेदे सर्वत्र होमादौ पूर्वतंत्रं प्रथमतः भवति ततः प्रधानकर्म, तदनन्तरं उत्तरतन्त्रं पूर्णाहुतिः, षट् कर्मसु नक्षत्रकल्पोक्तविधिः भवेत् । एषु कर्मसु सर्वत्र भावना चिन्तनं विद्यते । चिन्तनं तु मनोगतम् । ततः मनोविज्ञानम् एतत् । ततः पूर्णाहुतिं समाप्य "उद्रिक्तसत्व इत्यादिश्लोकत्रयेण वह्निं, ततः महाव्याहृत्यादिभिः अस्त्रमन्त्रेण अर्थात् हन हन, दह दह, इत्यादिना अष्टोत्तरशतं प्रायश्चितार्थं जुहुयादिति "। एवं एकविंशतिरात्रं यावत् जुहुयात् । अथवा चतुर्दशरात्रं सप्तरात्रं वा । एवं सति साध्यः स्वायत्तो भवति । यदि वा न भवेत् तदाऽऽवर्त्तयेदिति । फलसिद्धिपर्य्यन्तं कर्मानुष्ठानमङ्गीकुर्वन्ति कल्पविदः । एतदेव त्रिसन्ध्यं यदि कुर्य्यात् महावशो भवति ।

॥ इति वशीकरणम् ॥

अथ वशीकरणाऽनन्तरमाकर्षणं यदि कामयेत् तदोद्देश्य नक्षत्रतरुकृते पीठे मन्त्रं जप्त्वा साध्य पुत्तुल्यां केनचिदुपायेनाऽऽहृतानि साध्यनखकेशलोमानि यथायथं निक्षिप्य प्राणप्रतिष्ठां विधाय दक्षिणचरणादारभ्य वामचरणपर्य्यन्तं तीक्ष्णायसाऽष्टोत्तरशतधाच्छित्वा साध्यनक्षत्रद्रुमदारुणां "ज्योतिःशास्त्रे सप्तविंशति नक्षत्राणां द्रुमाः सन्ति । तेषु साध्यशत्रोः जन्मनक्षत्रद्रुमदारुणा", इत्यर्थः । प्रज्वलिते वह्नौ आसुरीं दुर्गां अर्च्चयित्वा कर्त्तृसमीपं कारयित्वा, समीपं वा गले पाशेन वद्ध्वा हरन्तीमासुरीं परिचिन्तयन् वशपदस्थाने आकर्षणपदं निक्षिप्य आसुरीमन्त्रेण तानि सकलानि पुतुलिखण्डानि मधुरत्रयाक्तानि (गुडमधुशाकरयुतानि) जुहुयात् । एवं होमप्रभावतो दृढवैरी अपि आत्मसमीपं समायाति । अथ यदा जिगीमिषुः न भवति तदा भूयः कर्माऽऽवृत्तिं कुर्वीत । अथ यद् वा गन्तुमिच्छुरूपि भयादिना नाऽऽयाति तदा तदभयसिद्ध्यर्थं अभयामहाशन्तिं

कृत्वाऽभयदानादिना स आनीयः । यदि न सिद्ध्यति तदा फलपर्य्याऽवसानं कर्माऽऽवर्त्तयेदिति संप्रदायविदः । ध्यानादिकं सर्वं वशवद् ज्ञातव्यम् । स्तम्भनादिप्रयागेषु ध्यानादिविशेष उक्तः । उच्चाटनसिद्ध्यनन्तरं उच्चाटनवद् विद्रावणं कर्त्तव्यम् । प्राणाऽऽकर्षणस्य तदैव विधानात् । साध्ये सुप्ते निशायां तत् प्राणान् आकर्षयेद् वुध इति । दिवा भुक्त्वा नक्तमभुक्त्वा रात्रिविहितं कर्म कुर्य्यात् । कर्मानुष्ठानाऽनन्तरं महानिशायां भोजननिषेधात्, दिवाभोजनस्य रात्रिविहितकर्मानुष्ठानं प्रति अभोजनत्वात् । दिवोदिते कर्मणि अकृत प्रातराशः नक्ते अकृतसायमाश इति वचनात् ।

ऊनार्थश्चाधिकार्थो वा यः स्वशाखोदितो विधिः ।
तं प्रयत्नेन कुर्वीत न कुर्य्यात् पारशाखिकम् ॥ इति

वचनेन स्वशाखायां वैतानकल्पे दिवाहविष्याशी कर्मकुर्य्यादिति वचनाच्च एतदवसेयम् ।

॥ इति श्रीधरकृतकर्मसमुच्चये षट्कर्माध्याये भूधरकृताऽऽसुरीदीपिका समाप्ता ॥

❋ अथ पशुबलिदानविधिः ❋

पप्रच्छाङ्गिरसं प्राज्ञं पिप्पलादः कृताञ्जलिः ।
ब्रूहि मे मुनि शार्दूल ! बलिदानविधिं प्रभो !

अङ्गिरा उवाच - बलिदानविधिं वक्ष्ये प्रशस्तं सर्वकर्मसु ।
विहितं नित्यमेवस्याद् अन्यथा काम्यमिष्यते ॥
ब्रह्मणा चोदितं पूर्वं तस्माभिरनुशिष्यते ।
अथ दुर्गां समभ्यर्च्च्य कुण्डस्य दक्षिणेऽव्जके ॥
प्रसीदाष्टसु पत्रेषु धान्यराशिषु कुम्भकान् ।
अन्तरेकं कांस्यपात्रं सहिरण्यं सवस्त्रकम् ॥
स्थापयित्वा नवस्वेषु ब्रह्माद्यान् क्रमतो यजेत् ।
मध्ये दुर्गां समभ्यर्च्च्य खड्गमन्त्रेण पूजयेत् ॥
मूलेनाष्टशतं हुत्वा तथैवाऽङ्गं दशां शतः ।

मातृकाभिः कहोऽष्टाभिः गव्येनाऽऽज्येन होमयेत् ॥
निखातखादिरे यूपे भूमिगूढद्विहस्तके ।
सप्तहस्तप्रमाणेन पशुं वद्ध्वा (प्रयत्नतः) च प्राङ्मुखः ॥
मूलेन स्नापयेत् कुम्भैर्वस्त्रं नेत्रेण नेत्रयोः ।
वद्ध्वा प्रतिसरं (शरं) सूत्रं शृङ्गयोः नेत्रयोरथ ॥

षोडशस्वरैः – ए, ऐ, द्वौ गण्डयोर्न्यस्य घ्राणे अ, आ, तत उ, ऊ ॥

न्यासः – नासिकापूटयोर्न्यस्य इ, ई श्रवणयोर्न्यसेत् ।
ओ, औ पृष्ठे, ऋ, ॠ, ऌ, ॡ, रसनायां प्रविन्यसेत् ॥

कहोऽष्टाभिः – कवर्गं दक्षिणे पादे च वर्गं वामपादके ।
मातृकान्यासः – जंघादिके टवर्गं च तवर्गं दक्षपार्श्वके ॥
पवर्गमङ्गुलिव्यूहे यवर्गं वामपार्श्वके ।
शवर्गमुदरे न्यस्य हकारं हृदये न्यसेत् ॥
अथाऽयं मातृकान्यासः स्वस्मिन्निव पशौ भवेत् ।

॥ इति पशुमातृकान्यासः ॥

विल्वमालां गले दत्वा गन्धपुष्पाऽक्षतादिभिः ।
संपूज्य प्रोक्षयेन्मन्त्रैः पूर्वं वद्धपशुं क्रमात् ॥
शिरस् स्पृष्टपशोः पार्श्वं अष्टाविंशतिधा जपेत् ।

गन्धादिमन्त्राः – पशूनां पतये नमो गन्धमेतेन यच्छति ।
पशूनां ह्रीं नमोऽनेन दद्यात् पुष्पं च पूर्ववत् ॥
पशूनां क्ष्रीं नमोऽनेन धूपं दद्यात् प्रयत्नतः ।
पशूनां धीं नमोऽनेन धूपं दद्यात् प्रयत्नतः ॥
पशूनां दीं नमोऽनेन दीपं दद्याच्च पूर्ववत् ।
कर्ण्णेष्वन्तं जपेत् कर्ण्णे शृङ्गे शृङ्गमनुं जपेत् ॥
पादान् स्पृष्ट्वा पादस्वन्तं कण्ठे सूत्रं प्रवेष्टयत् ।
रक्षार्थं पशुगायत्र्या तथैनमवगुण्ठयेत् ॥
संरक्ष्य च धेनुमुद्रां प्रदर्श्यैनं विलोक्य च ।
पशुजन्मेति संप्रोक्ष्य संभूतेनाऽपिना पशुम् ॥

दक्षिणे घातयेद्धन्तो न शूद्रेण कदाचन ।
ततो वै ल्यैच (लौच) पात्रेण कृत्वा रुधिरमुत्तम् ॥
मूलमन्त्रेण तद्दद्याच्छिरसि च्छेदयेत् पशुम् ।
रक्तं रुधिरमन्त्रेण दुर्गायै मन्त्रवित्तमः ॥
पशुमस्तकमन्त्रेण प्रदद्यात् पशुमस्तकम् ।
घोरं दंष्ट्रेति मन्त्रेण यच्छेद् रक्ताक्तमोदनम् ॥
अङ्गानां स्वस्वमन्त्रं तु समुच्चार्य्य बलिं क्षिपेत् ।
ततश्च देव्यै विविधं नैवेद्यं चैव ढौकयेत् ॥
मूलेनाऽऽचमनं दद्यात्, ताम्वुलं दत्वा वहिर्गतः ।
महाकौशिकमन्त्रेण नैर्ऋते तं बलिं क्षिपेत् ॥
तदग्रतो नृपः स्नायात् शत्रुरूपं तु पिष्टकम् ।

* (शत्र्वाकृतिपिष्टकपुत्तलिकामित्यर्थः ॥)

मन्त्रेण च्छेदयित्वा तद् दद्याद् स्कन्दविशाखयोः ॥
एताभ्यां तच्छिरं दद्यात् नाममन्त्रद्वयेन तु ।
ततस्तत् पुत्तलीं दद्यात् तन्मन्त्रद्वितीयेन तु ॥

स्कन्धविशाखमन्त्रौ – १ – ॐ ह्रीं स्फुर स्फुर, २ – ॐ हुं फट् मर्द मर्द हूं ॥
आद्यस्वकर्मजेत्याद्यैर्मन्त्रैर्दिक्षु बलिं क्षिपेत् ।
आचम्य द्रोणपुष्पाऽर्घ्यं सर्वमङ्गलकं पठेत् ॥
निवेद्याऽपि चतुर्वारं अष्टम्यां जागरेन्निशि ।
महीषघ्नीति मन्त्रेण प्रार्थयेत् तां सुरेश्वरीम् ॥
कारयेच्च प्रयत्नेन नृत्यगीतादिनोत्सवम् ।
प्रदद्यात् द्रोणपुष्पार्घ्यं जयन्तीति च मन्त्रतः ॥
नवम्यां विल्वमाल्येनाऽमृतो भवेन पूजयेत् ।
कोषतोऽसिं समुत्कृष्य विजयादिकमिच्छति ॥
ध्यायन्नेतन् नमस्कुर्य्युर्बलिदानविधिः स्मृतः ।
जगन्मात्रे बलिं दद्यात् वतैतद्विधिना नृपः ॥
काम्यकर्मसु सर्वेषु सर्वान् कामानवाप्नुयात् ।

विल्वपत्रमालातन्त्रोद्धृताः पशुपूजामन्त्राः स्वतन्त्ररूपेण वर्त्तन्तेऽत्र, एतद् विधानं नाऽङ्गिरसकल्पसम्मतं, किन्तु आङ्गिरसकल्पनामक पुस्तके (तालपत्रे) एतद् विधानं वर्त्तते । विल्वपत्रमालामन्त्रा इत्यपि वर्त्तते । सप्तशत्यामपि जयन्त्यादिमन्त्राः सन्ति । तालपत्रपुस्तकमिदं आङ्गिरसकल्पादि तन्त्रशास्त्रवर्णितविषयविधानपुर्ण्णम् । ततः अध्यायशेषे -

॥ इत्याङ्गिरसकल्पे पशुबलिदानविधिः ॥

* तन्त्राध्याये अथकर्मसमुच्चये शत्रुपराजयविधिः *

पूर्ववदासुरीं सूक्ष्मपिष्टां साध्यसदृशीं प्रतिकृतिं कृतप्राणप्रतिष्ठाम् अष्टोत्तरशतं वामपादादारभ्य साध्यवुद्ध्या तीक्ष्णशस्त्रेण छित्वा जुहुयाद् आसुरीमन्त्रेण । एतावान् वशेषः यत् मन्त्रे वशपदस्थाने पराजयपदं योजयेत् । कुण्डं वर्त्तुलम्, ध्यानादिकमुच्चाटनवत् । भावना शत्रोः भयपूर्वकं पलायनस्य । अन्यत् सर्वं पूर्ववत् । तथा नक्षत्रकल्पे अन्ते -

अथ देवासुराणां वै युद्धं प्रववृत्ते पुरा ।
तत्र देवाः पराभूता आसुरैर्वलवत्तरैः ॥
पलायमानास्ते देवा गिरिकन्दरमाविशन् ।
ब्रह्माणं शरणं प्राप्तास्तत इन्द्रादय सुराः ॥
तमूचुः प्रणिपत्येवं भयेनोद्विग्नमानसाः ।
भगवन् ! किं करिष्यामो महादैत्यनिराकृताः ॥
उपायं ब्रूहि अस्मभ्यं त्वमैव शरणं हि नः ।
ततो ब्रह्मा तपस्तप्त्वा अथर्वाङ्गिरसश्रुतौ ॥
महामन्त्रं ददर्शाऽसौ कटुकादिपदादिकम् ।
असुरक्षयकर्त्तारं षट्कर्मफलदायिनम् ॥
सर्वत्र विजये हेतुं सर्वशन्तिकरं परम् ।
सर्वपुष्टिकरं नृणां सदासर्वार्थसाधकम् ॥
देवेभ्यश्च ततो ब्रह्मा महामन्त्रमुपादिशत् ।
तं लब्ध्वा कृतकृत्यास्ते दरिद्रा इव सेवधिः ।
यदसाध्यं चतुर्वेदैस्तदनेन हि सिद्ध्यति ॥

अनेन तु न सिद्धं यत् चतुर्वेदे नं सिद्ध्यति ।
असुराणां जयार्थाय यतोऽयं दृष्टवान् प्रभुः ॥
नामकरणम् - आसुरीति ततो देवी विख्याता भुवनत्रये ।
मन्त्रो वाऽप्यासुरीनाम राजिका द्रव्यमासुरी ॥
सूक्ष्मपिष्टां तु तां कुर्य्यात् पुत्तुलिं साध्यररूपिणीम् ।
साध्यप्राणान् प्रतिष्ठाप्य साध्याऽभेदं च भावयेत् ॥
भावनावलमासाद्य मन्त्रविद् वलवान् भवेत् ।
वामपादात् समारभ्य दक्षिणां घ्यवसानकम् ॥
क्रूरकर्माणि कुर्वीत अकृतेऽत्र विपर्य्ययम् ।
अष्टोत्तरशतं हुत्वा शत्रोर्जयमवाप्नुयात् ॥
मधुरत्रयसंयुक्तं* सकलं जुहुयाद् वुधः ।
गव्येन सर्पिषा वाऽपि जयाकाङ्क्षी जयं भवेत् ॥
अथ देवा महामन्त्रे उदधुश्च वशं पदम् ।
पराजेय पदं तत्र विक्षिप्तश्च पदद्वयम् ॥
एवं च जयकामास्ते प्रयोगं चक्रिरे तदा ।
ततोऽसुरान् पराजित्य स्वं स्वं स्थानमुपागमन्॥
तस्मान्नरपतिः शत्रुं जेतुकामो यदा भवेत् ।
तदाऽनेनैव मन्त्रेण प्रयोगं कारयेद् द्विजम् ॥
स च शत्रुं विजित्यैव चिरं पालयति क्षितिम् ।
योद्धुं यदि समादाय वज्रहस्तः पुरन्दरः।
स जेयः क्षणमात्रेण का कथा मनुजाऽधिपे ॥
तस्माद् राजा विशेषेण अथर्वाणं वुधं द्विजम् ।
दानसम्मानसत्कारै र्नित्यं समभिपूजयेत् ॥

॥ इति कर्म समुच्चये तन्त्राध्याये शत्रुपराजयः ॥

---

* मधुरत्रयम् - मधु-गुड-शाकराणि ।

* अथाऽग्नि पूजा *

(वेद्यामग्नेरावाहनम्)

ॐ सप्ताक्षराऽग्नि मन्त्रस्य भृगुः ऋषिः, गायत्री छन्दः, अग्निर्देवता ॐ वीजं स्वाहा शक्तिः ममाऽभीष्टसिद्धौ विनियोगः ।

न्यासः -ॐ भूः हृदयाय नमः, ॐ भुवः शिरसे स्वाहाः, ॐ स्वः शिखायै वषट्, ॐ स्वाहा कवचाय हूं, ॐ भूः भुवः स्वः नेत्रत्रयाय वौषट्, ॐ स्वाहा अस्त्राय फट् ।

ध्यानम् - सर्व लक्षण संपूर्णं (संपर्ण्णं वा)जटामुकुटमण्डितम् ।
चतुःश्रोत्रं द्विनासंश्च षण्नेत्रश्च द्विरास्यकम् ।१।
सर्वलक्षण संपर्ण्णं पीताम्वर विभूषितम् ।
सित (श्वेत वा) पद्मासीनं देवमजवाहनसंज्ञकम् ।२।
वालाऽर्क समवर्ण्णश्च मधु पिङ्गल लोचनम् ।
पादौ पश्चिमतः स्थाप्य पूर्वतः शिर उच्यते ।३।
आयुधं सप्त हस्तं स्यादूद्ध्वंवक्त्राकृति भवेत् ।
दक्षिणे चतुर्हस्तं स्याद् वामभागे तृतीयकम् ।४।
शक्ति शूलं गदां चैव श्रुवं श्रुचं * च दक्षिणे।
तोमरं परशुं चैव पात्रं वामकरे स्थितम् ।५।

एवं ध्यात्वा द्विजः सम्यग् होमञ्च तदनन्तरम् ।(कुर्य्यात्) ॐ भूः भुवः स्वः स्वाहा ॥ ततः प्रणवेनाऽर्घ्यपात्रं कृत्वा विधिना पूजयेत् । अग्नेः नवशक्तयः(नवशिखाः) -

पीता श्वेताऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ।
रुचिरा ज्वालिनी चेति कृशानो नवशक्तयः ॥

आवरणानि :- १. वीजमग्न्याऽऽसनम् , २. अङ्गमूर्त्तिः अग्नेः स्वरुपमित्यर्थः, ३. दिक्पालाः, ४. एतेषामस्त्राणि च, चत्वार्य्यावरणानि । इत्यग्नि पूजा ॥ ततो मूलमन्त्रस्य ऋष्यादिजपान्तं कृत्वा अर्घ्य पात्रं विधाय

* श्रुवश्रुचौ च

अग्नौ प्रधानदेवतां संपूज्य ऐक्यं भावयन् यज्ञदेवता हुतमुपयुञ्जानां यजमानस्य फलं ददतीमिति भावयेत् । इत्यग्निमध्ये भावना । अत्र प्रधान देवता मूलमन्त्रं नृसिंहमन्त्रादिकं भवेत् ॥

* अथ प्राण प्रतिष्ठा *

प्राणशक्ते ! नमस्तुभ्यं मन्त्राणां प्राणदायिनि !
त्वया प्राणिगताः प्राणाः जनिताः स्थापिता हृताः ॥ इति नमस्कृत्य ॐ प्राणप्रतिष्ठा मन्त्रस्य व्रह्माविष्णुशिवा ऋषयः, ऋग् यजुः सामानि छन्दांसि प्राणशक्तिर्देवता आं वीजं क्रौमिति शक्तिः, अमुकस्य प्राणप्रतिष्ठायां विनियोगः॥

प्राणप्रतिष्ठामन्त्रः- ॐ याते प्राण इत्यादि ,मत् संपादित पैप्पलादविवाहसंस्कारपद्धतौ सर्वमस्ति। आं वीजं , ह्रीं शक्तिः, क्रौं किलकं,सर्वे वेदाः छन्दांसि इत्यादि, अत्रतु किञ्चित् पार्थक्यमस्ति । ततः यथावत् दर्शयामि। ॐ कं खं गं घं ङं आकाशवायुतेजोजलपृथिव्यात्मने अङ्गुष्ठाभ्यां नमः । ॐ चं छं जं झं ञं शब्दस्पर्शरूपरसगन्धात्मने तर्जनीभ्यां स्वाहा। ॐ टं ठं डं ढं णं श्रोत्रत्वक् चक्षुः जिह्वा घ्राणात्मने मध्यमाभ्यां वषट् । ॐ तं थं दं धं नं वाक्पाणि पाद पायूपस्थात्मने अनामिकाभ्यां हूं । ॐ पं फं वं भं मं वचनाऽऽदान गमन विसर्जनाऽऽनन्दात्मने कनिष्ठाभ्यां वौषट् । ॐ यं रं लं वं शं षं सं हं क्षं वुद्ध्यहंकार मनश्चितात्मने करतलकरपृष्ठाभ्यामस्त्राय फट् । अनेनाऽङ्गन्यासं च कुर्य्यात् । नाभितः पादान्तं ॐ आमिति । हृदयान्नाभिपर्य्यन्त ॐ ह्रींनमः इति । मस्तकाद् हृदयान्तं ॐ क्रौं नमःइति विन्यस्य मूर्त्तिशरीरे पद्मदलेषु च निम्नोक्त विधिना न्यसेत् । हृदये सप्तधातुषु रसादिषु, पद्मवायव्य दले च यं त्वगात्मने नमः । आग्नेये ॐ रं असृगात्मने नमः । ऐन्द्रे ॐ लं मांसात्मने नमः । वारुणे ॐ वं मेदात्मने नमः । ऐशान्ये ॐ शं अस्थ्यात्मने नमः। नैर्ऋते ॐ षं मज्जात्मने नमः । सौम्ये अर्थात् उत्तरस्यां दिशि ॐ सं शुक्रात्मने नमः । याम्ये ॐ हं प्राणात्मने नमः । कर्ण्णिकान्तरे ॐ सः जीवात्मने नमः । इति प्रत्यक्षर न्यासः। ॐ यं रं लं वं शं षं सं हं सः इति। ततः ॐ आं ह्रीं क्रौं यं यरलवशषसहौं हंसः।एतेन

चतुर्दशाक्षरेण पादतल मस्तक मूद्दध्वाधः क्रमेण व्यापकन्यासं कुर्य्यात् । ततोजीवभूतां प्राणशक्तिंध्यात्वातु जपेत् ।

ध्यानम् :- रक्ताम्भोधिस्थपोतोल्ल सदरुण सरोजाधिरूढा कराब्जैः।
अत्र सं, आः,- पाशं कोदण्डमिक्षुद्भवषुमथगुण मङ्कुशं पञ्चवाणान् ॥
विभ्राणाऽसृक् कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या ।
देवी वालार्कवर्ण्णा ह्यवतु सुखकरी प्राणशक्तिःपरा सा ॥

रक्तसमुद्रदुहित्रे ! रक्तपद्मस्थां रक्तां रक्तगन्ध माल्यवस्त्राऽलङ्कारां त्रिनयनां पीनस्तनीं दक्षिणभुजैरुद्ध्वक्रमात् अङ्कुशाऽसृक् कपालानि वामैः भुजैः पाशेषुधनुःशूलानि विभ्राणां प्राणशक्तिं ध्यायेत् । मन्ये सा अष्टभुजा ,ततः दक्षिणभजेषु अस्त्रद्धयमावस्यकम् ।ततो यथा शक्ति जपेत् । जपविधिः- ॐ आं ह्रीं क्रौं यं यरलवशषसहौं हंसः ।अमुष्य प्राणा इह प्राणाः । अमुष्य जीव इह स्थितः ,अमुष्य सर्वेन्द्रियाणि अमुष्य वाङ् मनः चक्षुश्रोत्र जिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । अत्र इह अमुकस्थाने साध्य नाम, अमुष्य इत्यस्य पूर्वं न्यासोक्त दीजादि[illegible] योजयेत् , अर्थात् ॐ आं ह्रीं क्रौं [illegible] इह प्राणाः। अत्र साध्य मुर्त्ति मध्ये प्राण प्रतिष्ठाभवति । ततो विधिना मूल मन्त्रेण प्राणवेनवा अर्घ्यपात्रं विधाय तेन च स्वं मण्डल द्रव्यं प्रतिमाश्च सिञ्चेत् । ततः आत्मानं पूजयित्वा वहिः पूजामनुज्ञाप्य अग्नेः नैऋते कोणे अष्टदलपद्म मण्डले षट्कोण युक्तं कर्ण्णिकायां प्राणशक्ति प्रतिमां पूजयेत्

अथ पूजाविधिः - प्राणप्रतिष्ठायाम् - १मा वरणम् -

- चत्वार्य्या वरणानि -

पूर्वाद्यपरतत्त्वान्तमर्च्चयित्वा केशरे पूर्वादि क्रमेण ॐ जयायैनमः । ॐविजयायै नमः, ॐ अजितायै नमः , ॐअपराजितायै नमः, ॐनित्यायै नमः, ॐ विलासिन्यै नमः, ॐ घोरायैनमः, देवतायाः पश्चात् ॐ सर्वमङ्गलायै नमः,कर्ण्णिकायां , ॐ ह्रीं प्राणशक्त्याऽऽसनाय नमः ॥ ततः प्राणशक्ति प्रतिमायां ॐ प्राणशक्ति मूर्तये नमः।ततः आवाह्य पूजयेत् । २या वरणम्- कर्ण्णिकायाः षट् कोणेषु पूर्वादि क्रमेण ॐ व्रह्मणे नमः, ॐ विष्णवे नमः,ॐईश्वराय नमः,ॐ वाण्यै नमः, ॐ लक्ष्म्यैनमः, ॐउमायैनमः, ३या

वरणम् - पद्माऽष्टदलेषु पूर्वादि क्रमेण ॐ व्राह्म्यै नमः,ॐ माहेश्वर्य्यै नमः, ॐ कौमार्य्यै नमः , ॐ वैष्णवै नमः, ॐ वाराहै नमः, ॐ इन्द्राण्यै नमः,ॐ चामुण्डायै नमः,ॐ महालक्ष्म्यै नमः, ४र्थाऽऽवरणम्-दलवाह्येषु, पूर्वादि क्रमेण, ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐयमाय नमः,ॐनैऋताय नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुवेराय नमः, ॐईशानाय नमः, नैऋतिवरुणयोर्मध्ये ॐ अनन्ताय नमः, इन्द्रईशानयोर्मध्ये ॐ व्रह्मणेनमः, एवं चत्वार्य्यावरणानि ॥ ततः प्रभूतकुसुमादिभिः प्राणशक्तिं पद्मकर्ण्णिकायां पूजयित्वा, ततः प्रतिकृतौ अर्थात् प्राणशक्तिप्रतिमारूपसाध्यमूर्तौ, प्राणमन्त्रस्य अर्थाद् ॐ आं ह्रीं इत्यादिमन्त्रस्य ऋष्यादिव्यापकन्यासान्तं कृत्वा तस्य हृदयं स्पृष्ट्वाऽष्टधाजपेत् । जपप्रकारः पश्चाद् वर्त्तते । ततः साध्यप्राणाऽऽहरणार्थं दूतीः प्रेरयेत् । दूत्यः यथा -

मृतावैवस्वताजीवहा प्राणहाकृष्याग्रसनाऽप्रमादाविस्फुलिङ्गिनीक्षेत्र-प्रतिहार्य्या नव भवन्ति ॥ अत्र एवं चिन्तयेत् - भो भो ! दूत्यः मम साध्यस्याऽमुकस्य स्थाने गत्वा तत्प्राणान् पाशवीजेन वध्वा शक्तिवीजेन क्षीणशक्तिः कृत्वाऽङ्कुशवीजेन आकृष्य प्रतिकृतिहृदये स्थापयेत । एवं चिन्तयन् प्राणमन्त्रमित्थं जपेत् । प्राणमन्त्रः - ॐ आं ह्रीं क्रौं यं यरलवशषस हौं हं सः, मृता वैवस्वता जीवहाप्राणहाकृष्याग्रसनाऽप्रमादा विस्फुलिङ्गिनी क्षेत्रप्रतिहार्य्यः ! अमुष्य प्राणा इह प्राणाः, इत्थं ॐ आं ह्रीं इत्यारभ्य प्रतिहार्य्या इति पर्य्यन्तं पठित्वा अमुष्य जीव इह स्थितः । पुनरित्थं अमुष्य सर्वेन्द्रियाणि, पुनरेवं अमुष्य वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठत । ध्यात्वा स्वहृदयेऽपि अष्टौ भ्रमरीः ध्यायेत् । ततस्ता , एकैकं वायव्यदलवर्त्ति भ्रमर्य्यादिक्रमेण कर्त्तुराज्ञया दक्षिणनासापुटेन वहिर्निर्गत्य साध्यस्य वामनासापुटेन अन्तः प्रवेश्य तद्धृदयपद्मवायव्यदलवर्त्तिभ्रमर्य्यादि क्रमात् । मस्तकसूत्रेण तद्दक्षिणनासापुटेन साध्यप्राणभ्रमरान् एकैकाकृष्य प्रतिकृतिकृतेः वामनासापुटेनाऽन्तः प्रवेश्य तत् प्रतिकृतेः हृदयपद्मवायव्यदलादौ एकैकं भ्रमरं स्थापयित्वा अग्निवीजेन सूत्रं छित्वा पृथिवीवीजेन अन्यत्रैव तिष्ठत इति स्तम्भयित्वा तद्दक्षिण नासापुटेन वहिर्निर्गत्य कर्त्तु र्वामानासापुटेनाऽन्तः प्रविश्य स्वस्थाने स्थिता, इति

चिन्तयेत् । युगपदाऽऽकर्षणाऽशक्तौ प्रत्येकमाकर्षणम् । एवं एकादशधा कुर्य्यात्, आत्मप्रत्ययान्तं वा तत्रस्थस्य हृदयं स्पृष्ट्वा प्राणमन्त्रं जपेत् । स्वार्थे जपे स्वचित्ते, परार्थे जपे परचित्ते, प्राणप्राणप्रतिष्ठाक्रूरे तु साध्यप्राणा मण्डूकाः, कर्त्तुः प्राणाः सर्पाः इति भावना मनसि कार्य्या ॥ ततः मूलेन मन्त्रेण प्रतिकृतिं अष्टधाऽभिमन्त्र्य शस्त्रेण दक्षिणपादादिवामपादान्तं अष्टोत्तरशतं छित्वा साध्यबुद्ध्या मूलेन जुहुयात् । वशाऽऽकर्षणयोः रक्तान्, मोहविद्वेषणयोः धूम्रान् स्तम्भने पीतान्, उच्चाटनोत्सादनमारणेषु नीलान् साध्यप्राणभ्रमरान् स्वप्राणभ्रमरिश्च चिन्तयेत् । उच्चाटनादौ भेक सर्पयोरपि नीलत्वं भावयेत् ।

॥ इति षट्कर्मणि प्राणप्रतिष्ठा विधिः ॥

* अथ पशुपूजामन्त्राः *

ॐ ह्रीं ह्रीं कालिकालिविकटदंष्ट्रे ! करालाऽऽस्ये ! स्फैं स्फैं
खादय खादय च्छेदय च्छेदय सर्वदुष्टान् मारय मारय असुरान् ,
खड्गेन च्छिन्दि च्छिन्दि, किलिकिलि,
किरि किरि, पिव पिव रुधिरं स्थौं,

स्थौं, किरि किरि कालिकायै नमः । इति खड्गमन्त्रः ॥ अथवा ॐ कालिकायै नमः, इति स्पष्टाक्षराङ्गिरस मन्त्रः । पशुप्राणविनाशाय हेमकूटसंस्थाय परमेष्ठिने हुं कारमूर्द्धाय(मूद्ध्र्ने) वै नमः । इति पशुवीजमन्त्रः ॥

चतुरः पादविद्महे पादतत्त्वाय धीमहि । (धीमहे)
तदद्यावाहे नमोनमः । इति पशुपादसूक्तम् ।
पशुपाशायविद्महे शिरच्छेदाय धीमहे ।
तन्नः पशुः प्रचोदयात् ॥ इति पशुगायत्री ।
पशुजन्म प्रसूतोऽसि पूजाहोमजपादिषु ।
तुष्टा भवतु सा दुर्गा सरक्त पिशितैस्तव ।
इति पशुविमोचनमन्त्रपूर्वक प्रोक्षणमन्त्रः ॥

ॐ नमो महामाये ! रुधिरप्रियङ्करि ! रुधिरं गृह्ण गृह्ण हूं फट् । इति रुधिरदानमन्त्रः ।

ॐ नमो महिषमर्द्दिन्यै, ॐ कारमूर्तये पशुमस्तकं गृह्ण गृह्ण ॐ ह्रीं फट् स्वाहा । इति पशुमस्तकदानमन्त्रः ।

ॐ घोरदंष्ट्रे ! करालास्ये ! मद्यमांस सदाप्रिये !
बलिं गृहाण मे देवि ! पशुरक्तं समांसकम् ॥
इति रुधिरमांसदानमन्त्रः ॥

ॐ पें पें, ह्रीं ह्रीं ह्रीं, संहारिणि ! संहारिणि ! दुर्गे ! दुर्गे ! ह्रीं ह्रीं ह्रीं गृह्ण गृह्ण फट् स्वाहा । इति देव्यग्रे रक्ताञ्ज बलिदानमन्त्रः ।

ॐ ऐं ह्रीं क्लीं क्लौं ह्रीं ह्रीं , कौशिक ! एषः बलिः स्वाहा, एहि,
त्रिनेत्रविकरालास्य मुण्डमालाविभूषितः ।
सर्वाऽसुरकृतान्तस्त्वं खड्गखट्वाङ्गशूलधृक् ।

ॐ ह्रौं ह्रौं, कौशिकाय गृह्ण गृह्ण एष बलिः स्वाहा । इति महाकौशिकमन्त्रः ।

ॐ रुधिरं किलि किलि घोरधारेहंसवै हंसब्रह्मनिकाय अमुकं मारय मारय छैं छैं हूं फट् ॥ इति पिष्टकपित्तुलिशिरश्छेदने खड्गमन्त्रः ।

ॐ स्कन्दाय नमः, ॐ विशाखाय नमः । इति स्वनाम मन्त्रः ।

ॐ प्रैं प्रौं ह्रीं विकटदंष्ट्रकरालाय नमः । ॐ क्रौं विशाखाय नमः । इति पिष्टकपुत्तलिकादाने स्कन्दविशाख मन्त्रः ।

ॐ आद्याः सकर्मजाश्चैव येन भूतादिसंस्थिताः ।
प्रसन्ना परितुष्टास्ते प्रगृह्णन्तु इमं बलिम् ॥
वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः ।
संस्थिताश्च वने चैव प्रगृह्णन्तु इमं बलिम् ॥
विनायकाः क्षेत्रपाला ये चाऽन्ये बलिकाङ्क्षिणः ।
पूतनाद्याः पिशाचाश्च प्रगृह्णन्तु इमं बलिम् ॥
॥ इति दिक्षु बलिदानमन्त्रः ॥

सर्वमङ्गलमाङ्गल्ये ! शिवे ! सर्वार्थसाधिके !
शरण्ये ! त्र्यम्बिके ! (त्र्यम्वके) गौरि !
नारायणि ! नमोऽस्तुते ॥

कुङ्कुमेन समालिप्ते चन्दनेन विलेपिते ।
विल्वपत्राऽर्च्चिते देवि ! दुर्गेऽहं शरणं गतः ।
॥ इत्यर्घप्रदानमन्त्रः ॥

महिषघ्नि ! महामाये ! चामुण्डे ! मुण्डमालिनि !
द्रव्यमारोग्यविजयं देहि देवि ! नमोऽस्तुते ॥
॥ इति प्रार्थनामन्त्रः ॥

जयन्ती मङ्गला काली कराली च (भद्रकाली) कपालिनी ।
दुर्गा शिवा क्षमाधात्री स्वधा स्वाहा नमोऽस्तुते (वा नमो नमो) ॥
॥ इति बलिनवम्यर्घ्यमन्त्रः ॥

ॐ अमृतो भवन्तु श्रीवृक्षं महादेव प्रियं सदा ।
विल्वपत्रं प्रयच्छामि पत्रं तेऽहं सुरेश्वरि !
॥ इति विल्वपत्रमालामन्त्रः ॥ अर्थात् प्रदानमन्त्रः ॥
॥ इत्याङ्गिरसोक्त पशुपूजामन्त्राः ॥

अत्र ये ये मन्त्राः व्यवहृतास्ते संहितासु न सन्ति । ततः अयं विषयः न कल्पान्तर्गतः । अयं ग्रन्थः आङ्गिरसकल्पनाम्ना विदितः । परन्तु कल्पवहिर्भूततन्त्राणामपि अत्र समावेशः अभवत् । नक्षत्रकल्पोक्तं स्थण्डिलविधानं पैप्पलादविवाहादिसंस्कारपद्धतिग्रन्थे सर्वैः मन्त्रैः सह विद्यते। ग्रन्थविस्तारभयात् अत्र पुनः न दर्शयामि । अथर्ववेदकर्मकाण्ड विज्जनः एतत् सर्वं जानाति । कर्मानुसारं अग्नेरावाहनं कुर्य्यात् ॥

* अथ नक्षत्रकल्पोक्ततन्त्रसूत्रं उच्यते *

अयं तु पुरुषसंस्कारः । प्रथमतः ॐ हिरण्यवर्णा इति सूक्तेन मन्त्रस्नानं समाप्य ॐ अवरेणु मन्त्रेण हस्तौ प्रक्षाल्य पयस्वत्या आचमेत् । ततः करशुद्धिं ॐ यस्ते गन्धः पृथिवि ! तथा ॐ श्रियं धातुः इति मन्त्राभ्यां कुर्य्यात् । वासश्चेत् ॐ यत्ते वास इति मन्त्रेण परिधापयेत् । ततः वटुकं गृह्णाति । नारायणं स्मरेत् । यजमानमपि एवं संस्कारं कृत्वा सङ्कल्पपूर्वकं पुण्याहवाचनादिकं कुर्य्यात् । अत्र विशेषः करशुद्ध्यनन्तरं धूपोदेयः ॐ न

तं यक्ष्मा मन्त्रेण । शुद्धिपञ्चकमपि कुर्य्यात् । ततः ॐ अव्यसश्च मन्त्रं पठित्वा तूष्णीं ब्रह्माञ्जलिं कुर्य्यात् निम्नमन्त्रेण ।

ॐ सहनाववतु सह नौ भुनक्तु सह नौ वीर्य्यवदस्तु ब्रह्म ।
इन्द्रोऽपि तद्वेद मा विद्विषावहै, ब्रह्माऽपि तद्वेद मा विद्विषावहै ॥

सत्यं वदामि, सत्यं वदिष्यामि, तन्माऽवतु, तद्वक्तारमवतु, अवतु मामवतु, तद्वक्तारमवतु वक्तारम् ॥ ततः प्रादेशमात्रवेद्यां सीता लक्षणं कृत्वा वैष्णवाग्निं ध्यात्वा निर्दिष्टकर्मणि निर्दिष्टाग्निं वाध्यात्वा तं च यथाविधि पूजयित्वा ॐ अग्ने प्रेहीति मन्त्रेणाऽग्निमभिष्टौति । ततः महाव्याहृत्यादिभिः समिधो हुत्वा ॐ सुगार्हपत्या इत्यृचा पञ्चसमिधः सकृद् हुत्वा आपोमयं ब्रह्माणं ॐ वृहस्पते ! यज्ञं गोपायेत्येतावता मन्त्रेणाऽग्नेः दक्षिणतः स्थापयति । ततः अप्रच्छिन्नाग्रावित्युत्पवनान्तं कर्म अर्थात् दर्भ संग्रहणकर्म यथानिर्दिष्टमन्त्रैः कृत्वा ॐ धामन्ते विश्वमित्यृचाऽऽज्यं स्तुत्वा तूष्णीं श्रुवं गृहीत्वा ॐ निष्टप्तं रक्षेति चतसृभिः ऋग्भिः श्रुवं प्रताप्य ॐ भूः संभूत्या इत्यादिभिराज्यमादाय ॐ हृदापूतमिति चतुर्षु मन्त्रेषु अग्नेः दक्षिणार्द्धे आज्यं हुत्वा ॐ यज्ञस्य चक्षुरिति द्वाभ्यां पूर्वार्द्धे आज्यं हुत्वा ॐ रोहितो यज्ञस्य इति द्वाभ्यां च मध्ये हुत्वा ॐ प्राणाय स्वाहा अपानाय स्वाहा इति व्यवस्थयाऽऽघारौ हुत्वा ॐ ततस्त्वमग्ने ! ॐ त्वं सामेति पूर्ववत् जुहुयात् । ततः यजमानमन्वालभ्य ॐ अयं नो अग्निः इति द्वाभ्यां महेध्मान् हुत्वा अर्थादिध्महोमं कृत्वा ततः प्रधानकर्ममन्त्रैः हविः जुहुयात् । ततः उत्तरतन्त्रं कुर्य्यात् । तद् यथा - ॐ ये देवा इति तिसृभिः, ॐ अग्निं स्विष्टकृतमित्याज्यं हुत्वा ततः शान्तिवाचनं कृत्वा यजमानः ब्राह्मणाय दक्षिणां दत्त्वा स्वैरी भवेत् । ततः कर्त्ता आचार्य्यः ॐ विमुञ्चामीत्येवमादि-भिराज्यं जहुयात् । त उच्यन्ते । ॐ विमुञ्चामीत्येका, ॐ ये ते शतमिति चतस्रः, ॐ वि ते मुञ्चामीकैकार्च्चिका, ॐ एतास्ते इति पूर्वार्द्धे हुत्वा ॐ प्रवहं देवा नित्येका, ॐ यद्यत्वेति चतस्रः, ॐ हुतं मे वाचि इत्यका, ॐ यन्मे अग्न इति पञ्चकल्पजाः, एतैः दक्षिणार्द्धे हुत्वा ॐ अग्नये स्वाहा, ॐ यज्ञाय स्वाहा, ॐ ब्रह्मणे स्वाहा, ॐ प्रजापतये स्वाहा, ततः ॐ त्रातारमिन्द्रमित्यृक्, ॐ ययोरजोसेति तिस्रः

महाव्याहृत्यादिभिः ब्रह्मजज्ञानान्तैः आज्यं जुहुयात् । ॐ एतास्ते इति समिच्छेषं, ॐ सहस्रशृङ्ग इत्याज्यशेषं ॐ पवित्रं शतधारमित्यृचा च पवित्रं हुत्वा ॐ आयुर्मेति पञ्चदशभिः धूमं स्वीकृत्य ॐ अदध मं म इति मन्त्रैः मन्त्रोक्तानि गात्राणि स्पृशेत् । ततः ॐ त्र्यायुषमित्यृचा ललाटे भस्मतिलकं कुर्य्यात् । ॐ वाङ् म आस्ये इति मन्त्रेण स्वाङ्गप्रत्यङ्गानि स्पृशेत् । ततः तूर्ष्णीं श्रुवं स्थापयित्वा ॐ उदीराणा इत्यृचं पठित्वा उत्तिष्ठेत् । ततः ॐ उत्तिष्ठ ब्रह्मणस्पते । इति मन्त्रेण ब्रह्माणं विसृज्य ॐ यस्मात् कोशादिति मन्त्रेण हृदयाभिमन्त्रणं कुर्य्यात् । यत्र यत्र नक्षत्रकल्पोक्तं तन्त्रं कुर्य्यात् तत्र तत्र एवं कुर्य्यात् । सर्वे मन्त्राः पैप्पलादविवाहादिसंस्कारपद्धति-ग्रन्थे सन्ति । पूर्वतन्त्रं, उत्तरतन्त्रं च द्रष्टव्यम् ।

॥ इति कर्मसमुच्चये तन्त्राधयाये नक्षत्रकल्पोक्तं तन्त्रं समाप्तम् ॥

* अथातो मन्त्रमुक्तावल्यां वक्रतुण्डमन्त्रविधिरुच्यते *

पूर्ववत् सर्वमन्त्रः स्याद् विशेषस्तूच्यतेऽधुना ।
मन्त्रः - वक्रतुण्डपदं ङेऽन्तं हूं मन्त्रं स्यात् षडक्षरम् ॥
यथा - ॐ वक्रतुण्डाय हूम् ॥
अष्टाक्षरं नमोऽन्तं स्यान्मन्त्रमेतद् द्विधा स्थितम् ।
यथा - ॐ वक्रतुण्डाय हूं नमः ॥
सर्वविघ्नेश मन्त्राणां मन्त्रराजोऽयमिच्छति ।
न्यासः - ऋषिः शुक्रः समुद्दिष्टः छन्दोऽनुष्टुवुदाहृतम् ।
वक्रतुण्डाख्यो विघ्नेशो देवता परिकीर्त्तिता ॥
वं वीजं कथितं चाऽस्य हूं शक्तिः समुदीरिता ।
इष्टाऽऽसौ विनियोगः स्यान् मूलेन करशोधनम् ॥
मूलमन्त्राक्षरैः षड्भिः षडङ्गानि प्रचक्षते ।
न्यासः - मस्तके च भ्रुवोर्मधये हृदि नाभौ च लिङ्गके ॥
आधारे च क्रमान्न्यसेन्मन्त्रवर्ण्णान् पृथक् पृथक् ।
ततः सर्वेण मन्त्रेण व्यापकन्यासमाचरेत् ॥

भावना - पाशाऽङ्कुशाऽभयवरान् धारयन्तं गजाननम् ।
लम्वोदरं त्रिनयनं विचलत् कर्ण्णचामरम् ॥
पद्मे पद्मासनं रक्तं वक्रतुण्डं विचिन्तयेत् ।
एतस्य वैदिकत्वेन पुरश्चर्य्या न विद्यते ॥
यद् वा द्वादश साहस्रं जपमाहुः पुरस्क्रियाम् ।
पूजाविधिः - अथ पुजां प्रवक्ष्येहं बक्रतुण्डमहामनोः ।
विप्रो मृदाऽऽसने शुद्धे प्राञ्जलिः समुपाविशेत् ॥
ॐ हूमस्त्राय फट् प्रोच्य तालत्रयमिहाचरेत् ।
स्फोटिकाभिः दिशो वद्ध्वा प्राणायामं विधाय च ॥
भूतशुद्धिं समाचर्य्य मातृकान्यासमाचरेत् ।
ऋषिश्छन्दश्च देवश्च शिरोजिह्वा हृदिक्रमात् ॥
वीजं शक्तिं च संस्कृत्य विनियोगं तथा स्मरेत् ।
स्व वाह्वोः व्यापकं न्यस्य करन्यासं समाचरेत् ॥
षडङ्गानि ततो न्यस्य ततः प्रत्यक्षरं न्यसेत् ।
विधाय व्यापकन्यासं धयायन्नन्तर्यजेद्धिया ॥
हृत्पद्मं विधिवद् धयात्वा तत्राऽनन्तादिचिन्तयेत् ।
अर्थादनन्ताद्यष्टकुलनागान् चिन्तयेद् हृदि ॥
तस्योपरिस्थिता धयेयास्तीव्राद्या नवशक्तयः ।
यथा - तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी ॥
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ।
सर्वशक्ति समुच्चार्य्य ङेन्तं च कमलासनम् ॥
ततो नमः पदं कृत्वा पीठमन्त्रं समुच्चरेत् ।
यथा - ॐ कमलासनाय नमः इति पीठमन्त्रम् ॥
अनेन कल्पिते पीठे कर्ण्णिकायां गणेश्वरम् ।
मनसा कल्पितैः द्रव्यैरिष्ट्वाजप्त्वा वहिर्यजेत् ॥
तारेणैवाऽर्घ्य पात्रञ्च कृत्वा प्रोक्षणमाचरेत् ।

---

* तारेण - अर्थात् तारमन्त्रेण ।

स्वदेहे मण्डले देवे हव्ये सर्वत्र निक्षिपेत् ॥
आत्मने नम इत्युक्त्वा ललाटे तिलकं न्यसेत् ।
कुसुमं शिरसि क्षिप्त्वा अस्त्रेण स्वासने क्षिपेत् ॥
गुर्वादीन्नमतो मन्त्री पीठपूजां समाचरेत् ।
कर्णिकायां गणेशानां पूजयित्वा यथाविधि ॥
गणाधिपं गणेशञ्च गणनायकमत्र च ।
गणक्रीडं चतुर्दिक्षु केशरेऽङ्गानि पूजयेत् ॥
दलमूलेषु विद्याद्या बक्रतुण्डादयो दले ।
दलान्ते मातरः पूज्या वहिरच्चर्या दिगीश्वराः ॥
ततो वहिस्तदस्त्राणि बज्रादीनि समर्च्चयेत् ।
यथा - बज्रं शक्तिं च खड्गं च पाशो ध्वजाङ्कुशौ गदा ॥
त्रिशूलं चक्रपद्मे च दिक्पालानायुधानि च ।
विद्याद्याः - विद्या विश्वा विश्वधात्री भोगदाविघ्ननाशिनी ।
निधिप्रदीपा पापघ्नी तथा पूर्णशशिप्रभा ॥
बक्रतुण्डाद्याः - बक्रतुण्डैकदंष्टौ च महोदरगजाननौ ।
लम्बोदराख्यविकटौ विघ्नराड् धूम्रवर्ण्णकौ ॥
मातरः - ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ।
वाराहैन्द्री च चामुण्डा महालक्ष्मीश्च मातरः ॥
इन्द्राद्याश्च दिगीशानां सुप्रसिद्धा वुधैः स्मृताः ।
एवमिष्ट्वा गणेशानं जपहोमौ समाचरेत् ॥

ऋष्यादिन्यासः - ॐ नमः बक्रतुण्डाय इति बक्रतुण्डषडक्षर-गणपतिमन्त्रस्य शुक्रभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीबक्रतुण्डाख्यो विघ्नेश्वरो देवता, वं वीजं, हूं शक्तिः, अमुककर्मणि विनियोगः । ततः मूलेन मन्त्रेण करशुद्धिं विधाय मूलमन्त्राक्षरैः षड्भिः षडङ्गानि, यथा - ॐ वं नमः शिरसि, ॐ क्रं नमः भ्रूमध्ये, ॐ तुं नमः हृदि, ॐ ण्डां नमः नाभौ, ॐ यं नमः लिङ्गे, ॐ हूं नमः आधारे । समस्तेन व्यापकं न्यसेत् ॥

ध्यानम् - पाशाऽङ्कुशाऽभयकरं वरदं दधानम् ।
उद्भिन्नशोणमणिसन्निभचारुकान्तिम् ॥

अम्भोज संपुटगतं गणनाथमेवम् ।
ध्यायेत् प्रसन्नमरुणाम्वरसंदधानम् ॥

वि. द्र. - सर्वपूजनकर्म अष्टदलपद्मोपरि भविष्यति । अम्भोजं - पद्मं, अक्षरलक्षणं पुरश्चरणं, अत्र पुरश्चरणं नास्ति वैदिकत्वात् । दशांशं त्रिमधुराक्तैः निम्नोक्ताष्टद्रव्यैः जुहुयात् ।

यथा - मोदकं पृथुकं लाजा सक्तवः नारिकेलकम् ।
पनसं कदली तिलं अष्टद्रव्याणि तान्त्रिकाः ॥

गद्याकारेण पुनः पूजाविधिः -

शुद्धे मृदाशने प्राङ्मुख उदङ्मुखो वा समुपविश्य ॐ हूं फट् अस्त्राय नमः इति तालत्रयंदिग्बन्धनं कृत्वा प्राणायामत्रयं विधाय भूतशुद्धिं समाप्य मातृकां विन्यस्य षडङ्गन्यासं विधाय करे देहे च अन्तर्यजनमारभेत ॥

तद् यथा - स्वहृदयपद्मे ॐ अनन्ताय नमः इत्याद्यासनं विधाय तस्योपरिस्थितं तीव्रादिभिः नवशक्तिभिः युक्ते पीठमन्त्रेण कल्पिते पीठे कर्णिकोपरिस्थितं गणनाथं वक्ष्यमाणक्रमेण परमाऽमृतोद्भूतैः मानसैः द्रव्यैः अभ्यर्च्चय वहिर्यागमारभेत ॥ तद् यथा -

पूर्ववन्न्यासं विधाय ॐ हूं फट् अस्त्राय नम इति अस्त्र मन्त्रेण तालत्रयदिग्बन्धिनं कृत्वा स्थानशुद्धिं विधाय अर्घ्यपात्रं प्रक्ष्याल्य अर्घ्यं संस्कृत्य वह्निसूर्य्यसोममण्डलानि संपूज्य षडङ्गानि विन्यस्य धेनुमुद्रयाऽमृतीकृत्य चक्रमुद्रयाऽभिरक्ष्याऽवगुण्ठ्य दूर्वाऽक्षतादि दत्त्वा सप्तधा जप्त्वा तेन जलेनाऽऽत्मानं पूजाद्रव्याणि च प्रोक्ष्य रक्षार्थमवगुण्ठनाऽमृतीकरणं विधाय स्वशिरसि अर्घ्यविन्दून् प्रक्षिप्य आत्मपूजां ॐ आत्मने नमः, इति ललाटे तिलकं शिरसि च पुष्पं निधाय चेलाऽऽसनमभ्यच्चर्य पूर्वकृतपूजापुटकान्यस्त्रमन्त्रेणाऽर्घ्यविन्दून् निवेद्य अस्त्रमन्त्रेण प्रक्ष्याल्यार्घ्य-विन्दून् प्रक्षिप्य पूजापीठे आसनमभ्यर्च्चयेत् । ॐ आधारशक्त्यादि पीठमन्त्रान्तं संपूज्य देवतामावाह्याऽभ्यच्चर्य गणपतेः स्नानार्थम् उत्थाय प्राथ्य पञ्चामृतसुगन्धोदकादिरत्नाद्यैर्देवं संस्नाप्य मृदुना वाससाऽङ्गं संप्रोच्छ्य रक्ताम्वरं परिधाप्य गाणपत्ये पीठे देवं संस्थाप्य पाद्याऽऽचमनाद्यर्घ्यादिकं

दत्वा पुष्पमारोप्याऽङ्गानि यथास्थानं समाराध्यकेशरेष्वङ्गानि कर्णिकायां चतुर्दिक्षु गणाधिपायगणेशाय गणाधिपाय गणक्रीडाय नमः इति संपूज्य पूर्वादिदलेषु ॐ विद्यायै, विश्वायै, विश्वधात्र्यै, भोगदायै, विघ्ननाशिन्यै, निधिप्रदायै, पापघ्न्यै, शशिप्रभायै नमः, इति संपूज्य दलमूलेषु वक्रतुण्डैकदंष्ट्रालम्बोदर गजाननान् सुमुखविकटविघ्नराजधूम्रकान् यजेत। दलमध्ये ब्रह्माण्याद्या मातॄः दलाग्रेषु लोकेशान् (लोकपाल इत्यर्थः) तद्बाह्ये बज्रादीन् ततः साङ्गसपरिवारं गन्धपुष्पधूपदीपनैवेद्य नानाभक्ष्यैः संतर्प्य किञ्चित् जप्त्वाऽचमनाऽनन्तरं हस्तोद्वर्त्तनादिकर्पूरताम्बुलं निवेद्य आरात्रीनिराजना-दर्शनादि दत्त्वा जपं कृत्वा होमं विधाय देवं स्तुत्वा होमाऽशक्तौ द्विगुणं चतुर्गुणं वा जप्त्वा पराङ्मुखाऽर्घ्यं दत्त्वा देवस्य परिवारादीन् देवालयं नीत्वा देवं तेजोराशिं हृदये द्वादशान्ते वा नियोजयेत्। प्रतिमादिषु चेन्निरोधार्घ्यं दत्त्वा निरोधमुद्रया निरोधयेत् । द्वाशशान्ते अर्थात् हृच्चक्रस्य द्वादश वर्णेषु ।

॥ इति मुक्तावल्यां षडक्षरवक्रतुण्डपूजाविधिः ॥

* इष्टकर्माणि *

अयमेव षडक्षरमन्त्रः नमोऽन्तः अष्टाक्षरवक्रतुण्डमन्त्र एव । विशेषस्तु आङ्गिरस ऋषिः । अन्यत् सर्वं पूर्ववत् ।

पप्रच्छाऽङ्गिरसं प्राज्ञः पिप्पलादः कृताञ्जलिः ।
ब्रूहि काम्यानि कर्माणि बक्रतुण्डमहामनोः ॥

अङ्गिरा उवाच - यानि काम्यानि कर्माणि बक्रतुण्डमहामनोः ।
तानि सर्वाणि वक्ष्यामि संक्षेपेण महामुने ।
इह काम्यपदार्थानां पुत्रः प्रथम इष्यते ।
तदुत्पत्तौ नरो लोके कृतार्थो भवति ध्रुवम् ॥
ततः पुत्रार्थिनः कर्म मुख्यं काम्यं तदुच्यते ।
सौवर्णं विधिवद्दन्तं शतमानेन कारयेत् ॥

पुत्रार्थम् - त्रिकोणं मण्डलं मध्ये ततः षड्दलमण्डलम् ।
ततश्चाष्टदलं पद्मं चतुरस्रं ततो भवेत् ॥

त्रिकोणे देवता कार्य्या मन्त्रवीजेन संयुता ।
षड्वर्ण्णं षड्दले मन्त्रम् अष्टवर्ण्णाऽष्टपत्रके ॥
एवं यन्त्रं विनिर्माय संस्कुर्य्याद् विधिना वुधः ।
गणेशं तत्र संपूज्य वह्निं कुण्डेऽथ पूजयेत् ॥
ततः पलाशसमिधो मधुरत्रय संयुताः ।
जुहुयात् त्र्ययुतं मन्त्री हुनेत् तावच्च सर्पिषा ॥
अथवा समिदाज्यस्य जुहुयादयुतं वुधः ।
ततः सुपुत्रमाप्नोति कृतार्थो येन वै भवेत् ॥

अनाद्यर्थम् - धनार्थी विल्वसमिधा सर्पिषा चैव होमयेत् ।
विद्यार्थ्यश्वत्थसमिधा घृतेनाऽपि च होमयेत् ॥
जयार्थी पूर्ववद् हुत्वा रिपुणा जयमश्नुते ।
अश्वकामो वटाऽऽज्यश्च गजार्थी पर्ण्णसर्पिषा ॥
आयुष्कामश्च दूर्वाऽऽज्यं भूम्यर्थी चन्दनं घृतम् ।
कन्यार्थी केवलाज्यं च धर्मार्थी कुशसर्पिषा ॥
ब्रह्मवर्च्चसकामश्च केवलाज्येन होमयेत् ।
अष्टद्रव्यैस्त्रिमध्वक्तैर्गजार्थी होममाचरेत् ॥
सर्षपैः राजपुत्रार्थी ब्राह्मणार्थी घृतं हुनेत् ।
स्त्रीकामोऽगुरुसर्पिश्च श्रीकामःपद्मसर्पिषा ॥
राज्यकामो विल्वघृतं आरोग्यार्थीच सर्पिषा ।
अश्वत्थाज्यं शान्तिकामः वृष्ट्यर्थी वेत्रसाज्यकम् ॥
धान्यार्थी धान्यसर्पिश्च गजार्थी गव्यसर्पिषा ।
शस्यार्थी शस्य सर्पिश्च करभार्थीच चिक्कणम् ॥
धात्रीघृतं च रत्नार्थी वस्त्रार्थी पद्मकाष्ठकम् ।
अन्नकामश्चान्नघृतं सर्वदा होमयेद् वुधः॥
सर्वोपद्रवशान्त्यार्थं अभिषेक विधिं चरेत् ।
नारसिंहाऽभिषेकस्य विधिवत् सर्वमाचरेत् ॥
अथ किं वहुनोक्तेन वक्रतुण्डमहामनोः।
असाध्यं न किमप्यस्ति मन्त्रमेतं जपेत् सदा ॥

अथाभिचारे :- अथ स्तम्भन मन्विच्छन् अपामार्ग समिद्वरैं ।
स्तम्भनार्थं :- मधूर त्रयसंयुक्तै रयुतं जुहुयाद् वुधः॥
अत्राऽमुकं स्तम्भयेति मन्त्रस्यान्ते प्रयोजयेत् ।
आदावन्तेच मन्त्रस्य वाक्यं चैतत् प्रयोजयेत् ॥
उत्तोलितमहातुण्डः वक्रतुण्डो रिपून्मुखः ।
स्तम्भयन्निवसंचिन्त्यः साधकेन्द्रेण धीमता ॥
एवं सम्मुखमायान्तं सम्भयित्वा महारिपु ।
विद्रावयितुं कामश्चेत् तदैवं कर्मकारयेत् ॥
विद्रावणाय :- अष्टद्रव्यैस्त्रि मधुरेणाऽऽप्लुतै रयुतं हुनेत् ।
विद्रावयेद्रिपु कुलं शिघ्रमेव न संशयः ॥
मन्त्राऽन्ते चामुकं शीघ्रंविद्रावय पदत्रयम् ।
प्रयोजयेन्मन्त्रवादी प्रत्याहुति समाहितः ॥
मृगीयूथं यथामत्त महाकरिवरः स्वयम् ।
विद्रावयति तद् वच्च विचिन्त्यो गणनायकः ॥
अथवा केवलैराज्यैः जुहुयाच्छत्रु विद्रवे ।
अपामार्गसमिद्भिर्वा पलायित रिपुः स्वयम् ॥
यद्येवं न पलायेत परविद्या निवारकः ।
तत् पलायन सिद्ध्यर्थं परविद्या न्निवारयेत् ॥
पुनर्विद्रावणं कुर्य्याद् यथा शास्त्रमनन्यधीः ।
अथवा विजया कांक्षी वलवाहन संयुतः ॥
ततोऽभया महाशान्तिं कारयेच्च विधानतः ।
तेनाऽति जयाकामेन प्रयोगः क्रियते यदि ॥
तन्निवारण कामोऽयं कुर्य्यात् प्रतिहत क्रियाम् ।
यदि सोऽपि प्रकुर्वीत प्रतिघात्य विचारधीः ॥
कुर्य्यादप्रतिघात्यन्त प्रतिघात निवारिणीम् ।
एवं विजय मासाद्य राजा मन्त्र विदे ततः॥
प्रदद्याद् दक्षिणाश्रेष्ठं ग्रामं तत् तृप्तिकारणम् ।
विद्वेषणार्थम् - विद्वेषणं यदीच्छेच्च शत्रुराज्यविनाशम् ॥

नारिकेलैस्तदाहुत्वा सम्मोहयति मन्त्रवित् ।
रिपुरत्र निरुत्साहः सुसुप्तः विवशो भवेत् ॥
रिपुं वशगतं ज्ञात्वा तदाऽऽकर्षं यदीच्छति ।
तदैवं कर्मकुर्वीत यथाऽऽह सोशना कविः ॥
नारिकेलस्य शकलैर्मधुरत्रयसंयुतैः ।
त्र्ययुतं वाऽयुतं वाऽपि जुहुयाद् ब्रह्मवेदवित् ॥
रिपुं पाशेन सम्बद्ध्य अङ्कुशेनाऽनयत् स्वयम् ।
गणेशोरक्तवर्ण्णं स्याद् ध्येयः आकर्षणे सदा ॥
मन्त्राऽन्ते अमुकं शीघ्रमाकर्षेति पदत्रयम् ।
योजयित्वाऽग्निकुण्डेतं सम्मुखं चिन्तयन् हुनेत् ॥
अथ चेद् यजमानस्य द्रव्यं संपद्यते न हि ।
तदा चतुर्गुणं जप्त्वा शत्रुमाकर्षयेद् ध्रुवम् ॥
द्रव्यहीनं न कर्त्तव्यं कृते फलविपर्य्ययः ।
द्रव्यहीनाच्च हवनाद् वरमाहुः जपं वुधाः ॥
द्रव्यवैगुण्यदोषेण कृतमप्यकृतं यतः ।
तस्मात् सन्तः प्रशंसन्ति मानसं जपमुत्तमम् ॥
देवादेरुपचाराद्यैराचार्य्याय निवेदयेत् ।
स्वर्ण्णं रत्नं च धान्यञ्च यानं ग्रामं गवां शतम् ॥
कर्त्रे च दक्षिणां दद्याद् यजमानस्य तोषिणिम् ।
उच्चाटनार्थम् - अथवोच्चाटनं वाच्छन् कर्मेदं कारयेन्नृपः ॥
राजिकाभिस्त्रिमधुराऽऽज्यक्ताभिस्त्र्ययुतं हुनेत् ।
मन्त्राऽन्ते चामुकं शीघ्रमुच्चाटय पदत्रयम् ॥
योजयन् होमकाले तं सम्मुखं प्रविचिन्तयेत् ।
दुष्करेण रिपुं पौनःपुन्येनाऽतिभृशं वहु ॥
ध्वन्युक्तं गणपं विप्रो ध्यायेदुच्चाटने सदा ।
एवमुद्वेचितं शत्रुं सम्यक् ज्ञात्वा महीपतिः ॥
विद्रावणस्य सिद्ध्यर्थं कारयेद् ब्रह्मविद्द्विजैः ।
त्रिमधुरमरीचैश्च कटुतैलेन संयुतैः ॥

जुहुयात् पूर्ववन्मन्त्री पूर्ववद्ध्यानतत्परः ।
एवं सम्मुखमायान्तं सम्यगुच्चाट्य तत्परम् ॥
विद्राव्यसुकृती राजा कृतकृत्यो महान् भवेत् ।
वेदशास्त्रार्थनिःस्नातः सदाचारसमन्वितः ॥
राजभिः पूजितो विप्रो जगद्रक्षा परायणः ।
रिपूच्चाटनविद्रावौ कुर्वीत न स पापभाक् ॥
॥ इति इष्टाकर्माणि ॥

✻ अथ भृगूक्तबक्रतुण्डकल्पः ✻

ॐ नमो बक्रतुण्डाय, ऋषय उचुः -
भगवन् ! कथितः कल्पो मृतसंजीवनस्य तु ।
रुद्राऽध्यायस्य कृत्स्नस्य कल्पस्यैव महामते !
मन्त्राणां युगभेदेन शक्तिभेदश्च सूत्रतः ।
इदानीं श्रोतुमिच्छामि मन्त्रराजं षडक्षरम् ॥
स्वरूपं साधनं चैव पुरश्चरणमेव च ।
विनियोगश्च सिद्धिं च व्यासशिष्यमहामते !
सुत उवाच - वक्ष्यामि परमं गुह्यं कलौ सिद्धिवरं नृणाम् ।
वैनायकं महामन्त्रं यथा व्यासाच्छ्रुतं मया ॥
वि : ज्ञा : - पुरा कलियुगे विप्राः कल्पे वै मेघवाहने ।
त्रयोदशान्तरे प्राप्ते पुनः षष्ठे चतुयुर्गे ।

अर्थात् - चतुर्विंशतितमे कलियुगे, अधुनाऽष्टाविंशतितमः कलियुगः प्रचलति । सङ्कल्पवाक्यं द्रष्टव्यम् । ६ X ४ = २४

मुनयः कलिदोषेण भाग्यहीनाः सुदुःखिताः ।
सदाराः साऽग्निहोतारः भार्गवं शरणं गताः ॥
सिद्धाश्रमे समासीनं सुराऽसुरनमस्कृतम् ।
तत्र शुक्रं समासाद्य मुनयो मुनिपुङ्गवाः ॥
उचुः प्राञ्जलयः सर्वे नमस्यन्तः सुरर्षयः ।
भगवन् कलिदोषेण भाग्यहीनाः सुदुःखिताः ॥
श्रिया वहिष्कृताः सर्वे तपः प्रज्ञा विवर्जिताः ।

प्रत्युपायमपश्यन्तस्त्वामेव शरणं गताः ॥
यथा न तपसो हानिः स्वाध्यायस्य श्रुतस्य च ।
न भवेच्चाग्निहोत्रस्य तथोपायं वद प्रभो !
एवमुक्तो मुनिवरैः शुक्रोमन्त्रविदां वरः ॥
चिन्तयामास युक्तात्मा प्रत्युपायं तपस्विनाम् ।
चिरं चिन्तयतस्तस्य महर्षे भावितात्मनः ॥
प्रादुर्बभूव मनसि मन्त्रराजः षडक्षरः ।
तप्तचामीकरप्रख्यो बक्रतुण्डायहूम् इति ॥
चिन्त्यमानस्य शुक्रस्य जपतश्च षडक्षरम् ।
षडङ्गानि क्रमेणैव प्रादुरासीन् मुनीश्वराः ॥
हृदये वै नमस्कारः, स्वाहाकारश्च मूर्द्धनि ।
वषट्कारः शिखायां तु हूं कारः कवचे तथा ॥
वौषट्कारश्च नेत्रेषु फट्कारोऽस्त्राय फट् समम् ।
इत्यौशनि षडङ्गानि स्फुरितानि महात्मनः ॥
स लब्ध्वा तु महामन्त्रं षडङ्गेषु षडक्षरम् ।
सहस्रकृत्वो मतिमान् जजाप भृगुनन्दनः ॥
जपन् वै संततं पश्यन् गजवक्त्रं चतुर्भुजम् ।
लम्वोदरं त्रिनयनं पाशाङ्कुशधरं परम् ॥
वरदाऽभयहस्तं च चलत् कर्ण्णसुचामरम् ।
दृष्ट्वा तु परमं देवं व्योमस्थं हेमरूपिणम् ॥
उत्क्रीडमाणं गगने गणेशं तुष्टाव मन्त्रेण षडक्षरेण ॥
समस्ततो दैवतदेवसूनुः सुतं भृगोर्वाक्यमुवाच हृष्टः ।
प्रीतोऽस्म्यहं शुक्र ! षडक्षरेण जपेन मां पश्य गणाधिनाथम् ॥
अवैहि मां भार्गव ! बक्रतुण्डं षडक्षरात्मानमनाथ वन्धुम् ।
व्रवीमि ते मन्त्रवरं सकल्पं साङ्गं स पौरश्चरणं च सिद्धिम् ॥
ऋर्षि च दैवञ्च षडक्षरस्य छन्दश्च शक्तिं च शृणुष्व विप्र ।
ऋषिस्त्वमऽस्यास्य विधेयभावं मां विद्धिदेवं वरदं गणेशम् ॥
आनुष्टुभं शान्तिकपौष्टिकाद्यैराथर्वणं मन्त्रमिमं वदन्ति ।

रायष्पोषस्य दाता च निधिदो रत्नोद महान् ।
रक्षोहणो वल्महनो मन्त्रराजः षडक्षरः ॥
य एतेन चतुर्थ्यां वै पक्षयोरुभयोरपि ।
शतं जुहोति पूपानां वत्सराल्लभते धनम् ॥
इत्याख्यातं महामन्त्रं गुरोर्लब्ध्वा समाहितः ।
ब्रह्मचर्य्यरतो दान्तः सत्यवाग्गुरुपूजकः ॥
हविष्याशी च निरतः दृढभक्ति समन्वितः ।
जपेद् द्वादशसाहस्रं तत्पुरश्चरणं भवेत् ॥
अङ्गारकदिने प्राप्ते चतुर्थ्यां वा समाहितः ।
अभ्यर्च्चर्यगन्धपुष्पाद्यैर्हविषा पायसेन माम् ॥
भोजयेत्कार्य्यसिद्ध्यर्थं मन्त्रविद्वरदं शुभम् ।

कुण्डविधिः-

अथाग्निकुण्डं चतुरस्ररूपं ममाग्रतो हस्तसमं स मन्त्री ।
देवालये वाऽथ गृहे नीडे वा कुण्डं विदध्याच्छुचिना प्रदेशे ॥
कृत्वा मथित्वाग्निमथोदधीत हरेदनुगनगृहादवाप्यम् ।
अङ्गानिविन्यस्य यथाप्रदेशं प्राणांस्त्रिरायम्य तथाऽऽरभेत ॥
अग्निं समिद्भिः कुसुमं विकीर्य्य दर्भैः परिस्तीर्य्य निधाय विप्रः ।
तत्राऽग्नि मध्ये भुजगोपवीतं लम्वोदरं भास्वरमेकदन्तम् ॥
पद्मासनासीनमयुग्मनेत्रं चतुर्भुजं हारकिरीटयुक्तम् ।
केयूरकं हेमनिभास्यमादौ समाह्वयेद् वै मनसा विचिन्त्य ॥
आवाह्य गन्धादिभिरर्च्चयित्वा जलेन वह्निं परिषिच्य पश्चात् ।
ॐकार पूर्वेण षडक्षरेण स्वाहाकृताऽन्तेन सुसंहितेन ॥
आज्याहुतीनां जुहुयात् सहस्रं अष्टोत्तरं सिद्धिरियम् मयोक्ता ।
नित्यं हि मद्ध्यानपरं ममाग्रे जपेत् सहस्रं त्रिंशतं शतं वा ॥
अष्टोत्तरं मन्त्रविदप्रमत्तः लभेत वह्नीमचिरेण लक्ष्मीम् ।
चित्तप्रसादो मनसश्चतुष्टिरल्पाशिता स्वापपराङ्मुखत्वम् ॥
स्वप्ने गजानामुपलम्भनञ्च सिद्धस्य चिह्नानि भवन्ति भूयः ।
व्रवीमि मद्भक्तहिताय शुक्र ! महानिधिप्राप्तिकरं ह्युपायम् ॥

सिद्धौदनेन त्रिशतं त्रिमासान् मन्त्रेण योऽग्नौ जुहुयान् ममाग्रे ।
स भाजनं सर्वमहानिधीनां भवेन्महावैश्रवणो यथा सः ॥
यो वा ममाग्रे पृथुकैः गुडाक्तैः स नारिकेलैर्मधुराभियुक्तैः ।
अग्नौ सहस्रं जुहुयात् स मन्त्री धनं लभेच्चाक्षयमद्भूतञ्च ॥
इदमतीव रहस्यमसंशयं शृणु वदामि महानिधिदर्शनम् ।
अभिनवैः सितशालिमयैः शुभैःमरिचजीरकसैन्धव मिश्रितैः ॥
वहुगुडैःसुशुभैश्चघृताप्लुतैःसरसवद्भिरपूपसहस्रकैः ।
ममदिनेजहुयान् मम सन्निधौ स लभतेह्यचिरेण महानिधिम् ॥

वशार्थं - यदावशीकर्त्तुमभीष्ट्यतेयं तस्याथनामाक्षरसंपूटेन ।
मन्त्रेण मन्त्रीशुभमादधीत वह्नावपामार्गसमित् सहस्रम् ।
मधुत्रयाक्तं मम सन्निधौतु नारीं नरं वा वशमानयेत् सः ॥
फलैः सुपक्वैः पनसप्रसुतैः रम्भोत्तमैर्वा कदलीफलै र्वा ।
हुत्वा सहस्रं मम सन्निधौ तु नारीं नरं वा वशमानयेत् सः ॥
कन्याभिलाषी मनसा विचिन्त्य यां कन्यकां मन्त्रवरेण लाजैः ।
अग्नौ सहस्रं जुहुयान् ममाग्रे तामेवकन्यां लभतेऽचिरेण ॥
आज्याहुतीनां जुहुयाच्च लक्षं मृत्युंजयेदत्रन संशयोऽस्ति ।
मधुत्रयाभ्यक्त समित् सहस्रं पलाशमग्नौ जुहुयात् जयार्थी ॥
विजित्य सोऽनेकरिपूनशेषान् स मोदते वृत्ररिपुंयथेन्द्रः ॥

मारणार्थं-

विभीतकानां जुहुयात् सहस्रं अष्टोत्तरं लोहितमिश्रितञ्च ।
अग्नौ निशायां प्रहरेश्मशाने संमारयेच्छत्रुकुलं समग्रम् ॥
भूमौ स्वशत्रुप्रतिमां विलिख्य प्रज्वाल्य वह्निं जठरे प्रदेशे ।
सिद्धार्थमग्नौ जुहुयात् सहस्रं तं मारयेत् सप्तदिनेन शत्रुम् ॥

उच्चाटनार्थं-

क्रुद्धं गणेशं घनकालवर्णं शत्रुं गृहीत्वा निजपुष्करेण ।
क्षिपन्तमग्नौ वडवामुखास्ये ध्यात्वैवमात्मानमनन्यभावः ॥
जपेत्सहस्रं त्रिदिनेन शत्रुमुच्चाटयेद् दूरमपि स्वदेशात् ।

अभिचार-

सर्वाऽभिचार प्रशमार्थमन्यद् ब्रवीमि ते शुक्र ! महाभिषेकम् ॥

शान्त्यर्थं-

समुद्रगां प्राप्य नदीं सुपुण्यां तोऽयं गृऽहीत्वाऽञ्जलिनाऽभिमन्त्र्य ।
सहस्रकृत्वो निजमूदि्ध्र्न सिञ्चेत् मुञ्चेत् स मन्त्रीनिखिलान्नघौघान्

ग्रहशान्त्यर्थं-

अश्वत्थमालभ्य शनिश्चरस्य दिने सहस्रत्रितयंजपेद् यः।
तथा- ध्यायन् समां तत्र वनस्पतौ तु सर्वग्रहोत्थान् विनिहन्ति दोषान् ।

वृष्ट्यर्थं-

यो वृष्टिकामो नियतस्त्रिरात्रं मामर्च्चयित्वा शुभगन्धपुष्पैः।
स वेतसानां जुहुयात् समिद्भिः अब्दौ सहस्रं च भवेद्धि वृष्टिः ॥

धान्यार्थं-

धान्याभिलाषी जुहुयाच्च धान्यैः रत्नाभिकाङ्क्षीजुहुयाच्च रत्नम् ।
वस्त्राभिकांक्षी कमलोत्पलाद्यैः क्षेत्राभिकांक्षी कमलैः गुडाक्तैः ।

पुत्रार्थं- अतःपरं भार्गव ! ते ब्रवीमि वध्वाः चिकित्सां जगतोहिताय ।
मामर्च्चयित्वा पृथुकैरपूपैः फलोत्तमैः पायसमोदकाद्यैः ॥
मन्त्री हरिद्रा मथसैन्धवञ्च वचां च निष्पाद्य तदर्द्धभागम् ।
कृत्वातु मन्त्रेण निघृष्य चूर्ण्णं मूत्रे गवां वै प्रसृतिप्रमाणे ॥
निक्षिप्यतं मन्त्रवरेण विद्वान् सहस्रकृत्वस्त्वभिमन्त्रयेत् तु ।
स्नातामृतुस्नानदिने विशुद्धां शुक्लाम्वरां मत्पुरतोनिवेश्य ॥
उत्पाययेत् तामचिरेण साध्वीं पुत्रं प्रसूते चिरजीविनं सा ।
एवं पिवेत् सा नियमेन साध्वीं प्रागेव वर्षाल्लभते च गर्भम् ॥

मेधार्थं - उपोष्य सोमग्रहणेऽथ विद्वान् सूर्य्यग्रहेवाऽप्यभिषिच्य मां वै ।
पलं गृहीत्वा कपिला घृतस्य चूर्ण्णं वचायाश्च तदर्द्धभागम्॥
सहस्रकृत्वस्त्वभिमन्त्रयित्वा मत्सन्निधौ तत् प्रपिवेदशेषम् ।
अवाप्यमेधां महतीं क्रमेण संपठ्य पद्यान्यचिरं ब्रवीति ॥
जानाति शास्त्रं किल दृष्टिमात्रं भवेच्च वाचस्पतितुल्यपूज्यः ।

अतःपरं किं वहुनोदितेन ब्रवीमि मत् प्रातिकरं ह्युपायम् ॥
वद्ध्वा- वद्ध्वासनं स्वस्तिकमव्जकं वा स्वाकार संस्थानगतं विचिन्त्य ।
तत् कर्ण्णिकायां स्फटिकप्रकाशं मां चिन्तयेन् मन्त्रवरस्वरुपम् ॥
षडक्षरं मन्त्रवरं सुनादं ध्यायद्दलेष्वष्टसु अष्टशक्तीः ।
एवं स्वनाभौ हृदये गलेवा आस्ये भृवोरन्तरके ललाटे ॥
स्वमस्तके वाऽप्यथवा शिखायां विचिन्तयेन् मां स्वतनुत्रयेऽपि ।
एवं नियुञ्जन् विनिहत्य दोषान् मारेन निर्वाणमुपैति योगी ॥
एवं च ते मन्त्रवरं माहात्म्यं ब्रवीमि मत् तुष्टिकरं द्वितीयम् ।
षडक्षरं मन्त्रवरं नमोऽन्तमाद्यं कलौसिद्धिकरं नराणाम् ॥
एतेन मामाङ्गरको महर्षिरतोषयत् सागरतीरभूमौ ।
तस्माद्दषीमाङ्गरकं तमेव षडक्षरस्याऽस्य समामनन्ति ॥
अङ्गानि पञ्चैव न नेत्रमत्र सर्वं हि पूर्वेण समानमन्यत् ।
एतावुभौ मन्त्रवरौ सुरैः प्राक् मम प्रियौ वेदरतैश्च गीतौ ॥
साङ्गौ सकल्पौ सुगुरुपदेशात् कात्स्न्येन यो वेद स वेदवेत्ता ।
इदं हि ते गुह्यतरं ब्रवीमि गोचर्ममात्रा मुपलभ्यभूमिम् ॥
विकीर्य्यधान्यं परितश्च मन्त्री संस्थापयेदर्च्चित पूर्ण्णकुम्भम् ।
तस्योपरिष्टात् कपिलाघृतेन पूर्ण्णं प्रतिष्ठाप्य नवं शरावम् ॥
आरोपयेत् तत्र शरावमध्ये मन्त्रद्धयस्याऽन्यतरेण मन्त्री ।
आवाह्य मां तत्र घृतप्रदीपे संपूज्य गन्धादिभिरप्य पूपैः॥
स्नातां कुमारीमथवा कुमारमभ्यर्च्चयेदीपस्य पुरो निधाय ।
ध्यात्वा जपन् मन्त्रवरं स मन्त्री मां तत्र दीपे द्विजपर्य्यरूपम् ॥
पश्येत् कुमारीमथवा कुमारं अभ्युत्थितं वाप्यथवा निविष्टम् ।
अनागतं वा सकलं ब्रवीमि मन्त्रप्रभावेन जगद्धिताय ॥
तत्राऽथमन्त्रप्रवरौ प्रदाय शुक्राय शुक्राऽर्च्चितपादपद्मः ।
संस्तूयमानो दिवि सिद्धसंघैरन्तर्दधे कुञ्जरराजबक्त्रः ॥
तस्मिन् गते देववरे प्रसन्ने चिन्तामणौ वा विपरीतनेत्रे ।
तस्मै महस्कन्दमहोदराय महोदरायाऽऽह मुनिः स शुक्रः ॥

॥ इति भृगुप्रोक्त षडक्षर बक्रतुण्ड कल्पः ॥

※ अथ सिद्धौदनप्रकारः ※

सुशालितण्डुलप्रस्थं तदर्द्धमुच्चो भिन्नकम् ।
चतुष्पलं गुडं चैव तदर्द्धं नारिकेलकम् ॥
मरिचं मुष्टिमात्रं स्यात् तदर्द्धं सैन्धवं रजः ।
तस्यार्द्धं जीरकं दद्यात् कुडवार्द्धं घृतं तथा ॥
गोक्षीरेणाऽऽढके चैव सिद्धं मन्दाग्निना ततः ।
सिद्धौदनमिदं ज्ञेयं विघ्नेशस्य प्रियावहम् ॥

केचिदेवमाहुः - एकस्मिंस्तण्डुलप्रस्थे क्षीरप्रस्थं विपाचयेत् ।
चतुष्पलं गुडं चैव प्रस्थार्द्धं चैव सर्पिषः ॥
मरिचं मुष्टिमात्रं स्यात् तदर्द्धं जीरकं क्षिपेत् ।
धरुणं सैन्धवं चैव चूर्णितं निक्षिपेत् सुधीः ॥
कदलीपनसादीनि फलानि च विनिक्षिपेत् ।
एवं संस्कृत्य सिद्धान्नं गणेशाय निवेदयत् ॥

※ अथ सर्वतोभद्रमण्डलं लिख्यते ※

उभयत्र सप्तदशरेखा कृतत्रिपदानि निर्माय मध्यकोष्ठकर्ण्णिकायां पीतरजोदत्त्वा अनन्तरं षोडशसु कोष्ठेषु अष्टौ पत्राणि शुक्लानि विरच्य तन्मूलेषु हारिद्रं रजो दत्त्वा रेखाद्वयद्वयदीर्घकेशरान् विधाय पत्राग्राणि रक्तानि रचयित्वा दलसन्धिमध्यकोणेषु दलवाह्ये चतुरस्रमध्यरेखावीथीः हारिद्ररजसा निर्वाह्य लताः श्यामाः संपाद्य वाह्यद्वाराणि शुक्लानि जनयित्वा पार्श्वद्वयोः हरिद्रारजसाकल्पितयोः शोभयोरनन्तरं उपशोभयोः रक्तं रजः दत्त्वा कोशेषु कृष्णं वाह्यत्रये शुक्लरक्तकृष्णानि ॥

॥ इति सर्वतो भद्रमण्डलम् ॥ (प्रकाशितमण्डलादिदं भिन्नम्)

※ अथ आनुष्टुभकल्पमाला ※ (शेषकृता)

ॐ नमः लक्ष्मीनृसिंहाय

प्रकृतिप्राकृताऽशेषविशेषा यद्विभूतयः ।
प्रविशन्तु ममाऽन्तस्ते विष्णोश्चरणरेणवः ॥

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थले योगारूढम् अतिप्रसन्न वपुषं, भूषासहस्रोज्वलं, त्र्यक्षं, चक्रपिनाक साऽभयवरं विभ्राणम्, अर्कच्छविम् छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजेत् ॥४॥

श्री तापनीय श्रुतिसारसूत्रात् सत्संप्रदायाऽमलगन्धशोभा ।
नित्यं नृसिंहस्य करोतु सैषा सन्तोषमानुष्टुभकल्पमाला ॥

सकृच्छ्रुताऽप्यसौ विद्या सद्यो दहति संसृतिम् ।
कुलदाहे क्रियानस्ति कालः कालाऽनलाऽर्च्चिषः ॥
अस्या महिमसीमानम् अविदित्वा निवर्त्तते ।
अप्यौपनिषदां वाणी पौरषेया तु किं पुनः ॥
अनन्तेवासिनामेनां वदन्ति कुटिलात्मनः ।
लंघयन्ति नृसिंहस्य दिव्यामाज्ञामवज्ञया ॥

तस्मात् स्नानादिकं समाप्य सन्ध्यादिक्रियां परिसमाप्य विविक्तदेशमागम्य प्रक्षालितपाणिपदः आचान्तः प्राङ्मुखः उदङ्मुखो वा मृदासने पवित्रपाणिरुपविश्य ईश्वरं शेषं गुरुं च परंपरया देवताः नमस्कृत्य ॐ भद्रं कर्ण्णेभिरित्यादिकं प्रजप्य स्मार्त्तमार्गेण आसनप्राणायामौ कुर्य्यात् । भूतशुद्धिमातृकान्यासादिकं च कुर्य्यात् । ध्यानश्लोकोक्तमार्गेण स्वयं नृसिंहोभूत्वा श्रीनृसिंहानुष्टुभं मन्त्रराजं व्यवहरेत् । अस्य विधिः, ऋष्यादिन्यासः, ब्रह्माप्रजापतिः ऋषिः, अनुष्टुप् छन्दः, भगवान् महामङ्गलेश्वरो लक्ष्मीनृसिंहो महाविष्णुर्देवता इति शिरसि वदने हृदये च न्यसेत् । उदात्तः स्वरः, शुक्लो वर्ण्णः, नृ इति दृष्टं कीलकं ज्ञातं, स सिद्धेरप्रतिबन्धकं, स इत्यदृष्टं कीलकं ज्ञातं, सत् सिद्धिप्रदं, इं शक्तिः हं वीजम्, नृं सं इं हं "लक्ष्मी नृसिंह प्रसादार्थे विनियोगः ।" इति न्यस्य वामाङ्गसङ्कोचेन दिव्यान् विघ्नान् निःसार्य्य ॐ अपसर्पन्तु ते भूताः ये भूता भूमिसंस्थिताः । ये भूताः विघ्नकर्त्तारः ते नश्यन्तु शिवाज्ञया । शार्ङ्चक्राय सशराय सहस्रारसुदर्शनास्त्राय हूं फट् । नाराचमुद्रया विघ्नान् निःसार्य्य प्राणवीजशक्ति प्रणवान्तेन मूलमन्त्रेण प्रत्येकं त्रिवारं जप्तेन प्राणायामत्रयं कृत्वा मूलमन्त्रस्य चतुर्भिः पादैः समस्तेन च अङ्गुष्ठाद्यङ्गुलिन्यासं हृदयाद्यङ्गन्यासं व्यापकन्यासं च विधाय अर्थात् प्राणशक्तिवीजसामसहित मूलमन्त्रेण मन्त्रसाम्ना द्विस्वरेण मिश्रणसामान्तेन

व्यापकं न्यस्य, तथैव षट् स्वरैस्तत् सामभिः महाचक्रेपञ्चाङ्गन्यासं कुर्य्यात् । तत्र मूलमन्त्र प्रथमपादस्य प्रणवोऽङ्गम् यथा – ॐ उग्रं वीरं महाविष्णुम् द्वितीयपादस्य प्रणवहृल्लेखा पूर्वक श्रीवीजप्रणवान्तो घृणिमन्त्रः । तृतीयस्य प्रणवपूर्विका यजुः लक्ष्मीः, चतुर्थस्य नृसिंहगायत्री प्रणवादिना ॥

तत्र द्विस्वरसामस्वरूपम् उच्यते –

प्रणवाऽवयवैराद्यक्षराद्विनाऽन्यद् उदात्तेन अङ्गुष्ठाग्रेण, तर्जन्या मध्यपर्वस्पर्शेण, अङ्गुष्ठाग्रतः कनिष्ठामूलपर्वस्पर्शेण मन्त्रं स्वरेण गात्वाऽनुदात्तेन तथैव शक्तिवीजाक्षराणि प्रगाय मूलमन्त्रप्रथमपादमनेनैव न्यायेन प्रगाय अन्ते च तदङ्गं प्रणवसममान न्दादिपदं उक्त्वा उभयहस्तयोः अङ्गुष्ठाभ्यां नमः इति विन्यस्य एवं द्वितीयपादमनेन एव न्यायेन प्रगाय प्रणवहृल्लेखा पूर्वकं श्रीवीजसहितं घृणिमन्त्रमुच्चार्य्य प्रियादि पदमुक्त्वा तर्जनीभ्यां विन्यस्य, एवं तृतीयपादसाम अभिधाय प्रणवपूर्विकां यजुः लक्ष्मीमुक्त्वा ज्योतिरादि पदमभिधाय मध्यमाभ्यां नम इति विन्यस्य, अनेनैव न्यायेन चतुर्थपाद साम प्रगाय नृसिंह गायत्र्यान्तु प्रणवमाद्यक्षरत्वेन निवेश्य मायादिपदमुक्त्वा अनामिकाभ्यां नम इति विन्यसेत् । ततः प्रणवशक्तिवीजपूर्वकं प्रथमपादं तदङ्गं प्रणवञ्च प्रगाय ततो द्वितीयपादं प्रगाय घृणिमन्त्रमुक्त्वा ॐ विद्युद्वर्ण्णा यज्ञानात्मने कनिष्ठाभ्यां नमः, ततः तृतीयपादं यजुः लक्ष्मीं चतुर्थपादं नृसिंह गायत्रीं मिश्रणसाम च क्रमेण प्रगाय सर्ववर्ण्णात्मने करतलकरपृष्ठाभ्यां नमः इति विन्यसेत् ॥

अथ द्विस्वरमिश्रणसामस्वरूपम् –

प्रणवाद्यक्षरं शक्त्याह, शक्त्या प्रथमं, प्रणवाद्यक्षरेण द्वितीयं, वीजेन तृतीयं, प्रणवद्वितीयेन चतुर्थं, शक्त्या पञ्चमं, प्रणवतृतीयेन षष्ठं, वीजेन सप्तमं, प्रणवेन चाष्टममिति । एवमष्टाक्षराण्यासाद्य शक्ति प्राथम्येन मिश्रेण द्वन्द्वशः प्रगेयमिति ॥

अथ षट्स्वरसामस्वरूपम् –

प्रणवाऽवयवैस्त्रिभिः प्रणवेन च पुनः तदवयवैस्तेन च

अष्टाक्षराणि भवन्ति । यथा – अं ऊं मं ॐ अं ऊं मं ॐ, शक्तिवीजद्वयस्याऽपि चातुर्गुण्येस्थिते तावन्त्यष्टाक्षराणि भवन्ति । यथा – इं, हं, इंहं इं, हं इं, हं ॥ तत्र प्रणवाक्षराणि आद्यक्षरद्वन्द्वम् यथा – अं, ऊं उदात्तस्वरेण अङ्गुष्ठस्य उत्तरपर्व स्पर्शेन, तृतीयादक्षरद्वयं यथा म, ॐ, अनुदात्तेन अङ्गुष्ठाग्रतः कनिष्ठामूलपर्वस्पर्शेण च इत्येवं क्रमेण उदात्ताऽनुदात्ताभ्याम्, उक्तविस्तरस्वराभ्यां द्वन्द्वशः प्रणवाक्षराणि अष्टौ तथा शक्तिवीजाक्षराणि अष्टौ मूलमन्त्र प्रथमपादाक्षराणि अष्टौ तदङ्ग प्रणवाक्षराणि चाष्टौ द्वन्द्वशः प्रयोक्तव्यानि । सर्वेषु स्वरेषु तिस्रः चतस्रः, पञ्चशो वा मात्राः प्रयोक्तव्याः ॥ अर्थात् प्लुतोच्चारणं भविष्यति, मूलमन्त्रस्य इतरपादगानेऽप्ययमेव क्रमः । सावित्री यजुः लक्ष्मीमन्त्री सामरहितौ इति शेष संप्रदायः । नृसिंहगायत्र्यास्तु पूर्ववत् प्रणवमाद्यक्षरत्वेन विनिवेश्य गानं कर्तव्यम् इति ॥

अथाष्टसामस्वरूपम् –

पूर्ववदष्टानां प्रणवाऽक्षराणामाद्यक्षरद्वयमुदात्तेन, तृतीयमक्षरमनुदात्तेन, चतुर्थं पञ्चममध्यमस्वरैः चतुर्भिः पूर्वपक्षयोरुत्तरोत्तर-मनुदात्तैः, प्रत्येकं पूर्वोक्तमात्राभिः युक्तैः यथाक्रममङ्गुष्ठाग्रतः तर्जन्याद्यङ्गुलि चतुष्क मध्यपर्वस्पर्शेन च प्रगाय षष्ठं अक्षरमित्यर्थः, उदात्तेन, अवशिष्टमक्षरद्वयमनुदात्तेनेति । एवं प्रणवाक्षराणि शक्तिवीजाक्षराणि च प्रगाय मूलमन्त्रप्रथमपादाक्षराणि वामाङ्गुलिभ्यां तृतीयषष्ठाक्षरग्रहणसहितं पुनः तदङ्गप्रणवाक्षराणि पूर्वोक्तैः हस्तमुखस्वरैः प्रगाय ससागरां सपर्वतां सप्तद्वीपा वसुन्धरां । तस्य हवै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिः ऋग् वेदः ब्रह्मावसवो गायत्री गार्हपत्यः । इति वाक्यद्वयं । अग्निर्वै देवा इदं सर्वं विश्वाभूतानि प्राणावै पशवोऽन्नममृतं सम्राट् स्वराट् विराडिति वाक्यं तदङ्गप्रणवशक्ति वीजानि प्रणव प्रथममात्रां च मन्त्रप्रथमपादं च सामरहितम् अर्थानुसन्धानेन पठित्वा अर्थात् जप्त्वा आनन्दात्मने हृदयाय नमः इति हृदि न्यसेत् । अथ षष्ठाक्षरग्रहणसहितं अर्थात् उं, द्वितीयपादसमागानं कृत्वा अर्थात् ज्वलन्तमित्यादिः, यक्षगन्धर्वाप्सरोगणैः सेवितं अन्तरिक्षं, (अथर्व-

शिखोपनिषत्) द्वितीयान्तरिक्षं स उकारः, स यजुर्भिर्यजुर्वेद रुद्रो रुद्रास्त्रिष्टुव् दक्षिणाग्निः इति वाक्यद्धयं, ऋग् यजुस् सामाऽथर्वरूपः सूर्य्योऽन्तराऽऽदित्येहिरण्मयः पुरुष इति वाक्यं च प्रणव हृल्लेखा श्री वीजपूर्वकं घृणिमन्त्रं च प्रणव द्धितीय मात्रां च द्धितीय पादं च मन्त्रस्य संजप्य प्रियात्मने शिरसे स्वाहा इति न्यस्येत ॥ शिरोन्यास समये श्रियं, लक्ष्मीं, श्यामलाम् औत्पलाख्याम्, अम्बिकां, गां गोसङ्गिकां षष्ठीम् इन्द्रसेनां, विद्याम्, एताभिः सप्तशक्तिभिः कनकमयैरमृतकलशैः शिरसि अभिषिच्यमानं नृसिंहं ध्यायेत् ।

वि. द्र. – नृसिंहोत्तरतापनीयोपनिषदि – द्धितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदः, विष्णुरुद्रास्त्रिष्टुव्दक्षिणाग्निः, तथा तृतीया द्यौः, स मकारः, स सामभिः सामवेदः, रूद्रादित्या जगत्या हवनीयः सा तृतीयः पादो भवति प्रणवस्य इति वर्त्तते । अस्मिन् ग्रन्थे च नृसिंहोपनिषद्वत् अस्ति । यतः श्रीनृसिंहमन्त्रव्यवहारविधिं वर्ण्णयति स्म ।

तथा तृतीयाक्षरचतुर्थाक्षरग्रहणेन यथा मँ, उँ तृतीयपादसामप्रगाय यथा "नृसिंहभीषणं भद्रं" वसुरुद्रादित्यैः सर्वै र्देवैः सेवितं पदं, प्रणवस्य तृतीया मात्रा द्यौः स मकारः स सामभिः सामवेदः रुद्रादित्या – (विष्णुरादित्या इत्यथर्वशिखोपनिषत्) जगत्या हवनीय, इति वाक्यद्धयं य ओषधीनां प्रभवति तारापतिः सोम इति वाक्यं च यजुर्लक्ष्मीः प्रणवस्य तृतीयमात्रां मं, मन्त्रस्य तृतीयपादश्च संजप्य ज्योतिरात्मने शिखायै वषडिति शिखायां न्यसेत् । तथा द्धितीयषष्ठाक्षरग्रहण सहितं चतुर्थपादं नृसिंहगायत्रीं च मिश्रणसाम च षट् स्वरैः प्रगाय ब्रह्मस्वरूपं निरञ्जनं परमव्योम्निकं 'याऽवसानेऽस्य चतुर्थ्यर्द्धमात्र सा सोमलोकः (सा लुप्तमकारः) सोङ्कारः स अथर्वणैः मन्त्रैरथर्ववेदः सम्वर्त्तकोऽग्निः मरुतो विराडेकर्षी (र्षिः) भास्वतीति वाक्यद्धयं (एकऋषी रुचिराभास्वतीस्वभा इति वा) स ब्रह्मा, स हरिः, स शिवः, सेन्द्रः,सोऽग्निः, सोऽक्षरः, परमस्वरा इति वाक्यं च नृसिंहगायत्रीं चतुर्थपादं च वीजशक्तिप्रणवान्तं चतुर्थपादार्थ स्मरणं च कृत्वा मायात्मने कवचाय हुं इति शरीरे न्यसेत् । ससागरादिवाक्यान्यमयमर्थः 'ससागर सपर्वत सप्तद्वीपां वसुन्धरां तथा पृथिवी ऋग्वेद ब्रह्मा वसवो गायत्री गार्हपत्यात्मिका प्रणव प्रथममात्रा मूलमन्त्र प्रथमपाद साम्नोऽङ्गं प्रणवं स हृदयमन्त्रस्य

देवाश्चाग्न्यादयो विराडन्ता भगवान् नृसिंहहृदयाङ्गान्तवर्त्तित्वेनोपासिताव्य इति । यक्षगन्धर्व-वसुरुद्रादिवाक्यानामनेनैवन्यायेन विभज्यार्थः समाहितमतिरववोद्धव्यः । ब्रह्मस्वरूपमिति ब्रह्मलोक उच्यते । लोकमाह च आदित्याचार्यः, सामगानं मूलमन्त्रगानं च हृदयाद्यङ्गं व्याख्यानञ्च श्रुति भाष्ययोरवगन्तव्यम् ॥

अथ महातन्त्राख्यमन्त्राङ्गं पञ्चचक्रस्वरूपं उच्यते –

अस्य चान्तर्वहिर्भावस्थितानि यथाक्रमं षडष्टं द्वादशषोडश द्वात्रिंशत् पत्राणि पञ्चचक्राणि (पञ्चपद्मानीत्यर्थः) । प्रथमचक्रस्यारसहितानि नालानि पत्राणि च ऋत्वाऽऽत्मिकानि, द्धितीय तृतीय पञ्चमचक्राणामराः वेदात्मिकाः, पत्राणि गायत्री जगत्यनुष्टुव्रूपाणि (८, १२, ३२ यथाक्रमं गायत्र्यादिछन्दसामक्षराणि) चतुर्थस्याराः पत्राणि च कलाऽऽत्मिकानि । तानि पत्राणि सर्वत्र त्रिकोणाकाराणि । अथ तस्य नाभिदेशे क्षीरोदार्ण्णव शोभितं प्रणवैकाक्षरनृसिंहवीजोल्लासितं यथा – ॐ हं इति, ध्यानश्लोकोक्तलक्षणं श्रीयुक्त परिवारं, यथा – सप्तशक्तिभिः परिसेवितं, ताभ्यामेव मन्त्राभ्यां ध्यायेत् अर्थात् लक्ष्मी नृसिंहमन्त्राभ्यां ध्यायेत् । यथाह श्रुतिः – तस्य पुरस्ताद् वसव आसते, रुद्रा दक्षिणतः, आदित्याः पश्चात्, विश्वे देवा उत्तरतः, ब्रह्मा विष्णु महेश्वरानाभ्यां सूर्य्यचन्द्रमसौ पार्श्वयोरिति ।

अथ प्रथमं षड्दलंचक्रम् –

प्रथमचक्रदलन्यस्त षडक्षरसुदर्शनमन्त्रवर्ण्णेषु ईशानदल-क्रमेण षट् सुदर्शनमूर्त्तिः, केशरेषु किरीटकेयूरपीताम्वरधृतचक्रहस्तेन मन्त्रेण ध्यात्वा तच्चक्रं शक्त्या यथा – इं, इति बेष्टयेत् । द्धितीय तृतीयचक्रदलन्यस्ताष्टाक्षरद्धादशाक्षरमन्त्रवर्ण्णेषु यथाक्रमं तन्मन्त्रद्धय-वर्ण्णमूर्त्तिः ताभ्यां मन्त्राभ्यां ध्यात्वा तच्चक्रद्धयं हृल्लेखाभ्यां वेष्टयेत् । यथा-ॐ नमो नारायणाय, ॐ नमो भगवते वासुदेवाय, सर्वाऽरक्षेत्रेषु माया संपद्यते । चतुर्थचक्रदलेषु सविन्दुकं न्यस्तषोडशस्वरवर्ण्णेषु वासुदेवादि मूर्त्तयश्चत्वारः, केशवादिद्धादशमूर्त्तयः, सविन्दुकस्वरैः वासुदेवादि षोडशदेवान् ध्यात्वा तच्चक्रं ध्यात्वा शक्त्या वेष्टयेदिति संप्रदायः । उक्तस्थानेषु यथोक्तवर्ण्णा

एव ध्यायेदिति केचित् । पञ्चमचक्रदलेषु कृतप्रणवसंपूटन्यस्तमूलमन्त्राक्षरेषु द्वात्रिंशन् नृसिंहव्यूहान् आप्रणवसंपूटितैः मूलमन्त्राक्षरैः ईशानदलारम्भे ॐ ऊं ओं नमो भगवते पदमुक्त्वा ब्रह्मणे श्रीनृसिंहाय नमः, इत्याद्यहमित्यन्तं ध्यात्वा तच्चक्रं हृल्लेखया वेष्टयेत् । एवं स्वहृदि ध्यात्वा ततः प्रणवशक्ति सामगात्वा सकलमन्त्रं पूर्ववत् षट्स्वरेणाऽभिधीय तथैव मिश्रणसामगायेत् । ततः प्रणवादिमूलमन्त्रं वीजादि प्रणवं सुदर्शनमुच्चार्य्य महाचक्रात्मने विद्युद् वर्णाय अस्त्राय फड् इति दशदिशो वध्नीयात् । एतच्च महाचक्रं उत्तराऽधरभावेन स्वहृदि ध्यायेत् । इतराङ्गचतुष्कव्यापकान्य-न्यान्यङ्गानि व्यतिषक्तानि भवन्ति । सम्बन्धान्युपास्यानि व्यतिरिक्ता वा इमे लोकास्तस्माद् व्यतिरिक्तान्यङ्गानि भवन्तीति श्रुतेः । अतः परमेश्वर-हृदयाङ्गस्य शिरोङ्गव्यतिषङ्गेण मुखदेशव्यापकत्वान्न पृथक् नेत्रमिति । एवं पञ्चाङ्गन्यासं विधाय उद्धारसाम, अक्षरसाम, पदसाम, पादसाम, क्षीरोदार्ण्णव-साम, ब्रह्माधिपतिसाम, एवं षट् सामानि गायेत् ।

* सामगानप्रक्रिया *

१. उद्धारसाम – तत्र मूलमन्त्रपादानामाद्याक्षरद्वयैराद्यं पादं द्वितीयाक्षरद्वयैः द्वितीयं, तृतीयद्वयैस्तृतीयं, चतुर्थैश्चतुर्थं, इत्येवमुद्धृत्य पादशः प्रगेयम्, एतदुद्धारसाम ।१।

२. अक्षरसाम – मूलमन्त्राक्षराणि प्रणवसंपूटितानि यावत् पदमेकैकस्वराऽनुवृत्या प्रगेयानि, इदमाक्षरसाम । यथा – ॐ उं ॐ ।

३. पदसाम – मूलमन्त्रस्य पदशोगानं पदसाम । यथा – ॐ उग्रं, ओं वीरं, ओं महाविष्णुं ।

४. पादसाम – मूलमन्त्रस्य पादशोगानं पादसाम । ॐ उग्रं वीरं महाविष्णुं ।

५. क्षीरोदार्ण्णवसाम – क्षीरोदार्ण्णवशायिनं नृकेशरिणं (नृसिंहं) योगिध्येयं परमं पदमिति अस्य मन्त्रस्याक्षराणि द्वन्द्वशः प्रगेयानि । इदं क्षीरोदार्ण्णव साम । अत्र परममिति अक्षरत्रयोपरि गानम् ।

६. ब्रह्माधिपति साम – ब्रह्माधिपतिः ब्रह्मणोऽधिपतिः इत्येतानि

अक्षराणि द्वन्द्वशः प्रगेयानि । अत्र अन्त्याक्षरम् एकस्मिन्नेव गानं, इदं ब्रह्माधिपति साम । अत्र द्वितीय तृतीययोरादौ प्रणवशक्तिवीजानि गेयानि । यथा – ॐ इं, हं, इति आदौ प्रदेयानि । यथा – ॐ इं हं ह्मां, ॐ इं हं धिं, ॐ इं हं ह्मं, ॐ इं हं णः । अन्यत्र सामरहितानि पठितानि पठितव्यानि, अर्थात् १, ४, ५, ६ स्थलेषु । अन्ते सर्वत्र मिश्रणसाम । सर्वत्रापि उदात्तानुदात्तानि इति ।

॥ श्री मन्त्रराजानुष्टुभकल्पमालायां शेषप्रणीतायां प्रथमखण्ड ॥

* अथ द्वितीयखण्डम् *

* उपासनाविधिः *

उक्तौ व्यापकपञ्चाङ्गन्यासौ, सामानि षट् क्रमात् । स पुरश्चरणोपास्ति प्रधानोच्यते । सर्वमप्युपासनं मन्त्रकल्पितम् । (लोकोऽस्य ग्रहणं कुर्वीत) असमर्थश्चेद् उपास्योपासकभावेन विभागः इत्याचार्य्यः । (लोके अहं ग्रहणं कुर्वीत, वा) तत्र प्रणवसंपूटित मूलमन्त्राक्षरादिभिश्चतुर्थ्यन्त-नामधेयैः सह नृसिंहाय नम इति पदद्वयान्तैः महाचक्रवर्त्तिनो ब्रह्मादिद्वात्रिंशन् नृसिंहाङ्गत्वात् प्रत्येकं मानसपुष्पाञ्जलिनोपासीत ।

अथ पञ्चमचक्रोपासनम् अक्षरसामनृसिंहमन्त्रस्य –

केवलं प्रणवसंपूटितगानम् अक्षर सामत्वात् । तद् यथा– ॐ उं ॐ ब्रह्मणे श्रीनृसिंहाय नमः । ---- अथर्ववेदमितादि पूजायामष्टदलपद्मस्य व्यवहारो वर्त्तते । तत्र "ऐशान्यदलान्तं मितादीन् पूजयेदिति अस्ति," अतः प्रारम्भं पूर्वदिग् दलात् भवति किन्तु अत्र ईशानदलारम्भे ॐ नमो भगवते ब्रह्मणे श्रीनृसिंहाय इति निर्देशोऽस्ति, यत्र यस्य व्यवहारः स ग्रहणीय इति मम विचारः । ----- यथावत् दर्शयामि – ॐ उं ॐ ब्रह्मणे श्रीनृसिंहाय नमः, ॐ ग्रं ॐ विष्णवे श्रीनृसिंहाय नमः, ॐ वीं ॐ महेश्वराय श्रीनृसिंहाय नमः, ॐ रं ॐ पुरुषाय श्रीनृसिंहाय नमः, ॐ मं ॐ ईश्वराय श्रीनृसिंहाय नमः, ॐ हां ॐ सरस्वत्यै श्रीनृसिंहाय नमः, ॐ विं ॐ श्रियै श्रीनृसिंहाय नमः । ॐ ष्णुं ॐ गौर्य्यै श्रीनृसिंहाय नमः, ॐ ज्वं ॐ

प्रकृत्यै श्रीनृसिंहाय नमः, ॐ लं ॐ विद्यायै श्रीनृसिंहाय नमः, ॐ न्तं ॐ ॐकाराय श्रीनृसिंहाय नमः, ॐ सं ॐ चतसृभ्योऽर्द्धमात्राभ्यः श्रीनृसिंहाय नमः, ॐ वं ॐ वेदेभ्यः साङ्गेभ्यः सशाखेभ्यः श्रीनृसिंहाय नमः, ॐ तों ॐ पञ्चाग्निभ्यः श्रीनृसिंहाय नमः, ॐ मुं ॐ सप्तव्याहृतिभ्यः श्रीनृसिंहाय नमः, ॐ खं ॐ अष्टलोकपोलेभ्यः श्रीनृसिंहाय नमः, ॐ नृं ॐ अष्टवसुभ्यः श्रीनृसिंहाय नमः, ॐ सिं ॐ एकादशरूद्रेभ्यः श्रीनृसिंहाय नमः, ॐ हं ॐ द्वादशादित्येभ्यः श्रीनृसिंहाय नमः, ॐ र्भी ॐ अष्टग्रहेभ्यः श्रीनृसिंहाय नमः, ॐ षं ॐ पञ्चमहाभूतेभ्यः श्रीनृसिंहाय नमः, ॐ णं ॐ कालाय श्रीनृसिंहाय नमः, ॐ भं ॐ मनवे श्रीनृसिंहाय नमः, ॐ द्रं ॐ मृत्यवे श्रीनृसिंहाय नमः, ॐ मृं ॐ यमाय श्रीनृसिंहाय नमः, ॐ त्युं ॐ अनन्ताय श्रीनृसिंहाय नमः, ॐ मृं ॐ प्राणाय श्रीनृसिंहाय नमः, ॐ त्युं ॐ सूर्य्याय श्रीनृसिंहाय नमः, ॐ नं ॐ सोमाय श्रीनृसिंहाय नमः, ॐ मां ॐ विराट् पुरुषाय श्रीनृसिंहाय नमः, ॐ म्यं ॐ जीवाय श्रीनृसिंहाय नमः, ॐ हं ॐ सर्वस्मै श्रीनृसिंहाय नमः ॥

॥ इति अक्षरसाम श्रीनृसिंहमन्त्रस्य ॥

अथ ब्रह्मादिनृसिंहव्यूहादीनां लक्षणानि कथ्यन्ते -

केचिद् व्यूहास्तत्तत् साधारणायुधैः तत्तद्देवता गम्याः । केचित् तु विश्वरूपाः । अनेनैव न्यायेन उभयत्र नृसिंहाकाराः, योगारूढाः, चतुर्भुजाः, अधवराकाराः, (अधरकराः, वा) विस्तराभ्याम-भयवरदाः, उपरिकरविस्तराभ्यां । केचिद् देवतानाम साधारणाऽऽयुधधारणः । आदौ त्रयो व्यूहाः उग्रं वीं श्रीकमण्डलु श्री शङ्खचक्रपिनाकत्रिशूलगम्याः, चतुर्थो व्यूहो रं द्विभुजः, पञ्चमस्तु 'म', ईश्वरायुधगम्यः, 'हा' तः लं यावत् । सरस्वत्यादयः पञ्चशक्ति व्यूहाः स्त्र्याकाराः सर्वाश्च एताः शुक्लवर्ण्णाः सर्वाभरणभूषिताः । प्रणवव्यूहस्तु 'न्तं' वक्षसि प्रणव लक्षितः । अतः परं प्रणवव्यूहाः, पञ्चमहाभूतान्ताः, अर्थात् सं इत्यारभ्य षं यावत् दश ॥ तत्तद् देवता विग्रहैश्च मूर्त्तिष्वन्तर्भूतैरवगम्याः । अतएव विश्वरूपाः स्वयं चमत्कार मूर्त्तयः । ततः कालादयो दश अर्थात् णं इत्यारभ्य म्यं यावत् दश, नृसिंहात् स्व विश्वरूपोद्भव साधारणरूपगम्याः । अन्यः व्यूहः अर्थात् हं इति,

विश्वरूपः, चेतनाऽचेतनसर्वात्मकरूपगम्यः इति । पञ्चमचक्रनिर्माणपद्धतिः ।

पदसाम - अथ नव व्यूहान् प्रणवशक्तिवीजपूर्वकैर्मूलमन्त्रस्य नवपदैस्तथा सर्वनमस्कार्य्य मात्मनमिति पदाभ्यां स च नृसिंहं नमामि पर्य्यन्तं अनुषज्योपासीत । एषा पदोपास्ति । पदे नमामि, इत्यनेनाऽ-नुगङ्गात् । यथा - ॐ इं हं उग्रं ॐ, नमाम्यहम् ॥

पादसाम - प्रणवशक्तिवीजादियुतैः मूलमन्त्रपादैश्चतुर्भिः नृसिंहं नमामि, इत्यनुषज्य उपासीत । एषा पादोपास्ति । यथा - ॐ इं हं उग्रं वीरं महाविष्णुं ॐ नृसिंहं नमामि इति ॥ तथा प्रणवादि पूटितेन मूलमन्त्रेण उपासीत एषा मूलमन्त्रोपास्ति । यथा - ॐ इं हं ततः पूर्ण्णमन्त्रः, ततः पुनः ॐ इं हं । एवं उपास्ति (उपासना) त्रयं समाप्य अविलम्वित नृसिंहसाक्षात्कारिणां श्रौतस्तुतिम् ईशान दलक्रमेण विदधीत । यतः ऐशान्यकोणदलाद् आरम्भः । अत्रायं स्तुतिमन्त्रोपसंग्रहः ।

स्तुतिमन्त्राः - प्रथमं प्रणवसंपूटितस्य एकैकाक्षरं पुनः प्रणवपूर्वकं "यो वै नृसिंहो देवो भगवान्" इति पदपञ्चकं विशेष्यानुगुणवचनं विभक्तिमुक्तो यश्च पूर्वोक्तनाम ध्येयं "तस्मै वै नमो नमः" इति पदचतुष्कं इत्यनेन क्रमेण प्रतिव्यूहमन्त्रेषु चत्रसोऽर्द्धमात्रा व्यूहचतुष्कं मन्त्रेषु पञ्चमहाभूत व्यूहमन्त्रेषु च मध्ये यच्छब्दानन्तरं मध्ये चकारो न पठितव्यः । यथा - ॐ उं ॐ ॐ यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः । एवं यथाक्रमं 'ग्रं' इत्यादि अक्षरसंयोगं कृत्वा "यश्च विष्णुः, यश्च महेश्वरः, यश्चपुरुषः, यश्चेश्वरः, ततः या सरस्वती, या श्रीः, या गौरी, या प्रकृतिः, या विद्या, ततः यश्चोङ्कारः, याश्चतस्रोऽर्द्धमात्राः, ये च वेदाः साङ्गाः ससाखाः, ये पञ्चाग्नयः, याः सप्तव्याहृतयः, ये चाष्टौ लोकपालाः,ये चाष्टौ वसवः, ये च रुद्राः, ये चादित्याः, ये चाष्टौ ग्रहाः, यानि पञ्चमहाभूतानि, यश्च कालः, यश्च मनुः, यश्च मृत्युः, यश्च यमः, यश्चाऽन्तकः, यश्च प्राणः, यश्च सूर्यः, यश्च सोमः, यश्च विराट् पुरुषः, यश्च जीवः, ततः शेषे ॐ हं ॐ यो वै नृसिंहो देवो भगवान् यश्च (यच्च वा) सर्वं तस्मै वै नमो नमः । इत्येषा पुरश्चरणोपासना । अस्याश्च महात्म्यं भगवन्नृसिंहैको वेद्यम्, महाविष्णुर्भवतीति श्रुतेः । नृसिंह

पूर्वतापनीयोपनिषदि च सर्वं वर्त्तते । अथ प्रधानोपास्तिः - तत्र प्रथमं नृसिंहव्यूहं पूर्वोक्तपदपादमूलमन्त्रैः उपास्य स्वहृदये ब्रह्माण्डादति विपुलम् अत्युज्ज्वलं विविध नानावितानसंपर्ण्णं तेजोमयं लोकं प्रकल्प्य तन्मध्ये ध्यानश्लोकोक्तलक्षणमूलनृसिंहव्यूहं ब्रह्मादिनृसिंहव्यूहाश्च मनसानिर्मितै-रावाहनादिभिरुपचारैरुपासीत । अत्रैकमुपचारं मूलमूर्तौ प्रकल्प्य तदनन्तरमेव तन्त्रमुपचारमितरमूर्त्तिनामुपकल्पयेत् । तत्र प्रणवादि संपूटितं मूलमन्त्रं क्षीरोदार्ण्णवशायिने श्रीनृसिंहाय त्रिनेत्राय पिनाकहस्ताय इति पदचतुष्टयं चतुर्थ्यन्तानि मूलमन्त्रपदानि सर्वनमस्कृत्यात्मने नमः इति पदद्वयं स्वनुषज्याऽमुकं कल्पयामि इति मूलमूर्त्तेरुपचारः कर्त्तव्यः । पूर्ववत् कृतसंपूटितं मूलमन्त्रपूर्वकं ब्रह्मादिद्वात्रिंशात्मक श्रीनृसिंहाय नमः, इति पदद्वयं उग्राय इत्यादि पूर्ववत् प्रजप्य ब्रह्मादिनृसिंहव्यूहानामुपचाराः प्रकृतरूपाः कल्पनीया इति । तत्र स्फुरदमलमाणिक्यगणशोभितं विपुलमासनं मूलनृसिंहस्याऽन्येषां प्रकल्प्य तत्र आवाह्य प्रणवेनाऽऽसननिवेदनं स्वागतोपचारं कृत्वा समसमयमुदितशरच्चारुचन्द्रकोटिसमच्छविं सर्वालंकारसंपर्ण्णं सर्वाङ्गसुन्दरं प्रभुं पूर्वोक्तलक्षणमूलनृसिंहं तस्य वामाङ्गसंश्रितां देवाऽनुरूपवेशविभवां देवीं तथा ब्रह्मादिनृसिंहव्यूहांश्च प्रत्येकम् अनेकचन्द्रकोटि सहस्रतेजसो विविधाऽऽभरण समुज्ज्वलाऽऽसनेषु अभिचिन्त्य विहितद्रव्यैरर्घ्यं पाद्याऽऽच मनीयानि दत्त्वा विहितद्रव्याणि यथा - दूर्वाश्यामाकजातिपुष्पाणि अर्घ्यपात्रे, लवङ्गजातिकक्कोल पदानि पाद्यपात्रे, कर्पूर श्रीचन्दन कस्तुरीकृष्णागुरूशीरकुङ्कुमानि आचमनीयपात्रे सिद्धार्थाऽक्षतकुसुमानि सर्वपात्रेषु निक्षिप्याऽनन्तं मूलनृसिंहस्य स्वात्मवद् देवं विष्टरस्नानं षड्क्षरमिश्रणेन पञ्चाङ्गन्यासं पूर्वोक्तमर्थानुसन्धानेन देव ! स्नानमण्डपम् एहि, नमः, इति मनसा संप्रार्थ्य छत्रचामरादि परिच्छदैः शङ्खतूर्य्यादिनिर्घोषैः, जयावलोकनादिशब्दैः सुसम्भाव्यमानो भगवान् उज्ज्वलालङ्कारशोभित स्नानमण्डपविद्यमान पादुकाभ्यां समागम्य वराऽऽसने उपविष्ट इति स्मृत्वा दिव्याभ्यङ्गमर्द्दनं दिव्योद्वर्त्तिम् उष्णोदकस्नानं, पञ्चामृताभिषेकस्नानं, च प्रत्येकं जलधूपदीपदानसहितं सुखोष्णोदकस्नानं, च इति प्रणवेन उभयत्राऽपि प्रकल्प्य पूर्वोक्ताः सप्तशक्तयः देवं मणिगणसहितैः

कनकमयैरमृतकलसैरभिसिञ्चन्तीति ध्यात्वा स्वयमपि घृणिमन्त्रेण प्रणवशक्तिवीजसहितैः सुसंपूटितैः मूलमन्त्रैः एकादशकृत्वः मूलमूर्त्तिमभिषिच्य तांश्च स्वस्वमन्त्रेणाऽभिषिच्य प्रणवेनाऽङ्गजलं वाससा सम्मार्ज्य प्रणवेन एकं वासः प्रदाय आर्द्रं स्नानवस्त्रं विष्वग्जलेन गृहीतं ध्यात्वा मणिपादुकाभ्यां देवस्य चतुर्मुखाद्यैर्दत्तहस्तोऽलंकारमण्डपमागत्याऽऽसनोपविष्ट इति ध्यात्वा दिव्यैरत्युज्ज्वलैर्वासोभिरलंकृत्य प्रणवेनोपवीतं मधुपर्कं आचमनीयं च दत्त्वा पूर्वोक्तोपचारैः गरुडाऽऽरूढो देवो देवमण्डपमागत्य दिव्यसिंहासनोपविष्ट इति संचिन्त्य दिव्यगन्धैश्चानुलिप्य दिव्यमालादिभिः कुसुमैश्चालंकृत्य धूपं दीपं च दत्त्वा चतुर्विधैरमृतमयैः वराऽऽहारैः अतिवहुलैरवकाशम् आपूज्य नैवेद्यमापूर्य्य उक्तमन्त्राभ्यामुभयत्राऽपि द्विराचमनपूर्वकं प्रकल्प्य ॐ अहमस्मि प्रथमजा इत्यादि मन्त्रं यथाप्रसिद्धसामोपेतं प्रजप्य, अयं मन्त्रः पैप्पलादसंहितायाः सप्तदशकाण्डषष्ठसूक्ते प्रायशः वर्त्तते । प्रथमजास्थले सहमानः वर्त्तते । अस्य सूक्तस्य ऋषिः अथर्वा, देवता भूमिः, छन्दः अनुष्टुव् गर्भा पराति जगती ।

ॐ अहमस्मि सहमान उत्तरोनाम भूम्याम् ।
अभीषाड् अस्मि विश्वषाड् आशामाशां विषासहिः ।२।

इत्यादिमन्त्रान् प्रथमं पायसाद्याहारान्, ततो भक्ष्यभोज्यादिकं ततो दधिलेह्य स्वादूपेतं शर्कराखण्डमण्डितदिव्यक्षीरांश्च प्राङ्गुलमात्रेण त्रिबारजप्तेन निवेद्य तदाऽऽस्वादूत्पन्नम् एव च देवस्य इति स्मृत्वा ततो द्विव्योपानीयं हस्तमुखप्रक्ष्यालनजलं साऽऽच मनमुख वासगन्धं च प्रणवेन दत्त्वा तेनैव कर्पूर ताम्बुलछत्रचामरव्यजनदर्पणनृत्यगीतवाद्यादिकान् राजोचितपचारान् च कृत्वा निम्नोक्तमन्त्राभ्यां पुष्पाञ्जलिं प्रकीर्य्य ताभ्यांमेव प्रदक्षिणनमस्कारो कृत्वा सकृदाऽऽनुष्टुभसञ्ज्ञद्विस्वरसाम पूर्ववत् षट् स्वरसाम च ससागरामित्यादिवाक्यवर्जं च प्रगायमूलमन्त्रं वा किंचित् कालं जपपूर्वकं प्रणवं वा यथाशक्ति प्रजप्य सर्वमात्मीयमात्मानञ्च देवाय समर्प्य अयं सर्वकारण महाविष्णुरूपेण सच्चिदानन्दरूपेण वा किञ्चित् कालमास्थाय उद्वासन मूर्त्तिमन्त्राभ्याम् (मन्त्रस्वरूपं किम्) उभयत्राऽपि कृत्वा प्राणायामत्रयं मूलमन्त्रेण पञ्चाङ्गन्यासं च कुर्य्यात् । इत्थं वहिरर्च्चनमपि भवेत् ।

पूर्वोक्तमन्त्राभ्यां यथाशक्ति होमं कुर्य्यात् ।

भूतभाविभवत् सर्वं मत्सम्बन्धमिमञ्च माम् ।
भगवन् ! प्रतिगृह्णातु पादयोरर्पितं तव ॥
मन्त्रिणां घनतामेवं मन्त्रयागेन धीमताम् ।
पुरश्चरणकृत्येन विनाऽपि फलदो मनुः ॥

॥ इति मन्त्रराजानुष्टुभकल्पमालायां शेष प्रणीतायां द्वितीयखण्डम् ॥

* ध्यानशतके अथ महाचक्र कल्पनम् *

महाचक्रस्य सञ्ज्ञाभिमण्डले त्रिगुणात्मनि ।
सुखसम्वित् क्षीरजलं चिन्तयेत् क्षीरसागरम् ।१।
श्वेतद्वीपं च तन्मध्ये शब्दादिविषयात्मकम् ।
जातिब्रह्मासनोपेतं सरत्नसिकताङ्कितम् ।२।
मणिरत्नमये तत्र प्रासादे सुमनोहरे ।
श्वेतसिंहासनं ध्यायेत् श्वेतपद्मे भरत्सदम् ।३।
शेषं तत्र विजानीयात् सप्तयाप्युत्समण्डलैः ।
तासां सहस्रमुपरि छत्रकृत्वा व्यवस्थिम् ।४।
श्वेतहारकिरिटीभ्यां दधानं मूषलं हलम् ।
रक्तानां श्वेतपुष्पस्रक् पीतवस्त्रैककुण्डलम् ।५।
तदङ्के चित्रयेद् देवं नृसिंहं पीतवाससम् ।
सूर्य्येन्दु कोटीसहस्रमरुणोत्तरवाससम् ।६।
श्वेताद्रिकान्तिवपुषं सत्यज्ञानसुखासनम् ।
आसीनं योगपट्टेन चतुर्द्रंष्ट्रं चतुर्भुजम् ।७।
प्रदक्षिणेन दधतमूद्ध्र्व दक्षिणपूर्वके ।
उग्रं पिनाकमभयं वरं करचतुष्टये ।८।
तप्तहाटककेशान्तं चन्द्रार्ककृतशेखरम् ।
सुकपोलं सुविस्तृतं ललाटफलकोज्ज्वलम् ।९।
चन्द्रसूर्य्याग्निसंकाशं वृत्तोत्फुल्लत्रिलोचनम् ।
स्फुरत्कमलकिंजल्क समलोमात्तकान्तिकम् ।१०।

किंचिदुन्नतमध्ये सोतफुल्लनासामनोहरम् ।
ललज्जिह्वप्रपञ्चास्य प्रकाशितरदावलिम् ।११।
श्मश्रुलम्वितसृक्वाणं किंचिदुत्कुञ्चितभ्रुवम् ।
स्तव्धभ्रूलक्ष्मपक्ष्मतां तीर्य्यगालम्वीकेशरम् ।१२।
ककुद सशिरः कण्ठप्रकुञ्चितकरद्वयम् ।
नीलग्रीवं प्रकृत्यात्मश्रीवत्साङ्कितवक्षसम् ।१३।
विस्तीर्णोरः स्थलं तत्र पुरुषात्मककौस्तुभम् ।
विष्टद् द्विपार्श्वपृष्ठस्थमग्ननाभ्यङ्कितोदरम् ।१४।
तीर्य्यक् च सुस्थिरं घोरं जान्वाहितकरद्वयम् ।
तीक्ष्णोग्रनखवज्रालिरोचिर्विद्राविताऽसुरम् ।१५।
तीर्य्यक्पादतलस्पर्शी कृताङ्गकृतशेषकम् ।
किरीटहारकेयूरकाञ्चिकटकभूषितम् ।१६।
आमुक्तजंघाभरणं पादान्तव्याप्तनूपुरम् ।
रत्नाङ्गुलियकज्योतिराभासितदिगन्तरम् ।१७।
समकर्णान्तविन्यस्त चारुकर्णविभूषितम् ।
पञ्चभूतात्मिकां पञ्चरूपां मालां च विभ्रतम् ।१८।
वामोरुस्थितया लक्ष्म्या श्लिष्टदक्षिणवाहुजा ।
दधत्या वामहस्तेन दाडिमं सुमनोहरम् ।१९।
मुञ्जप्रायाभरणया पीतनिर्मलवस्त्रया ।
हिरण्यवर्ण्णया न्यस्तहशास्वामिमुखाम्वुजे ।२०।
नानारूपधरैः शस्त्रैः पृष्ठपार्श्वगतैः पृथक् ।
स्वस्वयथोदितकरैस्तदन्तः समुपासितम् ।२१।
स चामरैर्व्यज्यमानं लक्ष्म्यादिभिश्च शक्तिभिः ।
संसक्त्याभ्यनुरक्ताभिरन्याभिः परिवारितम् ।२२।
यक्षपन्नगगन्धर्वविद्याधरवसुगणैः ।
नृत्यवादित्रसङ्गीतस्तुतिभिः काङ्क्षितेक्षणाम् ।२३।
सुराऽसुरगणैश्चैव प्रसादादाप्तदर्शनैः ।
कृताञ्जलिभिराज्ञार्थं किङ्करैः दूरतस्थितैः ।२४।

अन्तरिक्षगणैः सिद्धैः योगिभिः सनकादिभिः ।
संस्तूयमानमेकाग्रैः ऋग्यजुः साममन्त्रकैः ।२५।
ऐशानीदिशमारभ्य महाचक्रदलस्थितैः ।
पद्मासनैरभिमुखैः वीक्षमाणं सुदर्शनैः ।२६।
नारायणैः वासुदेवैः केशवाद्यैः यथाक्रमम् ।
ब्रह्माद्यैः नरसिंहस्य स्वसम्बन्धाऽऽयुधान्वितैः ।२७।
पुरस्ताद् वसुभिस्तस्य रुद्रैः दक्षिणतः स्थितैः ।
चक्रस्य पश्चादादित्यैः विश्वेदेवैस्थाऽपृथक् ।२८।
उपोपविष्टैः पादान्ते ब्रह्माविष्णुमहेश्वरैः ।
स्वस्वायुधकरैरूद्ध्वं कृताञ्जलिपुटैरधः ।२९।
तथैवोपस्थितं सूर्य्यचन्द्राभ्यां पार्श्वयोः द्वयोः ।
महाविभूतिसंस्थानं सर्वेदेवात्मकं प्रभुम् ।३०।

॥ इति प्रथमखण्डः ॥

* अथ शेषकृतध्यानशतकस्य द्वितीयखण्डम् *

ब्रह्मज्ञेयं शिरस्तस्य पितर, ऋषयः सटाः ।
रुद्रो ललाटं, विद्युद् भ्रूरश्विनौ नासिके स्मृतौ ।१।
श्रोत्रे दिशोथगण्डद्यौर्नारदस्तुम्वुरुस्तथा ।
मुखमग्नीरदास्तस्य द्रंष्टास्ताः कालरात्रयः ।२।
द्यावा पृथिव्यावोष्ठौद्धौ, रसनातु सरस्वती ।
वेदा वाचस्पतिः कण्ठः, स्कन्धौ गुहविनायकौ ।३।
स्तनौ वृहस्पतिः शुक्रः, सेन्द्रा देवास्तु वाहवः ।
सर्पा अङ्गुलयोज्ञेयाः, शस्त्रास्त्राणि तथा नखाः ।४।
लक्ष्मीर्वक्षस्थलं तस्य, प्राणो नारायणात्मकः ।
वर्माऽऽत्मानौ शर्मवस्त्री नाभिः चषकमुच्यते ।५।
जगच्चजठरं, भानुः चन्द्रः पार्श्वेऽवदच्छुतिः ।
पृष्ठोऽन्तर्मरुतो देवा, लिङ्गं तस्य प्रजापतिः ।६।
उरुद्धौ वसवः प्रोक्तौ, जंघे च चरणौतु भूः ।

सुनाशिरः सुरा रोमाः, नद्यः धमनयः स्मृताः ।७।
अस्थीनि पर्वतास्तस्य, हिरण्यं रेत उच्यते ।
क्रोधो हरः समाख्यातो, ज्योतिर्भैरवरूपधृक् ।८।
शङ्खचक्रगदाशार्ङ्गैः चक्रं लोहितमुच्यते ।
शङ्खचक्रगदाशार्ङ्गैः शङ्खं शङ्खनिभं स्मृतम् ।९।
शशाङ्कचक्राऽव्जगदा युतः, नीलाम्वुदप्रभः ।
वीणाविभाविनावाणशङ्खशार्ङ्गं द्विधा स्थितम् ।१०।
भूतादीनीन्द्रियादिश्च मनश्चक्रं विदुर्वुधाः ।
शरास्त्राणीन्द्रियाण्याहुर्वुद्धिकर्मात्मिकानि वै ।११।
विद्याखड्गं तथैवाऽऽहुरविद्या चर्मसंश्रयम् ।
शूलं हलं च मूषलं धवलं त्रितयं स्मृतम् ।१२।
पद्मं च प्रथमं कृत्वा शङ्खचक्रगदाधरम् ।
चतुर्भुजेषु चक्राद्याः स्वचक्रवसनायुधाः ।१३।
चक्रादिचिह्नमुकुटी खड्गोऽङ्के योऽरुणाऽम्वरः ।

आद्य चतुर्थचक्रे ऋतुपुरुषाख्यैरगैः शदलैः खदलैः सदलैः इमिति, तत्राऽप्यन्तर्मायया वहिर्वेष्टितं नेमि, वेदाः ॐ गायत्र्यनुष्टुव् दलं च शेषं चक्रत्रितयं तत्र हीमिति सुचिह्नावहिर्मायया, स्फुरदट्टहासविकटोग्रदंष्ट्रान् दीप्तान् नारौद्रान् पिङ्गोद्ध्वभीमकेशान् भीमाक्षानृवरविप्रक्षान्, चक्रं दरं सरोजं, खड्गाङ्कुशपाशमूषलगदाः, सह सर्वैराभरणैः अमलैः दधतः सुदर्शनान्वन्वे । अमिता न सितासुपीतक्षितिलक्ष्मीभिरापरिष्वजान् । चक्राम्वुजवरहस्तान्, निखिलविभूषणभूषितवपुषः सितसरोजगतान् ।

शङ्खचक्रगदाखड्गैः केशवं कनकप्रभम् ।
क्षीराम्भोज गदाचक्रवरैर्नारायणं स्मृतम् ॥
माधवं शङ्खचक्राव्जगदाहस्तं जवानिभम् ।
मनः शिलाऽऽभोगविद्यःगदाभाग्गोदरादिभिः ॥
स पद्म शङ्खारि पुदो विष्णुश्च कनक प्रभः ।
शङ्खचक्रगदापद्मैरर्जुनो मधुसूदनः ॥

सगदाशङ्खचक्राब्जनीलाम्बुभः त्रिविक्रमः ।
रक्तश्चक्रगदापद्मशङ्खैः शमन उच्यते ॥
चक्रदरिगदासाब्जः श्रीधरः कुमुदप्रभः ।
काश्मिराभो हृषीकेशः सचक्राब्जदरो गदा ॥
पद्मचक्रगदाशङ्खैःपद्मनाभोऽञ्जनाद्युतिः ।
दामोदरः शङ्खगदाचक्राब्जैः क्षीरसन्निभः ॥
स्फटिकाभो वासुदेवः शङ्खार्य्यब्जगदाधरः ।
शङ्कर्षणो गदाब्जारिः गदाभः कनकप्रभः ॥
शङ्खगदासाब्जचक्रैः प्रद्युम्नो वज्रसन्निभः ।
गदाशङ्ख साब्जचक्रैस्त्वनिरुद्धोऽशितप्रभः ॥
ब्रह्माद्या नरसिंहास्तु स्व स्व लक्षणलक्षिताः ।
नृसिंहाकारवदनाः सर्व एव त्रिलोचनाः ॥
दधाति सृक्स्रुवौ ब्रह्मा विष्णुश्चक्राङ्कुशौ तथा ।
महेश्वरः शूलचापौ पुरुषश्चक्र शङ्खधृक् ॥
दधात्यत्रेश्वरः शूलं डम्वरुं च यथाक्रमम् ।
लेखनं पुस्तकं चेति दधाति द्वे सरस्वती ॥
पद्मद्वयं दधाति श्रीः गौरी नीलोत्पलद्वयम् ।
प्रकृतिश्च तथा विद्या पाशाऽङ्कुशधरे उभे ॥
अभीति वरदाः सर्वे धवलास्ते चतुर्भुजाः ।
पुरुषसन्निभं केचित् प्रवदन्ति नरायुधम् ॥
एकादशोत्तरे विष्वग् रूपधृग् चक्रशङ्खिनः ।
ॐ कारः किं तव क्षात्र (स्तु /म्भ) पात ॐकार उच्यते ॥
ॐकारानन्तरं मात्राश्चतस्रस्तस्य संश्रिताः ।
वेदाः साङ्गाः स शाखाश्च विज्ञेयास्तदनन्तरम् ॥
पश्चाञ्जयस्तथा ज्ञेयाः सप्तव्याहृतयस्तथा ।
लोकपालास्ततश्चाष्टौ वसवोऽष्टौ ततः परम् ॥
अष्टौ ग्रहास्ततः परं महाभूतानि पञ्च च ।
कालपाशाङ्कुशाः काल संख्या मनुस्थिताः ततः ॥

धूम्रपाशाङ्कुशा मृत्युः पाशास्तथा यमान्तकौ ।
तौ पाशमुद्गरधरौ प्राणश्चक्रविभासितः ॥
रक्ताब्जद्वय वाऽत्र त्रिः सूर्य्यः सोमस्तु पाण्डरः ।
द्वधात्यमृत संपूर्णं कुण्डं दण्डं च शोभनम् ॥
स विराट् पुरुषो जीवः क्वचित् शुक्लवरायुधः ।
सर्वैर्वर्ण्णायुधैः सर्वं चेतनाऽचेतनामयैः ॥
ब्रह्मादिशक्तयश्चात्र सरस्वत्यादयः स्मृताः ।
अर्द्धमात्रास्मृताऽत्रस्था ॐकारस्यैव शक्तयः ॥
वसवो हरितः सर्वे तेज्ञयाः खड्गचर्मिताः ।
शूलखट्वाङ्गिनो रुद्राः शुक्ला भस्मकपर्द्दिनः ॥
आदित्या लोहिताः सर्वे रक्ताब्जद्वयधारिणः ।
विश्वेदेवाः सुविशदाः सर्वे वाणधनुर्द्धराः ॥
ब्रह्मारक्तसुवर्ण्णाभो विष्णुः स्यादस्य सन्निधौ ।
सर्वे चतुर्भुजास्तत्र केषाञ्चित् द्विभुजः सदा ॥
सकलावरणातीतं निरालम्बविभावनम् ।
नृसिंहं भावयन्त्येते तन्मयाः तद्विभूतयः ॥
मन्त्रमूर्त्तिधरस्याऽस्य साङ्गपादाः श्रुतीरिताः ।
हृच्छिरसोः शृणिखाट्टे कवचं च यथाक्रमम् ॥
समस्तं च तथा मन्त्र अलं मन्त्रविवर्जितम् ।
अस्त्राणि देवदेवस्य पूर्वोक्तानि प्रचक्षते ॥
प्रणवस्य तु या मात्रा स्ताभिस्तेषु हृदादिषु ।
भूर्भुवः स्वः त्रयोलोका ब्रह्मलोकश्च संस्थिताः ॥
अग्न्यादयस्तथा सूर्य्यः सोमो ब्रह्मादयः सुराः ।
चतुर्षुमन्त्रपादेषु समात्रासु व्यवस्थिताः ॥
ऋग्यजुः सामाथर्वणः साङ्गशाखासमन्विताः ।
मन्त्रस्य पादाश्चत्वारः इत्याहाथर्वणिश्रुतिः ॥

॥ इति द्वितीयखण्डम् ॥

* अथ श्रीनृसिंहमन्त्रार्थः *

* तृतीयखण्डम् *

उग्रं घतीहभूतानि सर्वाण्युद्वाह्यतेऽपि च ।
सर्गैर्विसर्गैर्वा यश्च तमुग्रं च नमाम्यहम् ।१।
विरामयति भूतानि सर्वविरमयत्यपि ।
सर्गैर्विसर्गैर्वा यश्च तं वीरं च नमाम्यहम् ।२।
स्व महिम्ना यश्च सर्वं व्याप्नोति व्याप्यते तु यः ।
व्यतिषक्तो महादेवो महाविष्णुं नमाम्यहम् ।३।
ज्वलन् य स्तेजसा स्वेन ज्वलयत्यत्यलं जगत् ।
अशेषमूर्त्तिः ज्ञानात्मा ज्वलन्तं तं नमाम्यहम् ।४।
सर्वतोऽक्षिश्रुतिघ्राणं सर्वतः पाणिपादकम् ।
सर्वेन्द्रियैरसम्बन्धं प्रपद्ये सर्वतो मुखम् ।५।
जगद्धितं प्रसह्नोऽहं, अजितं वीरवत्तमम् ।
नृवच्चर्क्षि (नृचक्षषं) हवच्चैव नृसिंहं परमेश्वरम् ।६।
यस्याऽभीतस्य देवाद्याः सर्वे भीत्याऽतिभीषणम् ।
रूपं हृष्ट्वा पलायन्ते भीषणं तं नमाम्यहम् ।७।
भद्रं ददाति भक्तेभ्यो यः सदा भद्ररूपधृक् ।
भद्राऽऽचारस्य गोप्तारं भद्रं तं प्रणमाम्यहम् ।८।
स्मृते एव हि भक्तानां यो हिंस्रान् मारयत्यपि ।
मृत्युश्चैवाऽपमृत्युश्च मृत्युमृत्युं नमाम्यहम् ।९।
भक्ता नमन्ति यं सर्वे देवाश्च ब्रह्मवादिनः ।
भुक्तिमुक्तिप्रदं सर्वं नमस्कार्य्यं नमामि तम् ।१०।
यस्यान्नं सर्वमेवेष्टं योऽन्नं सर्वशरीरिणाम् ।
सर्वभूतेषु चात्मानं सवाऽऽत्मानं नमामि तम् ।११।

अयमर्थः - वृहन्नृसिंहो पनिषदादिष्वपि वर्त्तते ।

क्षीरोदार्ण्णवमध्यस्थं योगिध्येयं परं पदम् ।

अमितज्योतिरासीनं प्रपद्येऽहं पिनाकिनम् ।१२।
ऋतं सत्यपरंब्रह्म फुल्लसंरोचिरेतसम् ।
प्रपद्येऽहं विरूपाक्षं शङ्करं नीललोहितम् ।१३।
ईशानं सर्वविद्यानां नरकेशरिविग्रहम् ।
ईश्वरं सर्वभूतानां प्रपद्येकृष्णपिङ्गलम् ।१४।
स्मृते सकलकल्याणं भाजनं यत्र जयते ।
पुरुषोत्तमजं नित्यं ब्रजामि शरणं हरिम् ।१५।
यन्नामकीर्त्तनं पुंसां सद्योयान्त्यतिपातकाः ।
करोति चाक्षयं पुण्यं तं प्रपद्ये श्रियः पतिम् ।१६।
यस्याऽवताररूपाणि समचिन्त्य दिवौकसः ।
आत्मानं तं परंरूपं तं वन्दे पुरुषोत्ततम् ।१७।
यस्य पादोदके स्नान्ति यस्योच्छिष्टानि भुञ्चते ।
नित्यं भगवता नित्यं पठतः शृण्वतोऽपि वा ।१८।
पुनर्भवभयं नास्ति परलोके भयं कुतः ।
सर्वैश्वर्य्यं ददातीह सन्तुष्टः परमेश्वरः ।१९।
देहान्ते तारकं ब्रह्म ह्याचष्टे कर्ण्णमूलके ।
सदैवानाप्तकामोऽयं कथं सन्तोष्यतां प्रभुः ।२०।
मामन्वध्वमिति प्राज्ञा भक्तिग्राह्या हि देवता ।
तुलसीदलपत्रेण जलस्य चलुकेन तु ।२१।
विक्रीणित्येयमात्मानं भक्तेभ्यो भक्तवत्सलः ।
भवपाशं च्छिन्नत्त्येषः प्रददात्यात्मनः पदम् ।२२।
मनसाऽर्च्चतमात्रेण भक्तिक्रीतो जनार्द्दनः ।
स्वधर्मपालनं सर्वमन्त्रोऽहं सर्वपातु सः ।२३।
द्वे भक्ती परमेशस्य मूलमन्त्रः सकारणम् ।
ज्ञानयोगसहस्राद्धि भक्तियोगः विशिष्यते ।२४।
इति संचिन्त्य संचिन्त्य भक्तिरग्रे कृता वुधैः ।
सम्वत्सरोऽपि तेदेयमिदं ध्यानं सुधार्मिके ।२५।
न चाऽभक्ते न चाऽशान्ते न चाऽश्रद्धे न चाऽनृतौ ।

अस्थाने विनियुक्तो हि मन्त्रऽकृत्य स्तथैव च ।२६।
तत्र निर्वीजतां प्राप्य विनिघ्नन्ति प्रयोजकम् ।
यस्य देवपरा भक्तिः यथा देवे यथा गुरौ ।२७।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।

॥ इति चतुर्थखण्डम् ॥

* अथ सामान्य विशेषाभ्यां पूजाक्रमणी लिख्यते *

अथ नृसिंहस्य सामान्यपूजाविधिः विशेषपूजाविधिश्च -

ब्राह्ममुहूर्त्ते शय्याया उत्थाय प्रातः स्मरणीयादीन् स्मृत्वा पूर्वोक्तप्रकारेण नृसिंहप्रार्थनां विधाय गङ्गादितीर्थे वा नद्यां वा जलाशयेऽकृत्रिमे, यथा विधि स्नात्वा नृसिंहप्रीतये स्नानसङ्कल्पं कृत्वा मन्त्रराजस्य ऋष्यादि स्मृत्वा जले महाचक्रादि नृसिंहं पीठं परिकल्प्य तत्र देवमावाह्य तन्त्रमन्त्रपदैरेकादशभिः नृसिंहमन्त्रेण चतुर्भिः पादैश्च समग्रेण च षोडशमज्जनानि (स्नानानि) कृत्वा तत् तीरमागत्य पादोदकं पीत्वा शिरसि गृहीत्वा सिताम्वरपरिधानं कृत्वा ऊद्ध्वर्पुण्ड्रादि कृत्वा सन्ध्यादि समाप्य अथ नृसिंहसन्ध्यां कुर्य्यात् । सा च एवम्, नृसिंह ! तव प्रीतये सन्ध्यां उपास्ये, इति सङ्कल्पं कुर्य्यात् । सूर्य्यमण्डले नृसिंहं ध्यात्वा द्वात्रिंशद्बारं नृसिंहगायत्रीं जपेत्, ततः पूजागृहमागत्य कृताचमनः व्याघ्रादिचर्मासने पद्मासनं कृत्वा प्रणवस्य ऋष्यादिन्यासं कृत्वा ॐ शरीरस्थ अन्तर्य्यामी ऋषिः प्रकृतिछन्दः, सत्यो देवता चतुवर्गसाधने विनियोगः, इति कृत्वा ॐ पृथिव्या मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः, इति च कृत्वा ॐ पृथ्वि ! त्वया धृता लोका देवि ! त्वं विष्णुना धृता । त्वं च धारय मां देवि ! पवित्रमासनं कुरु, इति संप्रार्थ्य पूर्वोक्ताऽऽसनमन्त्रेणाऽऽसने कुशपुष्पादि दत्वा ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्त्तारः ते नश्यन्तु शिवाज्ञया, अथवा ते नश्यन्त्वाज्ञया हरेः, इति विघ्नात् प्रोत्सारयेत् । तदर्थं सर्षपजलादि दत्वा वामाङ्गं सङ्कोच्य अस्त्राय फट् इति तालत्रयेण भौमदिव्यान्तरिक्षविघ्नान् उत्सारयेत् । ततः ॐ रम् इति

वीजेनाऽग्नि प्रकारत्रयं विचिन्त्य भव्यविष्णुस्मरणं कृत्वा मानसस्नामाचरेत् । तद् यथा -

खण्डितं पुण्डरीकाक्षं मन्त्रमूर्त्तिं प्रभुं स्मरेत् ।
अनन्तादित्यसंकाशं वासुदेवं चतुर्भुजम् ॥
सशङ्खारि गदापद्ममुकुटं वनमास्थितम् ।
तत् पादोदकजां धारां निपतन्तीं स्वमूर्द्धनि ॥
चिन्तयेद् ब्रह्मरन्ध्रेण प्रविशन्तीं निजां तनुम् ।
तया संक्षालयेत् सर्वमन्तर्देहगतं मलम् ॥
तत्क्षणात् विरतो मन्त्री जायते स्फटिकोपमः ।
इदं स्नानवरं श्रेष्ठं सहस्रमधिकं स्मृतम् ॥

एवं वामे गुरुभ्यो नमः, परमगुरुभ्यो नमः, परात्परगुरुभ्यो नमः, इति पादुकान्निजगुरुमारभ्य ब्रह्मादिपर्य्यन्तं गुरून् प्रणम्य, दक्षिणे ॐ शं गणपतये नमः, ॐ दं दुष्कुत्यै नमः, ॐ सं सरस्वत्यै नमः, ॐ क्षं क्षेत्रपालाय नमः, इति प्रणम्य पुरतः -

ॐ तप्तहाटककेशान्त ! ज्वलत् पावकलोचन !
वज्राधिकनखस्पर्श ! दिव्यसिंह ! नमोऽस्तुते ॥

इति मन्त्रेण नृसिंहं स्मृत्वा प्रणवस्य ऋष्यादि स्मृत्वा वामेपूरके रक्तं, कुम्भके श्यामं विष्णुं, रेचके शिवं श्वेतं ध्यायन् क्रमेण द्वात्रिंशत्, चतुःषष्टि, षोडशवारान् प्राणानायम्य दक्षिणेन नासापुटेन रेचयेत् । पुनः दक्षिणेनाऽऽपूर्य्यवामेन रेचयेत् । पुनः वामेनापूर्य्य दक्षिणेन रेचयेत् । एवं प्राणायामत्रयं कृत्वा नृसिंहं ध्यात्वा नृसिंहोपासनां करिष्ये इति संकल्प्य तदर्थं भूतशुद्ध्यादि कुर्य्यात् । तद् यथा - भूतशुद्धिप्रभृतयः -

पादादि जानुपर्य्यन्तं पृथ्वीस्थानं प्रकीर्त्तितम् ।
पार्थिवं मण्डलं तत्र तत् पीतं परिकीर्त्तिम् ।१।
वज्रेण लाञ्छितं स्थित्वा तस्यमध्यगतं च 'ल'म् ।

* लमिति पृथिवी वीजम्

पृथिवी षड्गुणा प्रोक्ता पादाघातैस्तु शोधयेत् ।२।
जान्वादि नाभि पर्य्यन्तम् अपां स्थानं प्रकीर्त्तितम् ।

वारुणं मण्डलं श्वेतं धनुराकारमिष्यते ।३।
पद्मेन लाञ्छितं मध्ये 'वं' वीजं तु चतुर्गुणम् ।

* वं वरुण वीजम्

स्मृत्वा तेन जलं शोष्य पश्चोद्घात प्रयोगतः ।४।
ततः संशोधयेन्मन्त्री हृदिस्थं ब्रह्ममण्डलम् ।
नाभ्यादि हृदयान्तं च वह्निस्थानं प्रकीर्त्तितम् ।५।
त्रिकोणं रक्तवर्ण्णं च स्वस्तिकेन तु लाञ्छितम् ।
वह्निमण्डलमध्यस्थं 'रं' वीजं त्रिगुणात्मकम् ।६।

* रं अग्निवीजम्

चतुरुद्घातयोगेन वह्निं तत्र विशोधयेत् ।
हृदयादि भ्रूमध्यान्तं वायोः स्थानं प्रकीर्त्तितम् ।७।
वायोस्तु मण्डलं तत्र वर्तुलं द्विगुणात्मकम् ।
विन्दुना लाञ्छितं मध्ये 'यं' वीजं धूम्रवर्ण्णकम् ।८।

* यं वायुवीजम्

ध्यात्वा तेन च वायुं वै त्रिरुद्घातप्रयोगतः ।
वायुं संशोष्य मतिमान् पश्चादाकाशशोधनम् ।९।
भ्रूमध्याद् ब्रह्मरन्ध्रान्तं व्योम्नः स्थानं प्रकीर्त्तितम् ।

* हं आकाश वीजम् इति

नीलं ध्यात्वा तु तद् वीजम् नभोऽप्येकगुणं स्मृतम् ।१०।
त्रिरुद्घातप्रयोगेण धीमान् संशोधयेन्नभः ।

उद्घातलक्षणम् – भूतवीजं विन्दुयुक्तं प्लुतं प्रणवपूर्वकम् ।
दीर्घोच्चारसमायुक्तम् उद्घातः परिकीर्त्तितः ॥

ततोऽऽत्मानं ब्रह्मरन्ध्रे शं वीजेन निवेश्य वायुवरुणयोः वीजेन वायुमण्डले सवीजके व्युत्क्रमेण ध्यायेत् । अर्थात् यं वीजेन वायुमण्डलं वं वीजेन च वारुणं मण्डलं ध्यायेत् । एवं भूतपञ्चकसंशोषणमनुषन्धाय पापपुरुषं बामकुक्षौ विचिन्तयेत् । अर्थाद् वह्निस्थाने विचिन्तयेत् ।

तद् यथा – ब्रह्महत्या शिरस्कं च सुरापानमुखम् तथा ।
स्वर्ण्णस्तेयकरद्वन्द्वं गुरुतल्पकटिद्वयम् ॥

तत् संसर्गपदद्वन्द्वं कृष्णवर्ण्णमघं स्मरेत् ।
महापातकसर्वाङ्गं पातकोपाङ्गसंश्रयम् ॥
उपपातकरोमाणि पिङ्गभ्रूश्च श्रीलोचनम् ।
पिङ्गोद्ध्वंकेशं दुर्गन्धं स्मरेत् प्रादेशमात्रकम् ॥

वामकुक्षौ प्रादेशमात्रकं पापपुरुषं विचिन्तयेदिति । ततः ॐ यं इति वायुवीजं त्रिरुच्चार्य्यशोषयेत् । तथैव ॐ रम् इति वह्निवीजं त्रिरुच्चार्य्य तेन च आप्लाव्य पूर्ववत् पञ्चमहाभूतानि उत्पन्नानि इति चिन्तयित्वा स्वदेहं नूतनं पापहीनं स्वर्ण्णाभं पुनरुत्पन्नानि संचिन्त्य ॐ शम् इति जीववीजं त्रिरुच्चार्य्य अनेन वीजेन च जीवं तत्र नूतनशरीरे निवेशयेत् । ततः प्रणवं चतुर्द्दशवारान् उच्चार्य्यचतुर्द्दशसंस्काराः परमात्मनः गर्भे १- गर्भाधानं, २- पुंसवनं, ३- स्वभावनं, ४- सीमन्तोन्नयनं, ५- ततो जीवजन्मभावनं, जातकर्म, ७- तस्य नामकरणं, ८-वहिर्निष्क्रमणम्, ९- अन्नप्राशनं, १०- चूडाकरणं, ११- उपनयनम्, १२- वेदव्रतं (वेदारम्भः) १३- समावर्त्तनं, १४- विवाहश्चेति भावनीयाः । ततः शक्त्युत्थापनम्, तद्यथा – मूलाधारकन्दे वामभागदुहिता ईडानामनाडी, दक्षिणभागदुहिता पिङ्गला, तद्गतपद्मान्तर्गतयोनिमध्येऽधोमुखी सुषुम्नातया ईडापिङ्गलयोः शरीरे षट्सु स्थानेषु सम्बन्धात् षट्सुग्रन्थिषु षट्पद्मानि । १- आधारपद्मं चतुष्कोणं चतुर्द्दलं, तत्र वाऽऽदि सान्तं चतुर्वीजकं यथा – व, श, ष, स इत्यक्षराणि, स्वर्ण्णवर्ण्णम् । २-लिङ्गदेशेऽधिष्ठानपद्मं, अर्द्धचन्द्राभं, इन्द्रचापद्युतिः, बाऽऽदि लाऽन्तं, यथा – ब, भ, म, य, र, ल इत्यक्षराणि षड्वीजाऽधिष्ठित षड्दलम् । ३- नाभिदेशे मणिपूरकपद्मं डाऽऽदि फान्तम् , दशवीजाऽधिष्ठितदशदलम् कृष्णवर्ण्णं नीलवर्ण्णं वा षण्मुखम् । ४- हृदयम् अनाहतपद्मम्, अरुणं, त्रिकोणं, काऽऽदि ठाऽन्तं, द्वादशवीजाऽधिष्ठित द्वादशदलकम् । ५- कण्ठदेशे विशुद्धाख्यं पद्मं, शुक्लवर्ण्णं पूर्ण्णेन्दुवर्त्तुलं, षोडशस्वराधिष्ठितषोडशदलम् । ६- भ्रूमध्ये आज्ञापद्मं अष्टकोणं कदम्वगोलकाकारं ह, क्ष, वीजाधिष्ठित द्विपत्रकं कुन्तलान्तकं पद्मम् । ततो ब्रह्मरन्ध्रे सहस्रारे पद्मे दाडिमीकुसुमाभे सुधाविम्वगतं ब्रह्मानन्दात्मकं शिवं स्मरेत् । तथाऽऽधारकन्दगत त्रिकोणत्रिगुणकयोः नौ मध्ये (तौ मध्ये)

पूर्वादिदिक्षु सद्भाव सत्पादाऽऽहार्य्यगार्ह्यपत्याऽऽहवनीयाऽऽख्यान् पश्चाऽग्नीन् स्मृत्वा आधारकन्वं स्वोपास्य मन्त्रवर्णसंख्यया वेष्टयित्वा अर्थात् द्वात्रिंशन्मन्त्राक्षरैः स्थितां ह्रीवीजशिरोयुतां कुण्डलिनीशक्तिं स्मरेत् । ततः पूरकेण वायुमापूर्य्य कुम्भकेन आधारे धृत्वा तेन वायुसंदीप्ताग्नि-तापाऽभिघातेन कुण्डलिनीवन्धत्यागं भावयित्वा तां शक्तिं दण्डाहतभजङ्गामिव उत्थाप्य महानादप्रणवमुच्चारयन् सुषुम्नागतषट्चक्र-वर्णसोपानमार्गेण तद्वर्णान् स्पृशन्तीं शनैः शनैः भ्रूमध्यं निर्भिद्य अर्थाद् ईडापिङ्गलयोः मध्यस्थं सुषुम्नास्थिताऽऽधारादिषड्चक्रं निर्भद्य ब्रह्मरन्धं प्रापय्य तत्र सुधाविम्वगते विन्दौ ब्रह्मानन्दात्मनि शिवाख्ये संक्रमय्य शिवशक्तिमेलनेन नादविन्द्वाऽऽहतमहागर्जनद्रवीभूत सुधाविम्वाद् विगलितब्रह्मानन्दाऽ-मृतवर्षणैः सुषुम्नादिनाडीः देहगताः आपूर्य्य, तत्राऽऽप्लुतनिमज्याऽसकृत् अनेन मनोलये सति सच्चिदानन्दानन्देन परमात्मना जीवात्मानम् एकीकुर्य्यात् ॥ इयं भूतशुद्धिः ॥

अथ प्राणप्रतिष्ठा – मन्त्रषडङ्गध्यानादिपूर्ववत् । अत्र प्रयोगस्तु ब्रह्माविष्णुमहेश्वराः ऋषयः ऋग् यजुः सामाथर्वाणि छन्दांसि । प्राणशक्तिः देवता, अशेषप्राणि-चेतनत्वरूपात्मकप्राण प्राणशक्तिः देवतात्वम् इत्यर्थः । हं सो वीजं स्वाहाशक्तिः, आवीजं क्रौं शक्तिः प्राणप्रतिष्ठार्थे विनियोगः ।

करन्यासः – ॐ आं अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां स्वाहा, ॐ क्रौं मध्यमाभ्यां वषट् । ॐ यं रं लं वं शं षं सं हं सः सोऽहं कनिष्ठाभ्यां वौषट् । ॐ नारायण ! इह प्राणा इह स्थिताः । मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रो जिह्वात्वक् घ्राण इहागत्य सुखं चिरं तिष्ठन्तु करतल-अस्त्राय फट् ।

ध्यानं –

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः ।
पाशं कोदण्डमिक्षुद्भवमथगणताप्यङ्कुशं पञ्चवाणान् ॥
विभ्राणासृक् कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्याः ।
देवीवालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

प्रयोगस्तु – हृदिकरं निधाय ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः, मे जीव इह स्थितः, ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः, मम वाङ्मनश्चक्षुस्त्वक् श्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इत्यात्मनः हृदि भावयेत् । इत्थं विस्तरं कर्तुमशक्तानां भूतशुद्धिः । कालाग्निरुद्राद्रुत्थितं जाज्वल्यमानं ब्रह्माण्डपूर्णं वह्निमण्डलं ॐ रं, संचिन्त्य तेनाप्लावितमात्मानं चिन्तयित्वा प्रादुर्भाव्य अजपाद्वितीयाप्राणप्रतिष्ठां कुर्य्यात् ।

अथमातृकान्यासः –

अहं नृसिंहनान्योऽस्मि ब्रह्मैवाऽहं न शोकभाक् ।
सर्वदाऽऽनन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥

इति स्वस्मिन् नृसिंहाकारब्रह्मात्मतां विभाव्य, उपर्य्युपरि तालत्रयं कृत्वा ईशानादि ॐ ऐशानीं दिशं चक्रेण वध्नामि नमश्चक्राय स्वाहा इति मन्त्रेण ऐन्द्रीमाग्नेय्यामित्यादिदिशः योजयित्वा अङ्गुष्ठस्फोटिकया दशदिशो वध्नीयात् । ततः ॐ रम् इति वीजेन त्रिशिखमुखमुद्रया अग्निप्राकारत्रयं कुर्य्यात् । सर्वरक्षार्थं नृसिंहसुदर्शनाऽऽराधनं कुर्य्यात् । तद् यथा – ॐ नरसिंहसुदर्शनमन्त्रस्य दुर्वासा ऋषिः, गायत्रीछन्दः सुदर्शनरूप नृसिंहो देवता । यौं वीजं हां शक्तिः सर्वरक्षार्थे विनियोगः । नृसिंहं ध्यात्वा ॐ ज्वालावर्त्तिनि क्ष्णैं हनहन ॐ सहस्रारं हूं फट् स्वाहा, इति अष्टाविंशतिवारान् यथाशक्ति वा जपेत् । ॐ मातृकामन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः सरस्वती देवता हलो वीजं स्वराः शक्तयः मातृकान्यासे विनियोगः । ॐ कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः इत्यादि कराङ्गन्यासौ । ततो ध्यानम् – तालपत्रपुस्तकवद् दर्शयामि –

पञ्चाशद् वर्णभेदैर्विहितवदनदोः पादयुक् कुक्षिचक्षो
देहाभास्वत् कपर्दां कलितशशिकलामिन्दुकुन्दावदाताम् ॥
अक्षस्रक् कुम्भचिन्तालिखितवरकरां त्र्यक्षणां पद्मसंस्थाम् ।
अच्छाकल्पामतुच्छस्तनजघनवरां भारतीं तां नमामि ॥

इति सरस्वतीं ध्यात्वा शरीरेषु षट्सु पद्मेषु पूर्वोक्तान् वर्णान् न्यसेत् । प्रत्यक्षरन्यासं कृत्वा इत्यन्तर्मातृकाः । अथ वहिर्मातृकायां पूर्वोक्ताष्यादिकं

कराङ्गन्यासं कुर्य्यात् । तद् यथा - न्यासस्थानानि -

शिरोवदनवृत्ताक्षि श्रुतिघ्राणेषु गण्डयोः ।
ओष्ठदन्तोत्तमाङ्गाऽऽस्ये दोपद् सन्धयाऽग्रकेषु च ॥
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽशकौ ।
ककुदंशे च हृत्पूर्वपाणिपादयुगे तथा ॥
जठराऽऽननयोर्नस्ये मातृकाश्च यथाक्रमम् ।

इति न्यासं कुर्य्यात् । प्रत्यक्षरन्यासं कृत्वा ।

अथ सृष्टिन्यासं - ऋष्यादिन्यासः पूर्ववत्, केवलं सृष्टिन्यासे विनियोगः इति विशेषः । कराङ्गन्यासौ च पूर्ववत्, ध्यानमुक्तम् । उक्तेषु तेषु स्थानेषु विसर्गान्तैः वर्णैः न्यसेत् । इति सृष्टिन्यासः ।

अथ स्थिति न्यासः - अत्र सरस्वती देवता स्थित्यर्थे विनियोगः, इति विशेषः । निम्नोक्तं ध्यानं ध्यात्वा विसर्गसहितैः वर्णैर्न्यसेत् -

सिन्दूरकान्तिमणिसंभरणां त्रिनेत्रां
विद्याऽक्षसूत्रमृगपोतवरान् दधानाम् ।
पार्श्वस्थितां भगवतीं मणिकाञ्चनाभां
ध्याये कराब्जधृतपुस्तकवर्ण्णमालाम् ॥

अथ संहारन्यासः - अत्र संहार सरस्वती देवता । संहारार्थे विनियोगः । ध्यानमुक्तम् । विन्द्वन्तः प्रतिलोमगैः वर्णैः न्यसेत् । यथा - अं, आं ॥

॥ इति सृष्टिस्थितिसंहारन्यासत्रयभेदः ॥ सृष्टिस्थित्योः - अः, आः ॥

अथ कलान्यासः - ॐ अं, आं इत्यादि षडङ्गः, इं, ईं, उं, ऊं एवं नपुंसकस्वरवर्जितैः स्वरैः द्वादशभिः द्वाभ्यां द्वाभ्यां न्यसेत् । अत्र स्वरेषु के न पुंसकस्वराः इति सन्देहः मन्ये '८' स्वरवर्जितैः केशवादिन्यासे षडङ्गस्थले यथा वर्त्तते प्रायशः तथाऽत्राऽपि भवेत् । कलासंख्यासु अपि सन्देहः । यद् भवतु यथा वद् विलिखामि । मन्ये षोडशकला एव षोडशः स्वराः तथा ३४ व्यञ्जनवर्ण्णाः ।

ध्यानम्-

हस्तैः पद्मं रथाङ्गं गुणमथहिरणं पुस्तकं वर्ण्णमाला । (हरिणं)
टङ्कं शूलं कपालं वरममृतलसद्धेमकुम्भं वहन्तीम् ।
मूर्त्यांविद्युत्पयोद स्फटिकनवजवावन्धुरैः पञ्चवर्णैः ।
त्र्यक्षे वक्षोनम्रां सकलशशिनिभां भारतीं तां नमामि ॥

कलाः - निवृत्तिः, प्रतिष्ठा, विद्या, शान्तिः, चर्च्चिका, दीपिका, रेचिका, मोचिका, क्षीरा, सूक्ष्मा, सूक्ष्मामृता, ज्ञानामृता, आप्यायिनी, व्यापिनी, व्योमरूपिणी, अनन्ता, सृष्टिः, ऋद्धिः, श्रुतिः, मेधा, कान्तिः, लक्ष्मीः, द्युतिः, स्थिरा, स्थितिः, सिद्धिः, पालिनी, क्षान्तिः, ऐश्वर्य्या, रतिः, कालिका, वरदा, ह्लादिनी, प्रीतिः, दीर्घा, तीक्ष्णा, रौद्री, अभया, भया, निद्रा, तन्द्रा, क्षुधा, क्रोधिनी, क्रिया, उत्कार्य्या, मृत्युः, पीता, श्वेता, अरुणा, असिता, चित्कारिणी, (५०) एताश्चतुर्थ्यन्ताः, यथा - ॐ अं निवृत्तिकलायै नमः ललाटे, इति वर्ण्णमातृकान्यासवद् भविष्यति ।

* अथ केशवादिन्यासः *

ॐ केशवादिन्यासस्य दक्षप्रजापतिः ऋषिः गायत्रीछन्दः, लक्ष्मीनारायणो देवता । क्लीं वीजं स्वाहा शक्तिः केशवप्रीत्यर्थे विनियोगः । अथ षडङ्गन्यासः ॐ अं क्लीं आं हृदयाय नमः, ॐ इं क्लीं ईं शिरसे स्वाहा । ॐ उं क्लीं ऊं शिखायै वषट्, ॐ एं क्लीं ऐं कवचाय हूं । ॐ ओं क्लीं औं नेत्रायाय बौषट्, ॐ अं क्लीं अः अस्त्राय फट् । इत्थं करन्यासोऽपि भविष्यति । अथवा - ॐ अं श्रीं नमो नारायणाय हंसः, सोऽहं कं खं गं घं ङं ॐ आं श्रीं नमो नारायणाय हं सः, सोऽहं देव्यै हृदयाय नमः । ॐ इं श्रीं नमो नारायणाय हंसः,सोऽहं चं छं जं झं ञं ॐ ईं श्रीं नमो नारायणाय हं सः सोऽहं पद्मिन्यै शिरसे स्वाहा । ॐ उं श्रीं नमो नारायणाय हंसः, सोऽहं टं ठं डं ढं णं ॐ ऊं श्रीं नमो नारायणाय हंसः, सोऽहं विष्णुपत्न्यै शिखायै वषट् । ॐ एं श्रीं नमो नारायणाय हंसः, सोऽहं तं थं दं धं नं ॐ ऐं श्रीं नमो नारायणाय हं सः, सोऽहं वरदायै कवचाय हूं । ॐ ओं श्रीं नमो नारायणाय हं सः,सोऽहं पं फं वं भं मं ॐ औं श्रीं नमो नारायणाय हं सः, सोऽहं कमलरूपायै नेत्रत्रयाय वौषट् । ॐ अं

श्रीं नमो नारायणाय हं सः, सोऽहं यं रं लं वं शं षं सं हं क्षं ॐ अः श्रीं नमो नारायणाय हं सः सोऽहं शूलिन्यै अस्त्राय फट् । अन्यस्मिन् तालपत्रपुस्तके निम्नोक्तन्यासः वर्त्तते । यथा -

करन्यासः - ॐ क्लां अङ्गुष्ठाभ्यां नमः, ॐ क्लीं तर्जनीभ्यां स्वाहा, ॐ क्लूं मध्यमाभ्यां वौषट्, ॐ क्लैं अनामिकाभ्यां हूं, ॐ क्लौं कनिष्ठाभ्यां वौषट् । ॐ कः करतलकरपृष्ठा-भ्यामस्त्राय फट् । एवं अङ्गन्यासश्च भवेत् । ततः ध्यानम् -

हस्तैर्विभ्रत् सरसिजगदाखड्गचक्राणि विद्याः ।
पद्माऽऽदर्शं कनककलशं मेघविद्युद् विलासम् ॥
बामोत्तुङ्गस्तनमविचला कल्पमाश्रेय लोकाद् ।
एकीभूतं वपुरवतुवः पुण्डरीकाक्षलक्ष्म्योः ॥
उद्यत् प्रद्योतनशतरुचिं तप्तहेमाभकान्तिम् ।
पार्श्वद्वन्द्वे जलधितनया विश्वधात्र्या च युष्टम् (युक्तम् वा) ।
नानारत्नैलसितविविधाऽऽकल्पनं पीतवस्त्रम् ।
विष्णुं वन्दे दरकमलकौमोदकीं चक्रपाणिम् ॥

एवं ध्यात्वा सर्वाङ्गन्यासं कुर्य्यात् । आङ्गिरसे ॐ श्रीं ह्रीं क्लीं, क्ष्रौं, इदं प्रणवादि वीजचतुष्टयं सर्वत्र मातृकासु प्राग् वर्त्तते । यथा - ॐ श्रीं, ह्रीं, क्लीं, क्ष्रौं, अं केशवकीर्त्तिभ्यां नमः मुखमण्डले, इं माधवतुष्टिभ्यां नमः दक्षनेत्रे । ईं गोविन्दपुष्टिभ्यां नमः वामनेत्रे, उं विष्णुधृतिभ्यां नमः दक्षकर्ण्णे, ऊं मधुसूदनशान्तिभ्यां नमः वामकर्ण्णे । ॐ श्रीं ह्रीं क्लीं क्ष्रौं, ऋं त्रिविक्रमक्रियाभ्यां नमः दक्षनासापुटे ॐ ॠं वामनदयाभ्यां नमः वामनासापुटे । ॐ लृं श्रीधरमेधाभ्यां नमः दक्षगण्डे । लॄं हृषीकेश हर्षाभ्यां (पुष्पाभ्यां वा) नमः वामगण्डे । एं पद्मनाभश्रद्धाभ्यां नमः ओष्ठे । ऐं दामोदर लज्जाभ्यां नमः अधरे । ओं वासुदेवलक्ष्मीभ्यां नमः ऊर्द्ध्वदन्तपङ्क्तौ । औं शङ्कर्षणसरस्वतीभ्यां नमः अधोदन्तपङ्क्तौ । अं प्रद्युम्नप्रीतिभ्यां नमः मस्तके । अः अनिरुद्धरतिभ्यां नमः मुखे, कं चक्रिजयाभ्यां नमः दक्षकरमूले, खं, गदिने दुर्गायै च नमः दक्षकूपरि । गं शार्ङ्गिप्रभाभ्यां नमः दक्षकरमणिबन्धे । घं खड्गिसत्याभ्यां नमः दक्षकराङ्गुलिमूले, ङं शङ्खिचण्डिभ्यां नमः दक्षकराङ्गुल्यग्रे । चं हलिवाणीभ्यां नमः वामकरमूले । छं मूषलीविलासिनीभ्यां नमः वामकूपरि । जं शूलिविजयाभ्यां नमः वामकरमणिबन्धे । झं पाशिविरजाभ्यां नमः वामकराङ्गुलिमूले, ञं अङ्कुशिविश्वाभ्यां नमः वामकराङ्गुल्यग्रे । टं मुकुन्दविमलाभ्यां नमः वा मुकुन्दविनयादाभ्यां नमः दक्षउरौ, ठं नन्दयशोदाभ्यां नमः नन्दसुनन्दाभ्यां वा नमः दक्षजानुनि, डं नन्दिस्मृतिभ्यां नमः दक्षजंघे, ढं नरऋद्धिभ्यां नमः दक्षपादाङ्गुलिमूले । णं नरकजित् समृद्धिभ्यां नमः दक्षपादाङ्गुल्यग्रे । तं हरिशुद्धिभ्यां नमः वामउरौ, थं वृष्णवुद्धिभ्यां नमः वामजानुनि, दं सत्यभुक्तिभ्यां नमः वामजंघे, धं सात्वतमूर्त्तिभ्यां वा मतिभ्यां नमः वामपादेऽङ्गुलिमूले, नं सौरिक्षणाभ्यां नमः वामपादाङ्गुल्यग्रे । पं शूररमाभ्यां नमः दक्षपार्श्वे, फं जनार्द्दनोमाभ्यां नमः वामपार्श्वे, बं भूधर कंजोदिनीभ्यां नमः क्लेदिनीभ्यां वा पृष्ठे, भं विश्वमूर्त्तिक्लिन्नाभ्यां नमः नाभौ, मं वैकुण्ठवसुदाभ्यां नमः उदरे, यं त्वगात्मकपुरुषोत्तमवसुधाभ्यां नमः हृदि, रं असृगात्मकवलिपराभ्यां नमः दक्षांसे, लं मांसात्मने वलानुजाय परायणायै च नमः ककुदि । वं मेदत्वग् बालसूक्ष्माभ्यां नमः वामांसे, शं अस्थ्यात्मकवृषघ्नसन्ध्याभ्यां नमः हृदादिदक्षहस्तान्तम् । षं मज्जात्मकवृषप्रज्ञाभ्यां नमः हृदादिवामहस्तान्तम्, सं शुक्रात्मकहंसप्रभाभ्यां नमः हृदादिदक्षपादे, हं प्राणात्मकवराहनिशाभ्यां नमः हृदादिवामपादे । (लं सत्यात्मकविमलामोघाभ्यां, वा- जीवात्मने विमलाय अमोघायै च नमः हृदादि उदरे, अनया मातृकया सह एकपञ्चाशन्मातृकाः भविष्यन्ति ।) क्षं क्रोधात्मकनृसिंहविद्युद्भ्यां नमः हृदादिमुखे, एवं मातृकास्थानेषु न्यसेत् सर्वत्र प्रणवपूर्वकं वीजचतुष्टयं व्यवहरेत् ।

केशवाद्या उपास्या वै शङ्खचक्रलसत्कराः ।
एताः प्रियतमाङ्केषु निषण्णाः सुस्थिताननाः ॥
विद्युद्दामसमानाङ्गाः पङ्कजाऽभयवाहवः ॥ इति ॥

अथ श्रीकण्ठादिमातृकान्यासः -

ॐ श्रीकण्ठादिमातृकान्यासमन्त्रस्य अम्वर्षिः ऋषिः गायत्री छन्दः अर्द्धनारीश्वरो देवता ॐ वीजं, ह्रीं शक्तिः श्रीकण्ठादिमातृकान्यासे विनियोगः । ॐ ह्रीं नमो भगवति ! ब्रह्मणि मां रक्ष रक्ष पद्महस्ते ! मां रक्ष रक्ष,

अं कं खं गं घं ङं आं हौं ह्रीं क्षौं संजीवहृदयाय नमः। ॐ ह्रीं नमो भगवति ! माहेश्वरि ! मां रक्ष रक्ष त्रिशूलहस्ते ! मां रक्ष रक्ष, इं चं छं जं झं ञं ईं, हौं ह्रीं क्षौं जटिलकेशिनि ! शिरसे स्वाहा । ॐ ह्रीं नमो भगवति कौमारि ! मां रक्ष रक्ष शक्तिहस्ते ! मा रक्ष रक्ष उं टं ठं डं ढं णं ऊं हौं ह्रीं क्षौ ऊद्धर्वकेशिनि ! शिखायै वषट् । ॐ ह्रीं नमः, भगवति ! वैष्णवि ! मां रक्ष रक्ष चक्रहस्ते ! मा रक्ष रक्ष एं तं थं दं धं नं ऐं हौं ह्रीं क्षौं माया त्रैलोक्यरूपसहस्र परिवर्तिनि ! कवचाय हूं । ॐ ह्रीं नमः भगवति वाराहि ! मां रक्ष रक्ष, वज्रनख दंष्ट्रहस्ते ! मां रक्ष रक्ष ॐ पं फं वं भं मं औं हौं ह्रीं क्षौं तारकाक्षिणि नेत्रत्रयाय वौषट् । ॐ ह्रीं नमः, भगवति इन्द्राणि ! मां रक्ष रक्ष, वज्रहस्ते ! मां रक्ष रक्ष, अं यं रं लं वं शं षं सं हं लं क्षं अः हौं ह्रीं क्षौं सारिणि मारिणि ! अस्त्राय फट् । इति षडङ्गः ।

ध्यानम् –

सिन्दूरकाञ्चननिभां रुचिराक्षमालां,
पाशाङ्कुशौ च वरदं निजवाहुदण्डैः ।
बिभ्राणमिन्दुशकलाऽऽ (सकला वा) भरणं त्रिनेत्रं,
अर्द्धाम्बिकेशमनिशं वपुराश्रयामः ॥

सर्वाङ्गन्यासः –

ॐ ऐं ह्रीं हौं क्षौं नमः शिवाय, अं श्री कण्ठेशपूर्णोदरी (दरा वा) भ्यां नमः ललाटे । "आ" मातृकातः क्षं, यावत् सर्वासु मातृकासु प्रथमतः "ॐ ऐं ह्रीं हौं क्षौं नमः शिवाय" इति व्यवहृत्य क्रमशः मुखमण्डलादि स्थानेषु न्यसेत्। आं अनन्तेशविरजाभ्यां नमः, इं सूक्ष्मेश शाल्मलीभ्यां (शाल्वीभ्यां वा) नमः । ईं त्रिमूर्तीश लोलाक्षीभ्यां नमः, सर्वत्र नमः, उं अमरेशवर्त्तुलाक्षिभ्यां, ऊं अर्द्धांशदीर्घघोणाभ्यां नमः, ऋं भारभूतीश दीर्घमुखीभ्यां, ॠं अतिथीशगोमुखाभ्यां, लृं स्थाण्वीशदीर्घजिह्वाभ्यां, लॄं हरेण कुण्डोदरीभ्यां (कृशोदरी वा) एं रुष्टीश (रुण्ठीशो वा) ऊद्धर्वकेशिनीभ्यां, (अत्र सद्धिः भविष्यति) ऐं भौतिकेशविकृतिमुखीभ्यां, ॐ सद्योजातेश ज्वालामुखीभ्यां, औं अनुग्रहेशोल्कामुखीभ्यां, अं अक्रूरेश श्रीमुखीभ्यां, अः महासेनेश विद्यामुखीभ्यां नमः मुखे । षोडशस्वरमातृकाः । ॐ ऐं ह्रीं हौं क्षौं नमः शिवाय कं क्रोधेश महाकालीभ्यां नमः दक्षकरमूले । खं चण्डेशसरस्वतीभ्यां, गं

पञ्चान्तकेश सर्वसिद्धिकराभ्यां, घं शिवोत्तमेशगौरीभ्यां, ङं एकरुद्रेश त्रैलोक्यविद्याभ्यां, चं कूर्मेशमन्त्रशक्तिभ्यां, छं एकनेत्रेशाऽऽत्मशक्तिभ्यां, जं चतुराननेशभूमातृकाभ्यां, झं अजेश लम्वोदरीभ्यां, ञं सर्वेशद्रावणीभ्यां टं सोमेशनागरीभ्यां, ठं लाङ्गलीशखेचरीभ्यां, डं दारुकेशमञ्जरीभ्यां, ढं अर्द्धनारीशरूपिणिभ्यां, णं उमाकान्तेश वीरीणीभ्यां तं अक्षादिनेश कामोदरीभ्यां, थं दण्डिनेशपूतनाभ्यां, दं अत्रीशभद्रकालीभ्यां, धं मीनेशयोगिनीभ्यां, नं मेषेशशङ्खिनीभ्यां, पं लोहितेशगर्जिनीभ्यां, फं शिखिनेश कालरात्रिभ्यां, बं छगलण्डेशकुर्द्दिनीभ्यां, भं द्विरेण्डेशकपर्द्दिनीभ्यां, मं महाकालेशवज्रिणीभ्यां, यं त्वगात्मकपालिजयाभ्यां, रं असृगात्मभुजङ्गेश सुमुखीभ्यां, लं मांसात्मकपिनाकीशरेवतीभ्यां, वं मेदात्मकखड्गीश-माधवीभ्यां, शं अस्थ्यात्मकवामेशवारुणीभ्यां, षं मज्जात्मकश्वेतेशवायवीभ्यां, सं शुक्रात्मकभृग्वीशरजोवधारिणीभ्यां, हं प्राणात्मकनकुलीश सहजाभ्यां, लं शय्यात्मकशिवेशलक्ष्मीदायिनीभ्यां, (अधिकेयंमातृका पञ्चाशतः) क्षं आत्मात्मकसम्वर्त्तकेशमहामायाभ्यां नमः हृदादिमुखे ॥ अङ्गस्थानानि केशवादिन्यासवत् ।

एते रुद्राः स्मृता रक्ता धृतशूलकपालिकाः ।
एते रुद्राङ्कपीठस्थाः सिन्दूरारुणविग्रहाः ॥
रक्तोत्पलकपालाभ्याम् अलंकृतकराऽम्वुजाः ।

रुद्रैर्युक्तां केशवाद्यैर्युतां वा कर्मरम्भे मातृकां विन्यसेद् यः ।
मन्त्राः सद्यः कुर्वते तस्य सिद्धिं दोषाः सर्वे यान्ति नाशं ग्रहाद्याः ॥

* अथ शक्तिमातृकान्यासः *

न्यासस्यास्य ब्रह्मा ऋषिः गायत्रीछन्दः विश्वजननीपरामाया शक्तिर्देवता । ह्रीं वीजं शं शक्तिः इष्टार्थे, अत्राभिषलित कर्मणः नामोच्चारणं कर्त्तव्यं । विंनियोगः । ॐ ह्रीं, शं हृदयाय नमः इत्यादि षडङ्गन्यासः करन्यासश्च । ततः ध्यानम्, सर्वाङ्गमातृकान्यासश्च ।

उद्योत्कोटिदिवाकरप्रतिभटीं तुङ्गीरुपीनस्तनीम् ।
वद्धाऽर्द्धेन्दुकिरीटहाररसनामञ्जीरसंशोभिनीम् ॥

विभ्राणाकरपङ्कजैर्जपपटीं पाशाङ्कुशौ पुस्तकम् ।
दिश्याद्नो जगदीश्वरी त्रिनयना पद्मेनिषण्णा सुखम् ॥

ॐ ह्रीं अं ह्रीं नमः ललाटे । एवं ह्रीं पुटितं आं इत्यादि न्यासः ।

* अथ लक्ष्मीमातृकान्यासः *

अस्य भृगु ऋषिः, निवृद् गायत्री छन्दः, श्रीः देवता, श्रीं वीजं, शक्तिश्च, इष्टार्थे विनियोगः । ॐ श्रीं श्रीमित्यादि षडङ्गन्यासः, करन्यासश्च ।

ध्यानम् – विद्युद्दामसमप्रभं हिमगिरिप्रत्यैश्चतुर्भिः गजैः ।
शुण्डादण्डसमुद्धृताऽमृतघटैरासिच्यमानां रसाम् ॥
विभ्राणां करपङ्कजैर्जवपटीं (जप) पद्मद्वयं पुस्तकम् ।
भास्वद्ब्रह्मसमुज्वलां कुचनतां वर्त्तात्मिकां भावये ॥

ॐ श्रीं अं श्रीं नमः ललाटे । एवं श्रीं पुटितम् आमित्यादि मातृकान्यासः ।

* अथ कामेश्वरी मातृकान्यासः *

अस्य सम्मोहनः ऋषिः गायत्रीछन्दः, विश्वजननीपरमामायाशक्तिः देवता, क्लीं वीजं इष्टार्थे विनियोगः । ॐ क्लीं क्लीमित्यादिषडङ्गकरन्यासौ, क्लीं पुटितं अमित्यादि पूर्ववत् मातृकान्यासः ।

ध्यानम् – वालार्ककोटिरूचिरां स्फटिकाक्षमालाम् ।
कोदण्डमिक्षुजनितं स्मरपञ्चवाणान् ॥
विद्यां च हस्तकमलैः दधतीं त्रिनेत्राम् ।
ध्याये समस्तजननीं नवचन्द्ररूढाम् ॥

* अथ शक्तिकमलान्यासः – शक्ति श्री कामेश्वरी न्यासः *

ॐ शक्ति श्री कमलान्यासस्य ब्रह्माभृगुसम्मोहनाः ऋषयः, गायत्री छन्दः सम्मोहनी देवता इष्टार्थे विनियोगः । ॐ ह्रीं श्रीं, क्लीं हृदयाय नमः इत्यादि षडङ्गकरन्यासौ च भवेतां ।

* अथ सुब्रह्मणः न्यासः – सुब्रह्मन्यासः *

अस्य न्यासस्य ब्रह्मा ऋषिः, परमा गायत्री छन्दः, परं ज्योतिः देवता, सुब्रह्मन्यासे विनियोगः । षडङ्गन्यासः – ॐ स्वाहा हृदयाय नमः, ॐ सोऽहं

शिरसे स्वाहा, ॐ हंसः, शिखायै वषट् ॐ क्लीं कवचाय हूं, ॐ ऐं नेत्रत्रयाय वौषट्, ॐ हरिहर अस्त्राय फट् ।

ध्यानम् – एवं वक्त्रसु भेदभिन्नमदृढं मांसाऽस्थिमज्जाऽऽवृतम् ।
देहे तत्क्षणमक्षरेषु विशदं सर्वत्र वर्तिन् यथा ।
हुत्वा ब्रह्महुतासने (शने) विमलधी तेजः स्वरूपी स्वयं,
भूत्वा सर्वमनून् जपेदपि यजेद् रूपे समराधयेत् ॥

मातृकान्यासः –

ॐ ह्रीं "अं" हरिहरपरं ज्योतिषि जुहोमि सोऽहं सः स्वाहा ललाटे । एवं अं स्थाने आमित्यादि मतृकाः दत्त्वा सर्वाङ्गे न्यसेत् । एवं क्रमेण मातृका विन्यस्य मातृकास्वरूपिणे नृसिंहाय संभृतोपचारेण पूजयामीति भावयेत् ।

अकारादिक्षकारान्तं मन्त्रेण वीजसंयुताम् ।
जपेज्जपादौ नियतं मन्त्रो वीर्य्यं विवर्द्धयेत् ॥ इत्थं मातृका उपास्याऽङ्गमन्त्रैरङ्गदेवतोपासना कर्त्तव्या । तद् यथा –

अथाऽङ्गदेवतामन्त्राः – भुवनेश्वर्य्याः –

ॐ भुवनेश्वरीमन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः भुवनेश्वरीदेवता ह्रीं वीजं, इं शक्तिः नृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः । ॐ ह्रीं ह्रीम् इति करन्यासाङ्ग न्याससर्वाङ्गन्यासा भविष्यन्ति । श्रीकण्ठवत् ।

ध्यानम्–

उद्यद् भास्वत्समाऽऽभां विकशितवदनामिन्दुकुन्दाऽवदाताम् ।
द्योतन्मौलित्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मरूपाम् ॥
हारग्रैवेयकाञ्चीमणिगणवलयाद् वै विचित्राऽम्वराढ्याम् ।
अम्वां पाशाऽङ्कुशेष्टाऽभयवरकमलामम्विकां तां नमामि ॥

इति ध्यात्वा मनसाऽभ्यर्च्च्य मन्त्रं यथाशक्ति जपेत् ।

गणेशस्य– ॐ गणपतिमन्त्रस्य गणकः ऋषिः, निवृद्गायत्रीछन्दः, गणेशो देवता गं वीजं, अं शक्तिः, गणरूपी नृसिंहप्रीतये विनियोगः । गम् गम् इति सर्वे न्यासा भविष्यन्ति । पूर्ववत् । रक्तं रक्तमाल्यानुलेपनं रक्तवस्त्रं पाशाऽङ्कुशदन्तवरहस्तं तं ध्यायेत् । मनसाऽभ्यर्च्च्य गमिति यथाशक्ति जपं

कृत्वा विसर्जयेत् ।

शिवस्य – ॐ शिव पञ्चाक्षरमन्त्रस्य वामदेवः ऋषिः पंक्तिच्छन्दः सदाशिवो देवता शमिति वीजं आं इति शक्तिः शिवरूपी नृसिंहप्रीतये विनियोगः । कुठारमृगाऽभयवरहस्तं श्वेतरूपं व्याघ्रचर्मपरिधानं ध्यायेत् । वीजेन न्यासा भविष्यन्ति । ॐ नमः शिवाय इति मन्त्रं जप्त्वा विसर्जयेत् ।

अग्नेः – ॐ अग्निमन्त्रस्य कश्यप ऋषिः त्रिष्टुप् छन्दः नृसिंहरूपि वह्निः देवता । रं वीजं अग्न्यात्मकनृसिंहप्रीत्यर्थे विनियोगः । पद्मासनं शुक्लांशुकमरुणवर्ण्णं अभयवरदहस्तं ध्यायेत्, ॐ रं अग्नये स्वाहा । इत्यभ्यर्च्च्य जप्त्वा विसर्जयेत् । अत्राऽपि रं मिति वीजेन न्यासाः ॥

मोक्षस्य – ॐ मोक्षमन्त्रस्य अत्रिः ऋषिः गायत्री छन्दः सोमरूपिनृसिंहो सं वीजं, नमः शक्तिः नृसिंहप्रीत्यर्थे विनियोगः । सम् इति षडङ्गादि, वरकुमुदहस्तं सुप्रसन्नं गौरवर्ण्णं ध्यायेत् । सं सोमाय नमः, इति अभ्यर्च्च्य जप्त्वा विसर्जयेत् ।

अथ प्रणवमन्त्रस्य ऋष्यादयः – ॐ ॐकाररूपप्रणवस्य ब्रह्मा ऋषिः, देवी गायत्री छन्दः, ॐकारः देवता अं वीजं उं शक्तिः, मं कीलकं, नृसिंहप्रीत्यर्थे विनियोगः । अत्र उदात्तस्वरः । ॐ परंब्रह्मणे नमः शिरसि, ॐ गायत्र्यै नमः मुखे, ॐ परमात्मने नमः हृदि, ॐ मं विचलायै नमः वामांशे (प्रायशोऽत्र दक्षांशे भविष्यति) ततः पादादिनाभिपर्य्यन्तं ॐ अकाराय नमः, ततः आकण्ठं ॐ उकाराय नमः, ततः ईं शिरसे स्वाहा, एवं प्रणवं मध्यं कृत्वा केशवन्यासवत् षड्ङ्गन्यासं कुर्य्यात् ।

ध्यानम् – श्रीवत्साङ्कं नीलकण्ठं त्रिनेत्रं प्रणवेश्वरम् ।
षड्भुजं स त्रिनेत्रश्च सृष्टिस्थिति लयप्रभुम् ॥
अधो दोर्भ्यां च विभ्राणामक्षमालां कमण्डलुम् ।
वामाभ्यां शङ्खचक्रे च त्रिशूलडम्वरू ततः ॥

इति सगुणध्यानम् ।

हृदयकमलमध्ये दीपवद् वेदसारम् ।
प्रणवमयमतन्वं योगिभिर्ध्यानगम्यम् ॥

हरिगुरुशिवयोगं सर्वभूतस्थमेकम् ।
सकृदपि मनसा हि ध्यायते यः स मुक्तः ॥
जगदङ्कुरकन्दाय विशदानन्दमुर्त्तये ।
शब्दिताऽ(गदिता वा)खिल भेदाय (वेदाय वा)
नमः शान्ताय विष्णवे ॥

इति ध्यात्वा जप्त्वाऽभ्यर्च्च्य विसर्जयेत् ।

अथ घृणिमन्त्रः –ॐ घृणिमन्त्रस्य वेदभाग ऋषिः गायत्री छन्दः आदित्यात्मनो नृसिंहो देवता, ह्रीं वीजम्, श्रीशक्तिः, नृसिंहप्रीत्यर्थे विनियोगः। ॐ सत्यतेजो ज्वालामालिने हूं फट् स्वाहा हृदयायनमः । एवमेव सत्यतेजः स्थाने ब्रह्मतेजः, विष्णुतेजः, रुद्रतेजः वह्नितेजः, सर्वतेजः यथाक्रमं योजयित्वा षडङ्गन्यासं कुर्य्यात् । ॐ सत्य ब्रह्मविष्णुरुद्रवह्निसर्वतेजो मालिने हूं फट् स्वाहा, इति घृणिमन्त्रः ।

ध्यानम् – अरुणपङ्कजे निविष्टं कमले करेऽभयं दधानं, स्वरूपहितमण्डलं, त्रिनेत्रे रविराकल्पशतोज्ज्वलो वपनः इति ध्यात्वाऽभ्यर्च्च्य ॐ ह्रीं घृणिसूर्य्य ! आदित्य ! श्रीं इत्युक्त्वा विसर्जयेत् ।

यजुर्लक्ष्मीमन्त्रः – अस्य मन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, महालक्ष्मीः देवता । तद्रूपि नृसिंहप्रत्यर्थे विनियोगः । ॐ भूः लक्ष्मीः हृदयाय नमः, ॐ भुवः लक्ष्मीः शिरसे स्वाहा, स्वः कालकर्ण्णीशिखायै वषट्, तन्नः कवचाय हूं, महालक्ष्मीः नेत्रत्रयाय वौषट्, प्रचोदयात् करतलकरपृष्ठा-भ्यामस्त्राय फट् इति न्यासः ।

पूर्ण्णमन्त्रः – ॐ भूर्लक्ष्मीः, भुवर्लक्ष्मीः स्वः, कालकर्ण्णी तन्नः महालक्ष्मीः प्रचोदयात् । ध्यानं – गौराङ्गाम् सुप्रसन्नास्यां शुक्लवस्त्रां चतुर्भुजाम्। पद्मद्वयवराऽभीर्ति दधानां सुभजे रमाम् ।१। इति ध्यात्वा जप्त्वाऽभ्यर्च्च्येत्।

नृसिंहगायत्री – अस्य मन्त्रस्य ब्रह्माऋषिः गायत्री छन्दः, श्री

नृसिंहः देवता, तत् प्रीत्यर्थे विनियोगः । ॐ नृसिंहाय विद्महे, वज्रनखाय धीमहि । तन्नः सिंहः प्रचोदयात् । न्यासः - ॐ नृसिंहाय हृदयाय नमः, विद्महे शिरसे स्वाहा, वज्रनखाय शिखायै वषट् । धीमहि कवचाय हूं, तन्नः सिंहः नेत्रत्रयाय वौषट्, प्रचोदयात् अस्त्राय फट् ।

ध्यानम् - अरुणकनकवर्ण्णं नीलकण्ठं त्रिनेत्रम् ।
रथचरणपिनाकाऽभोत्यभीष्टाऽग्रहस्तम् ॥
अमृतलहरीगौरं शेषभोगे शयानम् ।
प्रणमत शशिरूढं योगरूडं नृसिंहम् ॥ इति ध्यात्वा

जप्त्वाऽभ्यर्च्चर्य प्रणमेत् ।

एकाक्षरनृसिंह मन्त्रः - क्ष्रौं, इति अस्य मन्त्रस्य अत्रिः ऋषिः जगतीछन्दः, नृसिंहः देवता तत् प्रीत्यर्थे विनियोगः । ॐ क्ष्रौं, क्ष्रौं इति षडङ्गन्यासः ।

ध्यानम् - सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थलम् ।
योगारूढमतिप्रसन्नवपुषं भूषा सहस्रोज्ज्वलम् ॥
त्र्यक्षंचक्रपिनाक साभयवरं बिभ्राणमर्कछविम् ।
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ॥

इति ध्यात्वाऽभ्यर्च्चर्य मन्त्रं जप्त्वा महाचक्रवर्त्तिने मूलव्यूहरूपिणे श्रीनृसिंहाय नमः, इति प्रणमेत् । अत्र प्रायशः - क्ष्रौं भवेत् ।

श्रीसुदर्शनमन्त्रः - अस्य मन्त्रस्य अहिर्बुध्न्यः ऋषिः, अनुष्टुप् छन्दः, सुदर्शनरूपि नृसिंहो देवता, स्त्रं वीजं, हूं शक्तिः तत् प्रीत्यर्थे विनियोगः । ॐ सहस्रारं हूं फट् इति जप्त्वा प्रणमेत् ।

अष्टाक्षरनारायण मन्त्रस्य अन्तर्य्यामी साध्यनारायणः ऋषिः, देवीगायत्री छन्दः, श्री नारायणः नृसिंहरूपि देवता ॐ वीजं, आः(आं वा) शक्तिः तत् प्रीत्यर्थे विनियोगः । ॐ नमोनारायणाय, इत्यभ्यर्च्चर्य जप्त्वा नृसिंहरूपिणं नारायणं प्रणमेत् । द्वादशाक्षर वासुदेवमन्त्रस्य ब्रह्मा ऋषिः, गायत्रीछन्दः, वासुदेवात्मकनृसिंहो देवता, ॐ वीजं, आः शक्तिः तत् प्रीतये विनियोगः । ॐ नमो भगवते वासुदेवाय, इति जप्त्वाऽभ्यर्च्चर्य तं प्रणमेत् ।

※ अथ श्रीनृसिंहस्य विशेषपूजाविधिः ※

त्रिकालं गन्धपुष्पाद्यैरच्चर्यते देवताऽनिशं ।
पुरश्चरणकृत्येन विनैवाऽस्मै प्रसीदति ॥

इति वचनात् त्रिकालं पूजयेत् । पूजारम्भे ॐ शान्तिः शान्तिः शान्तिरिति त्रिवारमुक्त्वा श्रीनृसिंहपूर्वतापनीयोपनिषद्युक्तं -

ॐ भद्रं कर्ण्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवां स स्तनूभिर्व्यशेम देवहितं यदायुः ।१।
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यो मृत्युमृत्युः कस्मै देवाय हविषा विधेम ।२।

मन्त्रद्वयं पठित्वा पुनः शान्तित्रयमुक्त्वा वामभागे गुर्वादीन् नमस्कृत्य दक्षिणे नृसिंह शेषं, गणेशादीनपि पुरतः ॐ तप्तहाटककेशान्त इत्यादि मन्त्रेण नृसिंहं प्रणम्य प्राणायामत्रयं कृत्वा "सत्यज्ञानसुखेत्यादिनोक्तेनविधिना स्वस्य महाचक्रनाभि तथा तथाकार श्रीनृसिंहात्मतामात्मनो भावयेत् । ततः प्राञ्जलिः ॐ अस्य श्रीनृसिंहाऽनुष्टुभ् मन्त्रस्य विधिब्रह्मा प्रजापतिः ऋषिः,अनुष्टुप् छन्दः, श्रीभगवान् महामङ्गलेश्वरो लक्ष्मी नृसिंहो महाविष्णुः देवता, पुनः प्राञ्जलिः, उदात्तस्वरः, शुक्लवर्ण्णः, हं वीजं मुखे ईं शक्तिः वामस्तनोपरि,नृं इति दुष्टं कीलकं ज्ञातं स सिद्धेरप्रतिवारकं, इति दक्षिणाकुक्षौ न्यस्य, स नृसिंहप्रसादार्थे विनियोगः । ततोऽङ्गन्यासकर न्यासौ । प्रणवशक्तिपूर्वकं प्रथमपादं यथा - ॐ ईं उग्रं वीरं महाविष्णुं कूर्परादारभ्य दक्षिणकरेन्यस्य, तथैव द्वितीयपादं वामहस्ते, तृतीयपादं तथैव दक्षिणकरान्तः, चतुर्थपादं वामकरान्तश्च । ततः दक्षिणकरतलं वीजेन ॐ हं इति, वामकरतलं ॐ ईं इति शक्त्या संकीलयेत् । ततः तारादिपुटितमाद्यपादमङ्गुष्ठयोः न्यस्य इतरान् तान् तथैव तर्जनीमध्यमाऽनामिकासु समस्तं करतलयोः, एवमेवाऽङ्गन्यासः इति स्मार्त्तः । श्रौतस्तु - प्रणवशक्तिवीजसहितमूलमन्त्रस्य साम्ना द्विस्वरेण मिश्रसामान्तेन व्यापकन्यासं कुर्य्यात् । तथैव चतुर्भिः पादैः, मन्त्रपूर्वार्द्धेन, ततः मन्त्रोत्तरार्द्धेन द्विस्वरेणैव साम्ना अङ्गुलिकरतलपृष्ठन्यासं कुर्य्यात् ।

यथा - ॐ ईं, हं ततः पूर्ण्ण मन्त्रः ॥ तथैव षट्स्वरैः सामभिः महाचक्रेण यथा- ॐ क्ष्रीं (क्ष्रौं वा) पञ्चाङ्गन्यासं कुर्य्यात् । तत्र प्रथमपादस्य प्रणवोऽङ्गम्, द्वितीयपादस्य प्रणवहल्लेखादि श्रीवीजान्तो घृणिमन्त्रः । तृतीयपादस्य प्रणवपूर्विका यजुर्लक्ष्मीः । चतुर्थपादस्य प्रणवपूर्विका नृसिंहगायत्री । ततः प्रथमतः सामभिः व्यक्तमूलमन्त्राक्षरैः व्यापकं न्यसेदात्मानं शक्ती कर्त्तुम् । द्विस्वरमानुष्टुभं साम गायेत् । तच्च एवम् - सर्वत्र द्विस्वरसाम्नि द्वे द्वे अक्षरे उदात्तानुदात्तानुभ्यां गायेत् । प्रणवगानं - मात्रात्रयं प्रणवश्च एवं द्विरभ्यासेन यथा - अ उ म ॐ अ उ म ॐ ॥ शक्ति वीजे चतुरभ्यारोन, अभ्यासस्तु अष्टसंख्यापूरणाय, साम्नां साष्टाऽक्षराऽऽधारत्वात् । (तथाहि अत् ३४१ उ द्री ॐ सर्वेते अङ्गं योजनीयाः, अर्थवोधो न भवति ।) ग्रन्थवद् दर्शयामि - द्विस्वरसामविधानं प्रागुगतम् । म ॐ अ, अ उ उ, म ॐ अ इति प्रणवगानम् । ईं हां उ, इति शक्तिवीजे । प्रगाय उग्रां उ, वीरां अ, महां उ, विष्णुं अ इति प्रथमपादं गायेत् । ततः साङ्गं प्रणवं पूर्ववद् गीत्वा द्वितीयपादं ज्वलां उ, तं सा, अ र्वतो उ, मुखां अ गायेत्, ततः साङ्गं सावित्रीमन्त्रं ॐ तत् सवितुः, इत्यादि जपेत्, नतु गायेत् । यजुष्ट्वेनोक्तत्वात् । ऋग् उद्धृतं साम, इति न्यायात् । ततः तृतीयपादं नृसिं उ, हं भी अ, षणां उ, भद्रां अ नमा उ, म्यहं अ, ततो नृसिंहगायत्रीं उक्त्वा गायेत् । ॐ नृ उ, सिंहा अ, यवि उ, द्महे अ, बज्रा उ, नखा अ, यधी उ, महि अ, तन्नः उ, सिंहाः अ, प्रचो उ दयात् अ ॥ ततः मिश्रण साम । अ = अनुदात्तः, उ = उदात्तः, इति मन्ये । ईं आ उ, हं उ अ, ईं मा उ , हं ॐ अ, प्रणवस्य इदं मिश्रणसाम । ततः सामराजात्मकोऽहमिति परिभाव्य सकलीकृतीं भावयित्वा मम व्यापको न्यासः संपाद्यन्तामिति सर्वाऽङ्गव्यापकं कुर्य्यत् । तत्राऽग्रजं पर्वद्वयं अङ्गुष्ठाग्रेण कनिष्ठिकामूलपर्व स्पर्शेण उदात्ताऽनुदात्ताभ्यां गायेत् । सर्वत्र त्रि द्विस्वरे षट्स्वरे च षट् तिस्रश्चतस्रः पञ्च वा मात्राः प्रयोक्तव्याः । मात्राऽऽधिक्ये फलाऽऽधिक्यात् । पञ्चलघ्वक्षरं चाङ्गुलिमोक्षत्रयं जानुपरिवर्त्तनं वा मात्राया मानं । ततो द्विस्वरसाम्नामूलमन्त्रप्रथमपादं प्रणववीजशक्तिपूर्वं गायन् पुनः प्रणवं च प्रगाय

श्वेत वर्ण्णायानन्दात्मने अङ्गुष्ठाभ्यां नमः । यथा - ॐ ईं हां उग्रां उ, वीरां अ, महां उ, विष्णुं अ ॐ इति प्रगाय । ततः प्रणवशक्ति-वीजमुच्चार्य्य द्वितीयपादं गात्वा पुनः प्रणवं घृणि मन्त्रं उच्चार्य्य कृष्णवर्ण्णाय प्रीत्यात्मने तर्जनीभ्यां स्वाहा । ततः तथैव तृतीयपादं गात्वा यजुर्लक्ष्मीमुच्चार्य्य पिङ्गलवर्ण्णाय ज्योतिरात्मने मध्यमाभ्यां नमः । ततः चतुर्थपादं प्रगाय नृसिंहगायत्री मिश्रणसाम च गात्वा ॐ हेमवर्ण्णाय मायात्मने अनामिकाभ्यां नमः, ततः प्रणवशक्तिवीजपूर्वकं प्रथमपादं तदङ्ग प्रणवं च प्रगाय ततो द्वितीयपादं प्रगाय घृणिमुक्त्वा ॐ विद्युद्वर्ण्णाय ज्ञानात्मने कनिष्ठिकाभ्यां नमः । उभयकनिष्ठिकयोः नखध्वनिं कुर्य्यादिति संप्रदाय । ततः तृतीयपादं प्रगाय यजुर्लक्ष्मीमुक्त्वा ततः चतुर्थपादं नृसिंहगायत्रीं मिश्रणसाम च क्रमेण प्रगाय सर्ववर्ण्णात्मने करतलकरपृष्ठाभ्यां नमः । अत्र मध्यमाभ्यां वषट्. अनामिकाभ्यां हूं कनिष्ठाभ्यां वौषट् अस्त्राय फट् नमः स्थले भवेद् इति मन्ये ॥

॥ इति द्विस्वराऽनुष्टुप् सामविधानम् ॥

शेषकृतध्यानशतके -

* अथ षट्स्वरसाम्नापञ्चाङ्गोपास्तिः *

षट् स्वरसाम्नः लक्षणं यथा - उदात्तम्, आद्यद्वयत्रयं कृत्वा नीचैः तृतीयं त्वथतूर्य्यपञ्चमे । स्वरेणमध्ये न पुनस्तु षष्ठमुच्चैः मुनिपर्वताक्षरैः ।

तारं च शक्तिवीजे च मन्त्रं मन्त्राङ्गमेव च ।
षट्स्वरलक्षणं ह्येतत् ज्ञातव्यं पूर्वसूरिभिः ॥

अस्यार्थः - सप्तस्वरास्त्रयो ग्रामा मूर्च्छना स्त्वेकविंशतिः ।
तानान्येकोनपञ्चाशद् इत्येतत् स्वरमण्डलम् ॥

ग्रामाः - षड्जमध्यमगान्धारास्त्रयोग्रामाः प्रकीर्त्तिताः ।
भूर्लोकाज्जायते षड्जो भुवः लोकाच्चमध्यमः ॥
स्वर्गान्नान्यत्र गान्धारो नारदस्य मतं यथा ।
दारववीगात्रवीणे च द्वेवीणे गीतिजातिषु ॥
सामगे गात्रवीणा च तस्याश्च शृणु लक्षणम् ।

गात्रवीणा - गात्रवीणा हि सा प्रोक्ता यस्यां गायन्ति सामगाः ॥

स्वरव्यञ्जनसंयुक्त्या अङ्गुल्याङ्गुष्ठ राजिता ।
हस्तौ सुसंयतौ ध्यायौ जानुभ्यामुपरिस्थितौ ॥
गुरोरनुज्ञया कुर्य्याद् यथा गाने मतिर्भवेत् ।
प्रसार्य्य साङ्गुलीः सर्वाः रोपयेत् स्वरमण्डलम् ॥
सप्तस्वराः - यः सामगानां प्रथमः सर्वशो 'मध्यमस्वरः' ।
द्वितीयं स तु 'गान्धारः' तृतीयः'ऋषभः' स्मृतः ॥
चतुर्थः षड्ज इत्याहुः पञ्चमः पञ्चमो मतः ।
'धैवत'श्च भवेत् षष्ठः 'निषादः' सप्तमः स्मृतः ॥
प्रथमश्च द्वितीयश्च तृतीयश्च चतुर्थकः ।
मन्त्रः कृष्टो हूति स्तार एतान् कुर्वन्ति सामगाः ॥
अङ्गुष्ठस्योत्तमे कृष्टेऽङ्गुष्ठे हि प्रथमस्वरः ।
प्रादेशिन्यां तु गान्धारः ऋषभस्तदनन्तरम् ॥
अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः ।
तस्याऽधस्ताद् दोर्योन्यस्तः निषादं तत्र विन्यसेत् ॥
उच्चैर्निषादगान्धारौ नीच्चैः ऋषभधैवतौ ।
स्वरितप्रभवा एते षड्जमध्यम पञ्चमाः ॥

सप्तधा हि स्फुटस्वरः । तत्र तु अनिरपेक्षम् आद्यं, निरपेक्षमाद्यं, एतदनन्तरं हि प्रथमसिद्धप्रतिसिद्धत्वादुत्तरेषु द्वितीयतृतीयचतुर्थपञ्चमादयस्त्वप्रसिद्धेषु माऽपेक्ष्यः आद्यो भवतीति सर्वत्र प्रथमत्वेन कारणेन तं स्वरं निरपेक्षम् आद्यमाचक्षते । भवति चाब्राह्मणम् । तद् ह्यसौ कृष्टतम इव साम्नः स्वरः तं देवाः उपजीवन्ति । यो वरेषां प्रथम स्तं मनुष्याः, यो द्वितीयस्तं गन्धर्वाऽप्सरसः, यस्तृतीयस्तं पशवः, यश्चतुर्थ स्तं पितरः ये गण्डेषु शेरते, यः पञ्चमः तं असुराः, रक्षांसि, योऽन्त्यः (निषादः) तं ओषधयो वनस्पतयः यच्चान्यजगत् तस्मादाहुः सामैवाऽन्नमिति । किं कृष्टः प्राजापत्यो ब्राह्मणो वैश्वदेवो वा आदित्यानां प्रथमः साध्यानां द्वितीयः यस्तृतीयो वायोश्चतुर्थः सौम्यो मन्त्रो मित्रावरुणयोरतिस्पार्य्य इति । मन्त्रः अवरः पञ्चमः । नीचः (नीतः) अतिस्पार्य्यः (स्वार्य्यः) अन्योऽति नीतः (नीचः) निरपेक्षाद्यपेक्षया तु पञ्चम एव पञ्चम उच्यते । तथा च सप्तस्वरापेक्षमिदं वचनम् ।

मयूरो वदते षड्जं ऋषभं चातको वदेत् ।
अजा वदति गान्धारं क्रौञ्चो वदति मध्यमम् ॥
पुंस्य साधारणकाले पिको वदति पञ्चमम् ।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥

अत्र चाङ्गुष्ठोत्तम पर्वणः उच्चीभावेनैम्, वक्रीभावेनैकं तर्जनीमध्यमोपरि, कनिष्ठिका स्पर्शेनाऽवरं तन्मूलपर्वस्य स्पर्शेनाऽपरिमित्या समारभ्य तन्नीचक्रमेण सप्तस्वरान् उक्त्वा, भाष्यकारेणोक्तम् - एवं मुखहस्ताभ्यां षड्जादयो यथाक्रमं सप्तस्वराः निष्पद्यन्ते इति तेन मयूर वदते षड्जमित्यत्र निरपेक्षाद् यश्च षड्जः तद्वरोहक्रमेण च ऋषभादयः इति गम्यते । तत्र मूलमन्त्रप्रथमपादाक्षरेषु अष्टसु यथा - उग्रं वीरं महाविष्णुं । मुखस्वराभ्यां गानावलम्बिनीक्रियमाणेषु सत्सु यद् आद्यमक्षरद्वयं तद्वद् अङ्गुष्ठोत्तमपर्वोच्छ्रयेण मुखेन च प्रगाय मध्यमः तथैव मुखहस्ताभ्यां तृतीयमक्षरं "वी इति अक्षरं " कनिष्ठापर्वस्पर्शेन मुखेन च प्रगाय, अर्थात् धैवतः, चतुर्थपञ्चमे चैकैकमक्षरं पृथक् पृथक् यथा - रं, म, इति । अङ्गुष्ठेन तर्जन्याः स्पर्शेन, गान्धारः रं अक्षरं, तत्सन्निहिताङ्गुल्याः मध्यमायाः उपकनिष्ठिकायाश्च क्रमेण यः मध्यमपर्वस्पर्शः तेन, म अक्षरं मुखेन च ऋषभषड्जस्वराभ्यां । षष्ठमक्षरं हा इति अङ्गुष्ठोत्तम पर्वोच्छ्रयेण मध्यमेन स्वरेण इत्यर्थः मुखेन च प्रगाय, सप्तमाऽष्टमाक्षरद्वयं मिलिताकारेण यथा - विष्णुं इति । कनिष्ठिकामूलपर्वस्पर्शेन धैवतेन इत्यर्थः, मुखेन च प्रगाय इत्यन्तं यथा विहितस्वरैः गायन् तानेव यथा विहित स्वरान् दर्शयति । (अङ्गुलिस्पर्शगम्यस्वरात् भिन्नस्वरं अत्र दर्शयति । स्वराणां क्रमः - प्रथमस्वरः मध्यमः, २ - गान्धारः, ३ - ऋषभः, ४ षड्जः, ५ - पञ्चमः, ६ - धैवतः, ७ - निषादः ।) आद्याक्षरद्वयस्याऽऽद्यस्वरः, तृतीयास्याऽन्त्य स्वरः, चतुर्थपञ्चमाक्षरयो प्रत्येकं मध्यमाः परिशिष्टस्वराः । षष्ठस्याद्यस्वरः, सप्तमाऽष्टमयोरन्त्यस्वरः । तथैव मुखहस्ताभ्यां गायन् एव प्रथमपादे तृतीयषष्ठाक्षरयोः(वी, हा) दीर्घं, तदुच्चारणाऽवसरे कनिष्ठिकयाऽनामिकया च क्रमेण गृह्णीयात् । द्वितीयपादे षष्ठाक्षरं (तो)दीर्घं, मध्यमाऽनामिकया

ततद् उच्चारणावसरे गृह्णीयात् । तृतीयपादे च द्वितीयं (सिं) चतुर्थं (भीं) दीर्घम् उत्तराङ्गुलिभ्यां गृह्णीयात् । चतुर्थपादे च चतुर्थं (त्युं) षष्ठं (मा) दीर्घम्, उत्तराङ्गुलिभ्यां क्रमेण गृह्णीयात् । द्वितीयपादान्ते घृणिं, तृतीयपादान्ते यजुर्लक्ष्मीं जपेत् । प्रथमपादान्ते प्रणवं च, चतुर्थपादान्ते नृसिंहगायत्रीं गायेत् इति षट् स्वरलक्षणम् अत्राऽन्त्यस्वरः धैवतः, न नषिादः षट् स्वरलक्षणमित्युक्तत्वात् । षट्स्वर गानप्रकारस्त्वेवम् - ॐ, म, अ उ ३४५६ उ, सर्वत्र एव एवं चत्वारोऽङ्काः । मा आ, ॐ म, आं म, उ म, म ॐ अ, इति प्रणवगानम् । ईं हां उ, ईं आं हां म, ईं म, हं उ, ईं हां अ इति शक्तिवीजगानम् । ईं शक्तिः, हं वीजम् इति ।

अथ गानप्रकारेण सह षडङ्गन्यासः -

प्रथमतः प्रणवस्य, ततः शक्तेः, ततः वीजस्य षट्स्वरेण गानं कृत्वा "उग्रं वीरं महाविष्णुम्" इति मन्त्र प्रथमपादस्य गानं कृत्वा पुनः प्रणवं गायेत् । यथा प्रथमपादस्य - उग्रां उ, वी अ, रां म, मा म, हा उ, विष्णुं अ इति तृतीयषष्ठाक्षरग्रहणसहितं प्रथमपादं पूर्ववत् पुनः प्रणवं च षट्स्वरेण प्रगाय हृदि करतलं निधाय "ससागरां सपर्वतां ससप्तद्वीपां वसुन्धरां" इति पठन् अर्थानुसन्धानेन एतद्विशेषणविशिष्ट पृथ्वीलोकात्मकं मन्त्रसाम्नः आदिपादस्य परमेश्वरहृदयस्य च भावयित्वा, "अग्निर्देवा इदं सर्वं विश्वाभूतानि प्राणा वै पशवोऽन्नममृतं सम्राट् स्वराट् विराड्" इति जपन् एतद् विशेषणविशेषिताऽग्न्यात्मकत्वं, "तस्य ह वै प्रणवस्य या पूर्वामात्रा पृथिव्यकारः स ऋग्भिः ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः" इति जपन् एतद् विशेषित प्रणवमात्रात्मकत्वं "जागरितस्थानवह्निः प्रज्ञः सप्ताङ्ग एकोनविंशाति मुखः स्थूलभुग् वैश्वानरः प्रथमपाद" इति जपन् एतद् विशेषित जाग्रद् अवस्थावच्छिन्न विश्वात्मकं परिभाव्य प्रणवशक्तिवीजपूर्वकं प्रथमपादं अनुग्राहकत्व-रमयित्व-व्यापकत्वाऽर्थानुसन्धानेन आनन्दात्मने श्वेतवर्ण्णाय हृदयाय नमः इति हृदये न्यसेत् । ततो द्वितीयपादं षट्स्वरेण गायेत्, "ज्वलन्तं सर्वतो मुखम्", ज्वलं उ, तं अ, स म, र्व म, तो उ, मुखं अ। इति षष्ठग्रहणसहितं गात्वा शिरसि पल्लवाकृतिं करं निधाय यक्षगन्धर्वाऽप्सरो

गणमन्तरिक्षलोकात्मकत्वं स्वशिरसि भावयित्वा "ऋग्यजुस्सामाऽथर्वरूपः सूर्य्योऽन्तरादित्यो हिरण्मयः पुरुषः एतद् विशेषितसूर्य्यात्मतां परिभाव्य द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भि यजुर्वेदः विष्णुरुद्रास्त्रिष्टुव् दक्षिणाग्नि" इति जपन् "तारद्वितीयमात्रा यजुर्वेदविष्णुरुद्रास्त्रिष्टुव् दक्षिणाऽग्नि रूपतां च स्वप्नस्थानोऽन्तः प्रज्ञः सप्ताङ्ग एकोनविंशति मुखः प्रविविक्तभुग् तैजसो द्वितीयपादः" इति जपन् स्वप्नावस्थावच्छिन्नोऽन्तरविशेषणविशिष्ट तैजसात्मकतां परिभाव्यज्ञानवाहकत्व-सर्वज्ञत्वाऽर्थाऽनुसन्धानेन द्वितीयपादं घृणिं च उच्चार्य्य उं प्रियात्मने कृष्णवर्ण्णाय शिरसे स्वाहा" इति शिरसि न्यसेत् । "स इं पाहि यरुती पीतरुतश्रियं लक्ष्मी मौपलाम्विकां गां षष्ठी च यामिन्द्रसेनेत्याहुः तां विद्यां ब्रह्मयोनिस्वरूपामिहाऽशेषरमणमहं प्रपद्ये" इति जपन् हेमाऽमृतकलशैः सप्तभिः शक्तिभिरभिषिच्यमानं शिरोऽङ्गं भावयेत् । अथ तृतीयपादं गायेत् "नृसिंहं भीषणं भद्रम्" इति । नृसिं उ, हं अ, (हां अ, वा) सर्वत्र अं स्थाने मन्त्रे आ विद्यते । भीं म, षां म, णां उ, भद्रां अ इति द्वितीय चतुर्थाक्षरग्रहणसहितं (सिं, भीं इति) तृतीयपादं गात्वा शिखायामावद्धमुष्टिं अङ्गुष्ठं नीत्वा "वसुरुद्राऽऽदित्यैः सर्वैः देवैः सेवितं दिवम्" इति जपन् द्युर्लोकात्मकतां सामाऽनुष्टुप् तृतीयपादस्य परमेश्वरशिखायाश्च परिभाव्य "य ओषधीनां प्रभवति तारापतिः सोम" इति जपन् सोमात्मकतां परिभाव्य "तृतीया द्यौः स मकारः, स सामभिः सामवेदः रुद्रादित्या जगत्याऽऽहवनीयः" इति जपन् एतद् विशेषणविशिष्ट तृतीयमात्रात्मतां परिभाव्य यत्र सुप्तो न किंचन कामं कामयते, न किंचन स्वप्नं पश्यति, सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवाऽनन्दमयोऽ-त्यानन्दभुक्, तेजो सुखः प्राज्ञस्तृतीयपाद एष सर्वेश्वर एष सर्वज्ञः, एषोऽन्तर्य्यामी, एष योनिः सर्वस्य प्रभवोऽयं हि भूतानां, इति जपन् सुषुप्तावस्थावच्छिन्नैकीभूतादिविशेषिता प्राज्ञात्मतां च पूर्वोदितानां च परिभाव्य तेजः श्रैष्ठ्यशत्रुभयहेतुत्व भक्तसुखयितृत्वरूपार्थाऽनुसन्धानेन मूलमन्त्र-तृतीयपादं तदङ्गं यजुर्लक्ष्मीं च उच्चार्य्य मं ज्योतिरात्मने पिङ्गलवर्ण्णाय शिखायै वषड् इति न्यसेत् । ततश्चतुर्थपादं गायेत् । " मृत्युमृत्युं नमाम्यहं " । मृत्युं

उ, मृं अ, त्युं म, नां म, मां उ, म्य हां अ, इति द्वितीयचतुर्थ षष्ठाक्षर ग्रहण सहितं चतुर्थपादं प्रगाय सामाङ्गनृसिंहगायत्रीं गायेत् । यथा - ॐ नृं उ, सिं अ, हां म, यं म, विं उ द्महे अ, बज्रां उ, नां अ, खां म, यां म, धीं उ, महिं अ । तन्नां उ, सिं अ, हाः म, प्रा म, चो उ, दयात् अ ॥ अथ मिश्रण साम - ईं आं ओ, हां अ, उ म, ईं म, मा उ, हं ॐ अ । ३४५६ इति मिश्रणसाम च प्रगाय हस्तौ स्कन्धयोः निधाय ब्रह्मस्वरूपं निरञ्जनं परमव्योम्निकं इति जपन् सामानुष्टुप् चतुर्थपादस्य परमेश्वरकवचस्य च ब्रह्मलोकात्मतां परिभाव्य ब्रह्मस्वरूपमिति ब्रह्मलोकसाहचर्य्यात् स ब्रह्म स हरिः, स शिवः, स इन्द्रः, सोऽग्निः, सोऽक्षरः, परमस्वराड् इति जपन् ब्रह्माद्यात्मकपरमात्मतां परिभाव्य "याऽवसानेऽस्य चतर्थ्यर्द्धमात्रा सा सोमलोक ॐकारः । स आथर्वणैः मन्त्रैः अथर्ववेदः, "सम्वर्त्तकोऽग्निर्मरुत विराडेकर्षिभास्वतीतिजपन् सोमलोकः ॐ कारवाच्यः परमात्माथर्वणमन्त्रवहुलोऽथर्व वेदः", सम्वर्त्ताऽग्निमरुद् विराडेकर्षिभास्वद् रूपतादात्मकप्रणवचतुर्थमात्रात्मकतां नाऽन्तः प्रत्नं न वहिः प्रज्ञं नोभयतः प्रज्ञं ना प्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्य-मव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवद्वैतं चतुर्थं मन्यन्ते । स आत्मा स विज्ञेय इति जपन् तूर्य्यावस्थाऽवच्छिन्न वहिः प्रज्ञत्वादन्यात्मक-तूरीयात्मकतां मन्त्रसाम्नः चतुर्थपादस्य परमेश्वरकवचस्य च भावयित्वा भक्तमृत्युपमृत्यु मारकत्वसर्वनमस्कार्य्यत्व नृसिंहरूपत्वाऽर्थानुसन्धानेन मन्त्रचतुर्थ पादं वीजशक्ति तारान्तं साङ्गं नृसिंहगायत्रीं च उच्चार्य ॐ मायात्मने हेमवर्णाय कवचाय हूमिति सर्वाङ्गे हस्ताभ्यां कवचेन न्यसेत् । तत्र चतुर्ण्णामपि चरणानामाद्याऽक्षरद्वयाधारं साम क्षीरोदार्ण्णवशायिनृकेशरि योगिध्येय परमपदत्वविशिष्टा श्री नृसिंहाधारतया प्रधानतया चोङ्कारवाच्य सत्यपरमब्रह्मपुरुषनृकेरिविग्रह कृष्णपिङ्गलोद्ध्वरितस्क विरूपाक्षशङ्कर-नीललोहतोमापति पशुपति पिनाक्यमितद्युति सर्वेश्वरसर्वमूर्त्तेश्वरा-थर्ववेदाधिपति हिरण्यगर्भाधिपति यजुर्वेदप्रतिपाद्यत्वविशिष्ट श्रीनृसिंहाधारतया तृतीयाक्षरद्वयाधारगतं सामपूर्वोक्त क्षीरोदार्ण्णवशायिन-

मित्यादिविशिष्ट-श्रीनृसिंहाधारतया गायन्नेव भावयेत् । संक्षेपपक्षे तु - सपरिकर भूर्लोकोऽग्र्यकारः जाग्रदवस्था विश्वात्मा मन्त्रसाम्नः आदिपादः, परमेश्वरस्यहृत् । सपरिकराऽन्तरिक्षहिरण्मयपुरुषोकारः स्वप्नावस्था तैजसो द्वितीयपादः शिर इति विशेषः । स परिकरद्युलोक सोममकारः सुषुप्तावस्था प्राज्ञः तृतीयपादः शिखा । सपरिकर ब्रह्मलोक परमात्मा प्रणवानन्द तूरीयावस्था चतुर्थपादः कवचमिति परिभाव्य न्यसेत् । अथ प्रत्यग्चैतन्यं महाचक्राख्यं पञ्चममस्त्राङ्गमुच्यते पञ्चममङ्गमस्त्रम् । ततः महाचक्राख्यं सुदर्शनाख्यमेव, तस्योपासना व्यतिरेकेण न्यासो न सम्भववतीति तल्लिख्यते ।

* अथ महाचक्रोपासना *

साङ्गाश्चतुर्वेदाश्चतस्रः प्रणवमात्राः चतस्रोऽवस्था श्चतुरात्मानश्च मन्त्रसाम्नः चरणचतुष्टयरूपत्वेन परमेश्वरस्य च अस्त्ररूपतया भावयित्वा श्रीनृसिंहरूपस्यात्मन उत्तराधरभावेन स्थितं महाचक्राख्यं ध्यात्वा तन्नाभिवर्त्तिक्षीरसागर मध्योल्लासित श्वेतद्वीपस्थकल्पतरुवनमध्यराजद् दिव्यप्रसादमध्यविलसत् सिंहासनोल्लसच्छेषाङ्काऽऽसीनस्य श्रीनृसिंहस्य पुरतो वसवोऽष्टावीणानताः कं, खं, गं, घं, ङं, चं, छं, जं इति (अष्ट) ध्रुवोऽध्वरसोमावाख्याऽनिलाऽनलप्रत्युषविभासनाम्ना नमोऽन्ततया करसंज्ञया न्यस्तव्या वसवः । ॐ कं ध्रुवाय नमः, एवं यथाक्रमं शेषे ॐ जं विभासाय नमः, इति (अष्ट) ततो दक्षिणतो वीरभद्र शम्भु गिरीशाऽजैकपादाऽहिर्वुध्न्यपिनाक्यपराजितभुवनाऽधीश पालिस्थाणु भवाः एकादशरुद्राः झादिधान्तवर्ण्णरूपाः तेन तेन तन्नाम्ना नृसिंहाय नमः इति प्रत्येकमुच्चार्य्य न्यस्तव्याः । यथा - ॐ झं वीरभद्राय नृसिंहाय नमः । ॐ ञं शम्भवे नृसिंहाय नमः, इत्यादि, ततः द्वादश आदित्याः पश्चात् नादि षान्तैः वर्ण्णैः न्यस्तव्याः । धाताऽर्यमामित्रवरुणांऽशु भगविश्वस्वर् पूषापर्जन्य-त्वष्टृविष्णवः, स्वस्वनाम्नाचतुर्थ्यन्तेन पूर्ववत् । यथा - ॐ नं धात्रे नृसिंहाय नमः इत्यादि । उत्तरतः सं, हं, लं, क्षं, सं हं, इत्येवं दशविश्वेदेवाः, क्रतुदक्षौ,

सत्यवसू, धूरिकोचनौ, पुरुरवमाद्रवसौ, कालकामौ युग्मकतया पूर्ववत्, सर्वत्र तद्वर्ण्णान् आदौ पठित्वा तत् तद् देवतानाम चतुर्थ्यन्ततया नृसिंहाय नमः इत्यन्ते । यथा – ॐ सं क्रतुदक्षाभ्यां श्रीनृसिंहाय नमः, अथवा ॐ सं क्रतुदक्षनृसिंहाय नमः । सव्यपार्श्वे सूर्य्याय, दक्षिणे च ॐ सोमाय नृसिंहाय नमः इति पार्श्वयोः । तथैव पार्श्वयोः (अग्रे पृष्ठपार्श्वे च) हृल्लेखागमौ दुर्गागणपती, नाभ्यां तारमात्रास्तिस्रो विन्यस्य यथा – अं, उं मं इति, अत्र रक्तनीलश्वेतवर्ण्णा ब्रह्माविष्णुमहेश्वराः । अं ब्रह्मणे, उं विष्णवे, मं महेश्वराय, नृसिंहात्मने नमः इति सर्वत्र । हृदितारपुटितं एकाक्षरवीजं न्ययसेत् । यथा – ॐ हं ॐ । ततः प्रथमाऽऽवरणे षट्दलेषु सहस्रार हूं फट् इति प्रतिवर्ण्णं विन्दुयुक्तं यथा – सं, हं, स्रां, रं । ऊर्द्ध्वकरद्वयधृतचक्राक्ताऽनासक्ताः कृतकरपुटा अलंकृताः सुदर्शनमूर्त्तीः अष्टौ विचिन्त्य सर्वत्र "सुदर्शनाय नृसिंहाय नमः" इति न्यस्तव्यम् । तच्चक्रम् ईम् इति अन्तर्मायया वेष्टितं ध्यातव्यम् । ततो द्वितीयाऽऽवरणम् – अत्र अष्टदलपद्मं, तत्र अष्टाक्षरनारायण मन्त्रं दलाष्टके नारायणाष्टमूर्त्तीः धृतशङ्खचक्रगदाः, ऊर्द्ध्वकराः, संपुटितकराः, विन्यस्य मन्त्रस्य प्रतिवर्ण्णं गायत्रीछन्दो वुद्ध्या सर्वत्र नारायणाय नृसिंहाय नमः, इति पूर्ववत् । ततः तृतीयाऽऽवरणे द्वादशदलपद्मे द्वादशाक्षरवासुदेव-मन्त्रवर्ण्णान् द्वदशदलेषु विलिख्य प्रतिवर्ण्णं तथैव धृतचक्रपिनाकोर्द्ध्वकराः संपुटिताऽधः कराः द्वादशवासुदेवमूर्त्तीः वासुदेवाय श्रीनृसिंहाय नमः इति जगती छन्दोवुद्ध्या इदं द्वयं "हीम्" इति वह्निर्मायया वेष्टितं ध्यातव्यम् । ततः चतुर्थाऽऽवरणे षोडशदलविशिष्टे प्रत्येकं विन्दुयुक्ताः षोडशस्वराः, तेषु केशवादिषोडशमूर्त्तयः, चक्रपिनाकोर्द्ध्वकराः, संपुटिताऽधः कराः, जान्वाशक्ताः मन्तव्याः, सर्वत्र नृसिंहाय नमः इति । यथा ॐ अं केशवाय नृसिंहाय नमः । ततः पञ्चमाऽऽवरणे द्वात्रिंशद् दलपद्मे मन्त्रराजः । द्वात्रिंशत् सु पत्रेषु प्रतिवर्ण्णं लोकत्रयीं परिभाव्याऽन्तर्मायया वेष्टयित्वा विन्दुयुक्तं, तेषु च द्वात्रिंशद् व्यूहदेवान् विचिन्त्य, ते च यथा – ब्रह्माविष्णुमहेश्वर-पुरुषेश्वरसरस्वती श्री गौरीप्रकृतिविद्याः, ॐ कार चतस्रोर्द्धमात्राः, वेदाः,

साङ्गाः, सशाखाः, पञ्चाम्नयः, सप्तव्याहृतयः, अष्टौ लोकपालाः, अष्टौ वसवः, रुद्राः, आदित्याः, अष्टौ महाग्रहाः, पञ्चमहाभूतानि, कालः, मनुः, यमः, अन्तकः, मृत्युः, प्राणः, सूर्य्यः, सोमः, विराट् पुरुषः, जीवः, सर्वम् इति मूर्त्तिदेवाश्चिन्तनीयाः । ॐ नमो भगवते ब्रह्मणे श्रीनृसिंहाय नमः, इति एवं सर्वत्र केवलं " ब्रह्मणे " इत्यत्र विष्णवे इत्यादि योजयेत् । ॐ नमो भगवते विष्णवे, श्रीनृसिंहाय नमः । एवं विन्यस्य ध्यायेत् । अत्र वेदवुद्ध्या अनुष्टुप् छन्दोवुद्धिं परिभाव्य वह्निमाययावेष्टितं चिन्तयेत् । अत्र पत्राणि त्रिकोणानि, नालदण्डाश्चाऽऽराः इति ज्ञेयम् । ॐ नमोभगवते जीवाय श्रीनृसिंहाय नमः । इत्यन्तं विन्यस्य ध्यायेत् । ततः प्रणवशक्तिवीजादिमन्त्रराजं वीजशक्तिप्रणवान्तं यथा – ॐ ईं हं, हं ईं ॐ, स प्रणवं च सुदर्शनमन्त्रं च उच्चार्य्य सर्वदेववेदात्मक महाचक्राऽग्र्यात्मने विन्दुवर्ण्णाय सत्यात्मने अस्त्राय फट्, इति तर्जन्यङ्गुष्ठस्फोटिकया दिक्षु न्यसेत् । एतन्महाचक्रं पञ्चममङ्गम् । पूर्वहृदयादि चतुष्टयाङ्गव्यापकम् । अतएव नेत्रवर्जितम् इदं पञ्चाङ्गम् । परस्परसम्वन्धम् उपास्यं नैकमपि त्याज्यम् । श्रुतौ व्यतिषक्ता इति । अथ ध्यानम् – सत्यज्ञान इत्यादि साधारणध्यानमुक्तम् ।

* अथ त्रिकालध्यानम् *

महाचक्रस्य नाभ्यां तु चिन्तयेत् क्षीरसागरम् ।
क्षीरसागरमध्यस्थं श्वेतद्वीपं विचिन्तयेत् ।१।
तन्मध्ये च महादिव्यं प्रासादं रत्ननिर्मितम् ।
प्रासादमध्यं चन्द्राभं सिंहासनमथोत्तमम् ।२।
तस्योपरि महानागं शेषाख्यं फणिमण्डितम् ।
तदाऽऽसनगतं देवं तत्फणैर्व्याप्तमस्तकम् ।३।
पूर्णेन्दुकोटिप्रतिभं नीलकण्ठं त्रिलोचनम् ।
वालेन्दुमण्डितसटं कुण्डलाभ्यां विराजितम् ।४।
अनेकरत्नखचितं मुकुटेन च शोभितम् ।
काञ्च्यङ्गुलीयनूपुरवलयाऽङ्गदभूषणैः ।५।

वरदाऽभयहस्तं च चक्रहस्तं पिनाकिनम् ।
सर्वाङ्गसुन्दरं देवं सर्वाभरणभूषितम् ।६।
स्रष्टारं सर्वजगतां त्रातारं सर्वकामदम् ।
तारैकाऽक्षरमध्यस्थं नृसिंहं दिव्यरूपिणम् ।७।
योगपट्टाऽऽसनस्थं च महामयेश्वरं विभुम् ।
वामभागाऽश्रितां देवीं नीलकुञ्चितमूर्द्धजाम् ।८।
हेमाऽरविन्दप्रतिभां मौक्तिकाऽऽभरणोज्ज्वलाम् ।
दाडिमं सव्यहस्तेन दक्षेनाऽऽलिङ्ग्य सत्पतिम् ।९।
देवस्याऽभिमुखीं ध्यायेद् भक्ताऽभीष्टाफलप्रदाम् ।
लक्ष्म्याद्याः शक्तयो देवं वीजयन्त्यः समन्ततः ।१०।
लावण्याऽमृततोयेन सिञ्चन्त्य इव सर्वतः ।
शक्तिभिर्मदरक्ताभिः सर्वतः परिवारितम् ।११।
यक्षपन्नगगन्धर्व-विद्याधरवधूगणैः ।
सचामरैर्व्यज्यमानं लक्ष्म्यादिभिश्च शक्तिभिः ।१२।
गायन्तीभिः स्तुवन्तीभिः नृत्यन्तीभिश्च सेवितम् ।
सनकाद्यैयोगसिद्धैः ब्रह्मेशादि (द्यैः)सुरोत्तमैः ।१३।
दक्षेतिग्मद्युतिः चैव हिमांशुर्वामतः स्थितं ।
वेदैः साङ्गैर्मन्त्रवरैः स्तूयमानं मुदान्वितम् ।१४।
गीयमानं सुदेवेशं सामगैर्ब्रह्मवादिभिः ।
आयुधप्रवरैश्चैव मूर्त्तिमद्भिरुपासितम् ।१५।
षड्भिः सुतर्शनैरन्तर्मायया समलंकृतम् ।
अष्टद्वादशपत्रस्थैः सेवितं परयामुदा ।१६।
नारायणैर्वासुदेवैः वेष्टितं वाह्यमायया ।
मातृकाभिः षोडशभिः तथाऽन्तर्मायया वृतम् ।१७।
द्वात्रिंशद्भिः नृसिंहैश्च वेष्टितं वाह्यमायया ।
वसुभिरुद्रैरादित्यैः विश्वेदेवैर्यथाक्रमम् ।१८।

सर्वाऽऽपत्तारकं चक्रं कालाऽनलसमप्रभम् ।
ऐवं नृसिंहचक्रस्थं सकृद्ध्यायति योनरः।१९।
आचष्टे तारकं ब्रह्म कृपालुः परमेश्वरः ।
सर्वाऽऽपद्भ्योविमुच्येत मृत्युं जयति दुस्तरम् ।२०।
ऐहिकाऽऽमुष्मिकान् भोगान् प्राप्नोत्यव्याहतान्नरः ।
य इदं परमं गुह्यं नृसिंहध्यानमुत्तमम् ।
पठत्यनुदिनं भक्त्या नृसिंहत्वमवाप्नुयात् ।२१।

॥ इति शेषकृतं ध्यानशतकम् ॥

* अथ पुरश्चरणोपासनोच्यते *

तत्राऽऽदौ पुष्पाञ्जलि मन्त्राः । तत्र संग्रहः, चतुर्थ्यन्तनामधेयैः ब्रह्मादिभिः सह श्रीनृसिंहाय नमः इति पदद्वयाऽन्ते महाचक्रवर्त्तिनः ब्रह्मादि द्वात्रिंशद् व्यूहदेवान् प्रत्येकं मानसपुष्पाञ्जलिनोपासीत । तच्चैवं - ॐ उं ॐ, ॐ नमोभगवते ब्रह्मणे श्रीनृसिंहाय नमः । पुष्पाञ्जलिं समर्पयामि । ॐ ग्रं ॐ, ॐ नमो भगवते विष्णवे श्रीनृसिंहाय नमः । इति विष्ण्वादिनाम योजनेन द्वात्रिंशन्मन्त्राः । अथ मूलव्यूहे ॐ ईं हं उग्राय नृसिंहाय नमः पुष्पाञ्जलिं समर्पयामि । एवं मन्त्रस्थादि नवभिः पदैः । एवं ॐ ईं हं उग्रं वीरं महाविष्णुम् इति चतुर्भिः पादैः । एवं प्रणवशक्तिवीजपुटितेन मूलमन्त्रेण श्री नृसिंहाय पुष्पाञ्जलिं दद्यात् । विस्तरस्त्यक्तः ।

* अथ नमस्कारमन्त्राः *

ॐ ईं हं उग्रं श्रीनृसिंहं नमाम्यहम् । एवं एकादशभिः पदैः चतुर्भिः पादैः समस्तेन च मूलव्यूहे षोडशनमस्काराः । एवं ॐ ईं हं उग्रं हं ईं ॐ ब्रह्मादिद्वात्रिंशद् व्यूहात्मकं श्रीनृसिंहं नमाम्यहम् । इति वीजादि पदैः सह पुनर्योजनेन पूर्ववत् षोडशनमस्काराः । अथ पञ्चव्यूहे ईशानादि देवाः - ब्रह्मादि नृसिंहव्यूहानां लक्षणानि स्थले एतत् सर्व विद्यते । अत्र दृष्टान्तमात्रम् - ॐ उं ॐ, ॐ यो वै नृसिंहो देवोभगवान् यश्च ब्रह्मा तस्मै वै नमो नमः । नृसिंहमन्त्रस्य

शेषाक्षरं 'हं' यावत् , केवलं देवानां लिङ्गवचनपरिवर्त्तनं यत् तद् शब्दस्थले भवष्यिति । यथा - या च सरस्वती तस्यै, ये पञ्चाग्नयः तेभ्यः इत्यादि । अथाऽभेदस्य प्रतिपत्तये स्तुतिमन्त्राः - ॐ उग्रं सच्चिदानन्दपूर्णं प्रत्यक् सच्चिदात्मानं श्रीनृसिंहं परमात्मानं परं ब्रह्माऽहं नमामि । एवमेव वीरादिपदादानेन सन्मन्त्रनवकम् । (अत्र प्रत्यक् सच्चिदानन्दाऽनन्तात्मानं भविष्यति) ॐ उग्रं सच्चिदानन्दपूर्णं प्रत्यक् चिदाऽऽत्मानं श्रीनृसिंहं परमात्मानं परं ब्रह्माऽहं नमामि एवमेव वीरादिपददानेन चिन्मन्त्र नवकम् । ॐ उग्रं सच्चिदानन्दपूर्णं प्रत्यगाऽऽनन्दाऽऽत्मकं श्रीनृसिंहं परमात्मानं परंब्रह्माऽहं नमामि । एवं पूर्ववत् आनन्दमन्त्रनवकम् ॐ उग्रं सच्चिदानन्दपूर्णं प्रत्यगनन्तात्मानं श्रीनृसिंहं परमात्मानं परं ब्रह्माऽहं नमामि, इत्यनन्तमन्त्र नवकम् । ॐ उग्रं सच्चिदानन्दपूर्णं प्रत्यगात्मानं श्रीनृसिंहं परमात्मानं परंब्रह्माऽहं नमामि । इत्यात्ममन्त्रनवकम्, इति पञ्चचत्वारिंशन्मन्त्राः । संक्षेपपक्षेतु - सपूर्व प्रत्यक् पदानन्तरं सच्चिदानन्दानन्तात्मत्वरूप-पदपञ्चकप्रक्षेपेण पठनीयम् । तद् यथा- ॐ उग्रं सच्चिदानन्दपूर्णं प्रत्यक् सच्चिदानन्दानन्तात्मानं श्रीनृसिंहं परमात्मानं परंब्रह्माऽहं नमामि इति एवं तारशक्तिवीजादिः, वीजशक्तितारान्तः समग्रं च उच्चार्य्य सच्चिदानन्दपूर्णं प्रत्यक् सच्चिदानन्दात्मानं श्रीनृसिंहं परमात्मानं परमानन्दोऽहं नमामि । एवं सच्चिदानन्दादि पदैः मूलमन्त्रस्य एकादशभिः पदैः चतुर्भिः पादैः समग्रेण च एवं षोडशस्तुतिमन्त्राः । एवमहरहः स्तुवीत । अशक्त्या अनन्तरैः षोडशभिः मन्त्रैरपि स्तुतिः कार्य्या इति । पुरश्चरणोपासना ।

❋ अथ प्रधानोपासना ❋

इत्थं नमस्कारान् विधाय श्रीनृसिंहमानसतोषम् आपदतलमस्तकं ध्यात्वा बक्ष्यमाणपीठपूजापुरःसरं मानसोपचारान् मानस व्यूहद्धयाय प्रकल्पयेत् ।

ब्रह्मानन्द समुत्थितं ज्ञानानन्दसमन्वितम् ।
ऐश्वर्य्याऽष्टदलोपेतं परं वैराग्यकर्णिकाम् ॥

तस्मिन् पीठे चिदात्मानं श्रीनृसिंहस्वरूपिणम् ।
पञ्चवर्ण्णात्मिका शक्तिः विन्द्वाख्या समुदाहृता ॥
नादरूपे हि वैष .... संहृत्यानुचिन्तनम् ।
आत्मनस्तत्त्वचिन्ताऽत्र तस्याऽप्याऽऽत्मानुचिन्तनम् ॥
उभयोरैक्यचिन्ता च तद्भावान् तर्कमातरम् ।
मनसा उचितैः द्रव्यैः चन्दनाद्यैर्मनोरथैः ॥
अर्च्चयेत् देवदेवेशम् आन्तरं तद्द्वितीयकम् ।
आन्तरं द्विविधं प्रोक्तं न्यासिनामिहयोगिनाम् ॥
अन्येषां तु समाख्यातम् आद्यमाभ्यन्तरं तथा ।
मानसैः कुसुमैरर्च्चा सात्विकी सा शुभा मता ॥
अनिर्माल्या परा शुद्धा सा यदा सच्चिदा शुभा ।
तस्मात् सर्व प्रयत्नेन मानसं यजनं ध्रुवम् ॥
आदावेव प्रकर्त्तव्यं पश्चाद् द्रव्यैः सुविस्तरैः ।

अत्र प्रथमं तावत् पञ्चमहाविभूतिवीजैः परमेश्वराय पञ्चोपचारान् कुर्य्यात् । तथाहि ॐ लं पृथिव्यात्मने गन्धतन्मात्रप्रकृत्यात्मने घ्राणेन्द्रियात्मने श्रीनृसिंहाय गन्धं कल्पयामि । ॐ हं आकाशात्मने शब्दतन्मात्रप्रकृत्यात्मने श्रोत्रेन्द्रियात्मने श्रीनृसिंहाय पुष्पं कल्पयामि नमः । ॐ यं वाय्वात्मने स्पर्शतन्मात्र प्रकृत्यात्मने त्वगिन्द्रियात्मने श्रीनृसिंहाय धूपं कल्पयामि, नमः । ॐ रं अग्न्यात्मने तेजोरूपात्मने इत्यर्थः, रूपतन्मात्रप्रकृत्यात्मने चक्षुरिन्द्रियात्मने श्रीनृसिंहाय दीपं प्रकल्पयामि, नमः । ॐ वं जलात्मने रसतन्मात्रप्रकृत्यात्मने जिह्वेन्द्रियात्मने श्रीनृसिंहाय षड्रसोपेतं नैवेद्यं प्रकल्पयामि, नमः । इति मानसपञ्चोपचारान् कृत्वा प्रणव (ॐ) शक्ति (ईं) वीज (हं) पूर्वं मूलमन्त्रं अङ्गरहितं मिश्रसामान्तं पूर्ववद् द्विस्वरेण प्रगाय क्षीरोदार्ण्णवशायिने श्रीनृसिंहाय त्रिनेत्राय चक्रपिनाकाऽभयवरदहस्ताय उग्राय वीराय महाविष्णवे ज्वलते सर्वतो मुखाय नृसिंहाय भीषणाय भद्राय मृत्युमृत्यवे नमस्कार्य्यात्मने आत्मनं प्रकल्पयामि नमः । पुनस्तथैव मन्त्रगानं कृत्वा ब्रह्मादिद्वात्रिंशद् व्यूहात्मकाय क्षीरोदार्ण्णवशायिने इत्याद्युक्त्वा आसनं

कल्पयामि नमः इत्यादि सर्वेषु उपचारेषु प्रत्युपचारं ज्ञेयम् । चतुःषष्टिद्वात्रिंशत् षोडशदशसप्तपञ्चोपचाराः कल्पयेत् । संक्षेपपक्षेतु - तार शक्तिवीजपूर्वकं वीजशक्ति तारान्तं तारं ॐ इति गीतिरहितं मूलमन्त्रम् उच्चार्य्य क्षीरोदार्ण्णवशायिने इत्याद्युक्त्वा व्यूहद्वयमध्ये उपचारान् कल्पयेत् । स्वहृदि ब्रह्माण्डादपि विपुलतरं विविधमालावितानादि संपर्ण्णं तेजोमयं लोकं ध्यात्वा तन्मध्ये ध्यानश्लोकोक्तलक्षणं मूलनृसिंहव्यूहं ब्रह्मादिनृसिंहांश्च मानसैरावाहनादिभिरुपचारैरुपासीतेति । संक्षेपोऽयम् - आवाहनाऽऽसन-निवेदनस्वागतस्नपनप्रोञ्छन मुखवास वस्त्रदान यज्ञोपवीतभूषण गन्धमाल्यधूपदीप नैवेद्याऽऽचमन नीराजन होमोत्तराचमनव्यजनदर्पणनृत्य-गीतवाद्यादिकान् अन्यांश्चराजोपचारान् कृत्वा मन्त्रेण पुष्पाञ्जलिं दत्त्वा मनसा प्रदक्षिणान् प्रकल्प्य दण्डवन्नमस्कृत्य प्रार्थयेत् । तत्र होमस्तु एवमेव-सर्वं मानसम् । आधारकुण्डे अर्थात् मूलाधारचक्रे चिदग्नौ प्रणवोद्दीपिते द्रुतचन्द्रमण्डलाऽमृतेन स्वाहान्तमन्त्रमुच्चार्य्य मनसा श्रुचा सुषुम्ना वर्त्मना नियम्य इन्द्रियप्रवृत्तीः जुहोम्यहम् इति ज्वलज्जुहूयात् । प्रार्थना चैवम् -

साधु वाऽसाधु वा कर्म यद् यदाऽऽचरितं मया ।
तत् सत्येन गृहाणाऽत्र कृपया जगदीश्वरः ।
पूजाहोमादिकं देव ! कृतं यत् त्वदनुग्रहात् ।
तेन तत्कर्मणा देव ! प्रीतो भव जगत्पते !
श्रीनृसिंहाय शान्ताय सगणायाऽऽदि हेतवे ।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर ।

इत्याऽऽत्मानं तेजोमयं सर्वमात्मीयमात्मानं च देवाय समर्प्य स्वयं सर्वकारणमहाविष्णुरूपेण पूर्णसच्चिदानन्दब्रह्मस्वरूपेण वा कीयन्तं कालं अवतिष्ठेत् ।

अच्युतोऽहमनन्तोहं गोविन्दोऽहमहं हरिः ।
आनन्दोऽहमशेषोऽहमजोऽहमृतोऽस्म्यहम् ।१।
नित्योऽहं निर्विकल्पोऽहं निराकारेऽहमव्ययः ।
सच्चिदानन्दपूर्ण्णोऽहं नित्यमुक्तस्वभाववान् ।२।

अक्षरोऽहमचिन्त्योऽहमलक्ष्योऽहमदोषभाक् ।
ब्रह्मैवाऽहं न संसारी मुक्तोऽहमिति भावयेत् ।३।

इत्यात्मानं परिभाव्य सिंहमुखमुद्रामभिमुखीकृत्य द्वात्रिंशन् मुद्राः प्रदर्शयेत् । तद् यथा -

अञ्जलिर्वद्धमुष्टिश्च प्रधानं च चपेटकम् ।
तर्जन्याऽऽस्फोटनं तद्वच्छङ्खचक्रे गदाऽम्वुजे ॥
पाशाऽङ्कुशौ च मूषलं खड्गचर्म सशार्ङ्गकम् ।
इषुं चापं च वज्रं च दंष्ट्रा श्रीवत्सकौस्तुभौ ॥
लक्ष्मी योनिस्तथाधेनुर्वरदाऽभयहस्तकौ ।
कर्ण्णौ च केशरं चैव वनमाला खगेश्वरः ॥
उपसंहारमुद्रा च द्वात्रिंशत् परिकीर्त्तिताः ।

कर्ण्णौ इत्यत्र वरदकर्ण्णमुद्रा, अभयकर्ण्णमुद्रा च । एतासां लक्षणानि अग्रे । अथसिंहमुखमुद्रा -

जानुमध्यगतं कृत्वा चिवुकोष्ठौ समावृतौ ।
हस्तौ तु भूमि संलग्नौ कम्पमानः पुनः पुनः ॥
मुखं विकृतकं कुर्य्याल्लिलजिह्वा च लेलिहा ।
एषा मुद्रा नारसिंही प्रधानेति प्रकीर्त्तितः ॥

एवं मुद्राः प्रदर्श्य मन्त्रार्थं स्मरन् मन्त्रदेवताऽऽत्मैक्यं परिभाव्य चतुःस्वरं सामगायेत् । तद् यथा - प्रथमं प्रणव साम । तन्मात्राद्वयमिलितम् अङ्गुष्ठेन तर्जनीमध्यपर्वणः स्पर्शं कृत्वा ततः मध्यमा ततः अनामिका ततः कनिष्ठिका मध्यपर्वस्पर्शं कृत्वा अनुदात्तप्रकर्षेण चतुर्भिः स्वरैः चतुर्मात्रायुक्तैः गायेत् । मात्राद्वयं यथा ॐकारस्य अ, उ सर्वत्राऽप्येवमेवक्रमः । तथैव पुनस्तृतीयामात्रा, प्रणवं च द्वयं मिलितं च गायेत् । इति चतुराऽऽवृत्त्याऽ-ष्टाक्षरता संपादनेन प्रणवसाम । तथैव शक्तिवीजे चतुरावृत्त्या गायेत् । ततः प्रथमपादं प्रगाय पुनः प्रणवसाम, द्वितीयपादं प्रगाय तदङ्गघृणिमन्त्रं गायेत् । तृतीयपादं प्रगाय यजुर्लक्ष्मीं गायेत् । चतुर्थपादं प्रगाय तदङ्गनृसिंहगायत्रीं गात्वा मिश्रसाम च गायेत् । घृणिमन्त्रम् "ॐ ह्रीं घृणिसूर्य्यादित्य श्रीम्" एवं

पठनेनाऽष्टाक्षरता । चतुःस्वरैः घृणियजुर्लक्ष्म्यो गानमिति आचार्य्याः । एवं चतुःस्वरगानानन्तरं यथाशक्ति मूलमन्त्रं तद्द्विगुणं च प्रणवं मौने न गणयन् जपं विदधीत । ततः पूर्ववत् द्विःस्वर सामाऽनुष्टुभं साङ्गं साम प्रगाय पूर्ववत् प्राणान् आयम्य -

"गुह्यातिगुह्यगोप्तात्वं गृहाणाऽस्मत् कृतं जपम् ।
सिद्धिर्भवतु मे देव ! त्वत् प्रसादादधोक्षज !

इति मन्त्रेण देवस्य दक्षिणकरे चलुकधारया श्रीलक्ष्मीनृसिंहः प्रीयताम् इति सर्वम् अन्तर्यागं जपं च भगवते समर्पयेत् । देवताभावायाऽपृष्टप्रतिवचनानि कुर्वीत इति ।

* अथ वहिर्यागः *

पूर्ववत् प्रातःस्मरणादि मातृकान्यासादिकं कृत्वा पूजागृहे सर्वतो भद्रमण्डलमेकमालिख्य श्री लक्ष्मीनृसिंहं प्रणम्य वामभागे दक्षिणभागे च यथातथं पूजाद्रव्याणि स्थापयेत् । पूजायाः पञ्चोपचारादारभ्य चतुःषष्ठ्युपचारान् यावद् उपचाराः सन्ति । तैः पूजा कर्त्तव्या । ध्यानाऽऽवाहनाऽऽसननिवेदनस्वागतीकरण स्नपन सन्निरोधनाऽवगुण्ठ-नसकलीकरण पाद्याऽर्घ्याऽऽचमनविष्टर मधुपर्क शुद्धाऽऽचमनताम्वुल सुगन्धितैल मर्द्दनोद्वर्त्तन तैलपङ्कापकर्षणोष्णोदक स्नानगङ्गादि पुण्यतीर्थोदकस्नान प्रोच्छन पादुका प्रदानाद्युपचारान् यथाशक्ति कुर्य्यात् । इति ।

* सहस्राक्षमार्जनम् *

दर्भद्वायाग्रेण प्रत्यृचा शिरसि जलं सिञ्चेत् । ॐ पवित्रगणस्य वृहस्पतिः ऋषिः अनुष्टुप् छन्दः सर्वे देवा देवता मार्जने विनियोगः ॥

ॐ सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमानीः पुनन्तु ते ।१।
ॐ श्रियं ते वरुणो राजा श्रियं सूर्य्यो वृहस्पतिः ।
श्रियमिन्द्रश्च वायुश्च श्रियं सप्तर्षयो ददुः ।२।
ॐ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ।

ललाटे कण्णयोरक्ष्णो आपस्तु घ्नन्तु ते नदाः ।३।
ॐ सुरा स्त्वामभिसिञ्चन्तु ब्रह्माविष्णु महेश्वराः ।
वासुदेवो जगन्नाथस्तथा शङ्कर्षणः प्रभुः ।४।
ॐ प्रद्युम्नश्चाऽनिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा ।५।
ॐ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषा दिक्पालाः पान्तु ते सदा ।६।
ॐ गौरी लक्ष्मीर्धृतिमेधा पुष्टिः श्रद्धा क्षमा मतिः ।
वुद्धिर्लज्जा वपुः शान्ति स्तुष्टिः कीर्त्तिश्च मातरः ।
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ।७।
ॐ आदित्यश्चन्द्रमा भौमः वुधः शुक्रः गुरुः शनिः ।
ग्रहास्त्वामभिषिचन्तु राहुः केतुश्च दर्पिताः ।८।
ॐ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
ऋषयो मुनयो गावो वेदमातर एव च ।९।
देवपत्न्यो ध्रुवो नागा दैत्याश्चाप्सरसो गणाः ।
अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ।१०।
औषधानि च रत्नानि कालश्च वायवश्च ये ।
सरितः सागराः शैलाः तीर्थानि जलदा नदाः ।
एतास्त्वामभिषिञ्चन्तु धर्मकामार्थ सिद्धये ।११।

पैप्पलादविवाहादि संस्कारपद्धतिस्थित पवित्र शान्त्यादिभिः गणैः अर्थात् शान्त्युदकैः मार्जनं कर्त्तव्यम् । नवपत्रिका-रम्भाऽर्क-हरिद्रा-जयन्ती-विल्व-दाडिमाशोक-माष-धान्यानि एतेषां पत्राणि ग्रहणीयानि ॥ इति शम् ॥

समाप्तम्

* अथ अथर्ववेदस्य अप्रकाशितोपनिषदः *

* अथानुचुलिकोपनिषद् *

श्रीः ॐ अष्टपादं शुचिर्हंसं त्रिसूत्रं मणिमव्ययम् ।
द्विधाऽऽत्मानं तेजसोद्भवं सर्वं पश्यन् न पश्यति ।१।
भूतसंमोहने काले भिन्ने तमसि वै खरे ।
अतः पश्यति सत्वस्थं निर्गुणं गुणचोत्करे ।२।
अशक्यः सोऽन्यथा द्रष्टुः ध्यायमानः कुमारकाः ।
विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ।३।
ध्यायतेऽध्यासिता तेन जन्यते प्रेरिता पुनः ।
श्रूयते पुरुषार्थं च तेनैवाऽधिष्ठिता पुरा ।४।
सौरनादवती शान्त जननी भूतभाविनी ।
असिता सितरक्ता च सर्वकामप्रदाविभोः ।५।
दिव्यते नाम विषयमसंख्याताः कुमारकाः ।
एकस्थोऽप्यवते देवः स्वच्छन्देनवशानुगाम् ।६।
ध्यानक्रियाभ्यां भगवान् भुङ्क्तेऽसौ प्रथमं प्रभुः ।
सर्वसाधारणीं दोग्ध्रीमौक्ष्यमाणां सुरर्षिभिः ।७।
पश्यन्त्यस्या महात्मानं सुपर्णं पिप्पलाशिनम् ।
उदासीनम् ध्रुवं हंसं स्नातका धर्मवन्तो ये ।८।
संशक्तमनुसंशति वहुधा शास्त्रकोविदाः ।
रथोत्तरे वृहत्साम्नि सप्त चैव सुगायते ।९।
मन्त्रोपनिषदं ब्रह्म पदक्रमसमन्वितम् ।
पठन्ति भार्गवाद्येतदथर्वाणो भृगूत्तमाः ।१०।
ब्रह्मचारी च ब्रात्यश्च स्कम्भोऽथ पलितस्तथा ।
अनड्वान् रोहितः शिष्टः पठ्यते भृगुविस्तरे ।११।
कालः प्राणश्च भगवान् मृत्युः पुरुष एव च ।
सर्वो भवश्च रुद्रश्च श्यावास्य (श्य) श्च सुरस्तथा ।१२।
प्रजापतिविराड् चैव पार्ष्णिः सलिल एव च ।

स्तूयते मन्त्रसंयुक्तै रथर्वविहितैर्विभुः ।१३।
तं षोडशकमित्येके सप्तविंशमथाऽपरे ।
पुरुषं निर्गुणं सांख्यमथर्वाणः शिरोविदुः ।१४।
चतुर्विंशति संख्यातमव्यक्तं व्यक्तदर्शनम् ।
अद्वैतं द्वैतमित्येवं त्रिधा तं पञ्चधा तथा ।१५।
ब्रह्माद्यस्थावरा स्तस्य पश्यतो ज्ञानचक्षुषः ।
तमेकमेव पश्यन्ति पुरुषं निर्गणं द्विजः ।१६।
यस्मिन् सर्वमिदं प्रोक्तं ब्रह्मस्थावरजङ्गमम् ।
तस्मिन्नैव लयं यान्ति वुद्वुदाः सागरे यथा ।१७।
यस्मिन् भावा प्रलीयन्ते लीनाश्चव्यक्ततां ययुः ।
पश्यतो व्यक्ततां भूयो जायन्ते वुद्वुदा इव ।१८।
कारणं - क्षेत्रज्ञाऽधिष्ठितं चैव कारणो व्यंजयेद् वुधः ।
एवं सहस्रसो देवं यः पश्यति पुनः पुनः ।१९।
ब्रह्म ब्रह्मविधानेन ये पुनः ब्रह्मणा धृतम् ।
ते लयं यान्ति तत्रैव लीनाश्च ब्रह्मशालिने ।२०। (नि)
लीनाश्च ब्रह्मशालिनः । इति ।

* अथ विश्वरूपाख्योपनिषत् *

ॐ अनात्मभूते देहादावाऽऽत्मवुद्धिस्तु देहिनाम् ।
सा विद्या तत् कृतो वन्धस्तन्नाशे मोक्ष उच्यते ॥

पृथिव्याऽऽपस्तेजो वायुराऽऽकाशमिति पञ्चाऽऽत्मकैरेतत् स्थूलं शरीरम् । शुक्रशोणितसम्भूतम्, त्रीणिमातृतः त्रीणि पितृतः । सिङ्मांसशोणितं मातृतः । अस्थिस्नायुः मज्जा पितृतः । षट्कोशिकं शरीरम् । श्रोत्रं त्वक् चक्षुर्जिह्वाघ्राणमिति पंचवुद्धयेन्द्रियाणि । वाक्पाणिपादपायूपस्थाख्यानीति पञ्चकर्मेन्द्रियाणि । प्राणाऽपानव्यानोदानसमाना इति पञ्चवायवः । मनोवुद्धिरहंकारश्चित्तम् इत्यन्तःकरणचतुष्टयम् । इत्येतत् स्थूलशरीर-मित्युच्यते । उभयशरीरान्तर्गतो विज्ञानाऽऽत्मा यावत् सर्ववेदशाखोपनिषत्सु तत्त्वभूतं परमात्मानं न जानाति तावत् संसचति । विदिततत्त्वस्तु

सर्वैषणाविनिर्मुक्तो निस्स्पृहो निरीहः सर्वकामैरगन्धितमनाः स उच्यते ।

अहमेव परंब्रह्म बासुदेवाऽऽख्यमव्ययम् ।
इति स्यान्निश्चितोमुक्तो वद्ध एवाऽन्यथा भवेत् ।१।

विज्ञप्तिमात्रो हि सदा विशुद्धो वद्धश्च तस्मात् सततं विमुक्तः ।
नाऽदेयहेयोऽहमिति प्रतर्क्य तिष्ठेत् सदा ब्रह्ममयो विशोकः ।२।

अहमेव परंब्रह्म न चाऽहं ब्रह्मणः पृथक् ।
यस्त्वेवं समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ।३।
यदा चित्तमसंशक्तं त्वदीयं सर्वकर्मसु ।
भवसीह तदा वत्स ! त्वमेव परमं पदम् ।४।
योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः ।
अकायो निर्गुणो ह्याऽऽत्मा सोऽहस्मि न संशयः ।५।
देहजात्यादिसम्बन्धान् वर्णाश्रमसमन्वितान् ।
भावानेतान् परित्यज्य स्वभावं भावयेद् बुधः ।६।
सर्वोपाधिविनिर्मुक्तं चैतन्यं यन्निरन्तरम् ।
तद् ब्रह्माऽहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ।७।

यदा स्वचित्तात् प्रभवं विचित्रं विश्वस्य तत्राऽस्तमयं च विद्वान् ।
प्रत्यक्षतः पश्यति शुद्धचक्षुराऽऽदर्शमध्यस्थमिवात्मरूपम् ।८।
तदाऽऽश्रमान् संपरिवर्ज्य सर्वान् श्रद्धागृहीतांश्च समाधियोगान् ।
तास्ताश्च युक्तीरनुमानगर्भाः सूक्ष्मावसंदर्शनदीपभूताः ।९।
देहस्य च स्वस्य मृदा हिरण्यं जरादिमर्त्ये त्वमशेषतोऽतः ।
प्रदीप्त सूर्य्याऽनलरश्मियोगाद् घृतस्य काठिन्यमिवाऽपनेयम् ।१०।
आमस्तकं पादतलाऽवसानं सान्तर्वहिश्चर्मपटाऽवनद्धम् ।
तत्रस्थमेवाऽमृतराशिरूपम् अमन्यताऽऽत्मानममर्त्यमित्थम् ।११।
यत् तत्पदं ब्रह्मविदो वदन्ति तपस्विनोज्ञानसमाधियुक्ताः ।
अनादिविज्ञानमजं पुराणं गुहाश्रयं निष्कलमप्रमेयम् ।१२।
निरञ्जनं निष्प्रतिमं निरोहम् अदृश्यमग्राह्यमचिन्त्यरूपम् ।
सनातनं ब्रह्मनिरन्तरं यत् तदेतदेवाऽहमिति प्रबुद्धः ।१३।
यो भावितस्तिष्ठति निष्प्रकम्पः स ब्रह्मभूतोऽमृततामुपैति ।

पर्य्याप्तकामश्च कृताऽऽत्मनश्च कामा विलीयन्त इहैव सर्वे ।१४।
सोऽहं परंब्रह्म जगत्समस्तमुदेति मत्तो मयि चास्तमेति ।
ईशोऽहमेवाऽस्य चराचरस्य पिता च माता च पितामहश्च ।१५।
ध्यानं समास्थाय पदं चतुर्थं ध्यायन्ति मामेव हि मुक्तकामाः ।
ब्रह्मादयो देवमनुष्यनागा गन्धर्वयक्षाप्सरसां गणाश्च ।१६।
मखैरनेकैरहमेव वेद्यो मामेव सर्वे प्रवदन्ति वेदाः ।
तपोभिरुग्रै विविधश्च दानैर्ममिव सर्वे प्रतिपूजयन्ति ।१७।
व्रतानि चाऽहं स्थिरजङ्गमानि यावन्ति भूतान्यहमेव तानि ।
एवं विधेष्वप्य पृथक् स्थितोऽहं मृज्जातिवन् मृन्मयभाजनेषु ।१८।
अहममृतमयो न मर्त्यमूर्तिरिति कथमिव नास्मरेत् स्वरूपम् ।
निहितमुपनिषत्सु यच्चतत्त्वं कथितमहमविस्तरेण सर्वम् ।१९।
अहमेको न मे कश्चिन्नाऽहम् अन्यस्य कस्यचित् ।
न तं पश्यामि यस्याऽहं तं न पश्यामि यो मम ।
स्थूलं जागरितं प्रभिन्नचरितं प्रत्यक्षतो दृश्यते ।
स्वप्नं यत्तरलं च वुद्वुदनिभं मायोपभं चञ्चलम् ।२०।
सौषुप्तं तिमिराऽन्धकारगहनं ह्यव्यक्तमव्याकृतम् ।
तुर्य्यं चैव सदा विभाति विमलं सर्वत्र सर्वानुगम् ।२१।
वुद्धिपूर्वं तु यद् ज्ञानं वहिर्विषयसेवितम् ।
प्रत्यक्षमविरुद्धं च तज्जागरितमुच्यते ।२२।
अर्थाऽभावे तु यद्ज्ञानं प्रत्यक्षमिव दृश्यते ।
गन्धर्वनगराऽऽकारं स्वप्नं तदुपलक्षयेत् ।२३।
जाग्रत् स्वप्नावुभावेतौ यस्मिन् नित्यं प्रतिष्ठितौ ।
उत्पत्तिः प्रलयश्चैव सुषुप्तं तत्तु लक्षयेत् ।२४।
वीजभावश्च निद्रा च द्वयं यत्र न विद्यते ।
तत् तुरीयमिति ज्ञेयम् उत्पत्तिलयवर्जितम् ।२५।
यावदज्ञानभावः स्यात् तावत् संसारभावना ।
उदितं चेत् परंज्ञानं ब्रह्मैवेदं समन्ततः ।२६।

॥ इति विश्वरूपाऽऽख्योपनिषत् ॥

* अथाऽथर्वणि श्रीकृष्णशान्तोपनिषत् *

ॐ नारदो ह वै श्रीकृष्णं स्मरन् ब्रह्मलोकाद् द्वारकामेत्य वसुदेवदेवक्योर्मध्ये क्रीडाबालकमिव चिदाऽऽत्मकगोपालम् आलोक्य हर्षोल्लासितस्तं मनसा नमति स्तौति च । तं ह वै श्रीकृष्णो मध्याह्नसमयाऽऽ-गतमतिथिसपर्य्यार्थं स्वभक्तं करे गृहीत्वा उवाच - गच्छमद् गृहमिति । स्वपुरमानीय सुशीतलपानमिष्टान्नभोजनैस्तृप्तिमुत्पाद्येयं रुक्मिण्या देव्याः पुरी, सत्यावत्या इयमित्यादि प्रदर्शयन् स्वयं विचित्रितपरमाऽऽनन्दान्तरे सोऽभिन्नचिदाकारं प्रकाशयति । नारदो ह वै तासां प्रतिगृहे तत्प्रियाणां प्रतिपत्तिमिव प्रेमोद्भिन्नकलेवरं श्रीकृष्णमाकलय्य तत्र तत्र संचरन् मुनिर्विचित्रितमिदममन्यत । किमिदं, श्रीकृष्णो हो वै एकः कथं प्रतिरमणीनां प्रतिपत्तिरिव विविधलावण्यरसोऽभिन्नविलासभावैर्नानात्वमापन्न इति । एवं वसुदेवदेवक्योः क्रोडे क्रीडद्बालक इव प्रीतिमावहति ? भक्तानां तद्तद् गोकुललीला विहारादिगानप्रोद्भूतप्रेमोद्भिन्नतनूनां सनकादीनां पुरःपरमाऽनुभवाऽऽनन्तस्वरूपः ? कामादीनां तनूनां साक्षात् परमाद्ववरसस्निग्धपरमानन्दस्वरूपं इत्येवमालोक्य चिन्तयन् रत्नमणि-खचित काञ्चनाऽलंकृतभूमौ श्रीपादपमूले स्फुरत् रत्नमण्डपे भास्वल्लोलेन्दु-सूर्य्यसहोदरकिरणकिंकणी युक्तं, चामरद्वयाऽन्वयज्ञान चक्रे महोज्ज्वलपरमरत्नमणिरञ्जितहेमसिंहासने सुखाऽऽसनस्थम्, भगवन्तं विशुद्धद्रवहाटकसन्निभं तन्त्रीकरं केयूरहारमणिमकरकुण्डल किरीट-बलयाऽङ्गदवनमालामहामणि श्रीवत्सलांछनगलकपोल श्रोणिभूषं, स्मराऽऽस्यं भास्वच्छंखचक्रगदापद्महस्तं, मणिरञ्जितहेमनूपुरं, परमस्वच्छहल्लासोल्लसित-भक्तगणसेवितं, बाल्यादिलीलारससरसिकोत्सुकैरमरगणैर्गीयमानं, श्रीकृष्णं तम् आलोक्य दण्डवद् भूमौ पतित्वा क्षणं विश्वस्य (निःश्वस्य, वा) ससंभ्रमः परमया वाचा स्तौति, नमति ।

ॐ नमो विश्वरूपाय विश्वस्य विश्वसाक्षिणे ।
विश्वात्मिकाय सर्वाय शुद्धाय सकलात्मने ।१।
सर्वात्मजाय नित्याय परमानन्दरूपिणे ।

पराय परतत्त्वाय सिद्धाय सिद्धरूपिणे ।२।
अविज्ञातार्थशब्दाय परमानन्दहेतवे ।
सर्वतत्त्वायसाराय गोविन्दाय नमो नमः ।३।
नमः सूक्ष्मस्वरूपाय व्यक्ताऽव्यक्ताय वै नमः ।
नमस्तत्त्वाय मनसे विश्वरूपाय वै नमः ।४।
बुद्धाय बुद्धितत्त्वाय ज्ञानाऽऽत्मकाय वै नमः ।
अतीन्द्रियाय गूढाय आत्मतत्त्वाय वै नमः ।५।
जीवाय जीवतत्त्वाय कूटतत्त्वाय वै नमः ।
शब्दाय शब्दतत्त्वाय शब्दमात्राय वै नमः ।६।
स्पर्शाय स्पर्शतत्त्वाय स्पर्शमात्राय वै नमः ।
रूपाय रूपतत्त्वाय रूपमात्राय वै नमः ।७।
रसाय रसतत्त्वाय रसमात्राय वै नमः ।
गन्धाय गन्धतत्त्वाय गन्धमात्राय वै नमः ।८।
सदाऽऽकारस्वरूपाय चित्सखाय नमोनमः ।
कोटिकन्दर्परूपाय कोटिसूर्य्यप्रकाशिने ।९।
कोटिचन्द्रसुशीताय कोट्यग्निरूपधारिणे ।
सर्वभूतात्मने सर्वसाक्षिणेऽनन्तरूपिणे ।१०।
अचिन्त्यकल्पवृक्षाय शान्ताय वै नमोनमः ॥

अनन्ताऽयाऽनन्तरूपायाऽनन्तप्रभावायाऽनन्तमहात्म्यायाऽ-नन्तमहिम्नेऽनन्ततेजसेऽनन्तविक्रमायाऽनन्तरूपायाऽनन्तवीर्य्यायाऽ-नन्तप्रभावायाऽनन्ताऽऽत्मने नमोनमः । जयजय कृष्ण ! वृष्णिविष्णु वंशप्रदीप ! जय जय महापुरुष ! चतुर्वेदार्थसारसर्वस्व ! जय जय निखिललौकिक गुरो ! सुरनरनागगन्धर्वकिन्नरविद्याधरपरमपूजित ! जय जय हृदयैकनाथ ! योगीन्द्रमुनीन्द्रज्ञानीन्द्रवन्दित पद ! जय जय सत्यात्मक वसुदेव देवकीनन्दन ! जय जय वाञ्छाकल्पवृक्ष ! रुक्मिणी शिरस् सीमन्तसिन्दूरपुंज-रंजितपद ! जय जय सत्यवतीहृत् स्वर्ण्णसिंहासन-प्रतिष्ठित ! जय जय सकलपुरगुरुजनमानसदीपप्रतिम ! जयजयाऽनुज-जीवन ! जयजय माया मानुषविग्रह ! देव ! देव ! नमस्ते । जय जय देव !

नमस्ते । इत्युद्भाव्य परमानन्दरसे जडीभूतस्तिष्ठेत् । ततो ह वै श्रीकृष्णः स्मेराऽऽस्यः सु प्रीतः स्वभक्तस्य परमर्षेरभिप्रायमासाद्यास्मै मत् प्रीत्याय (प्रीतये, प्रीत्यै, वा) स्वपदं दातव्यमिति तत्करे गृहीत्वा स्ववाससा मुखाक्षिणी संमार्ज्य, हे नारद ! किं स्वप्नं दृष्टं ? अहमेवाऽत्र यमभयादुद्भवामि न साक्षी, मध्यस्थो यत्रस्थं यदन्वेतत् सर्वं मय्ये तत् तव मतिमाचिन्त्य तवैतदाऽऽचिन्त्यम् इति । नारदो ह वै प्रेमाऽऽर्द्ररसोद्भिन्नपुलकाऽश्रु खेदकम्पजृम्भामोहघर्घरवचनोऽब्रवीत् । देव ! देव ! अद्वितीय एव भगवान् कथं नानात्वमापन्न इति । तं ह वै स होवाच – हे नारद ! एतद् रहस्यं कोऽपि न जानाति, कस्मै कस्मै नेदं कथितव्यं त्वयेति । मद्भक्ताय एकस्मै तुभ्यं गोप्यं प्रकाशयामि सृष्टिविधिम् । अहमेवशक्तिस्ततः स्वयम्भूरजायत । तस्माद् वुद्धिस्ततः कार्य्यस्मृति स्तत्कार्य्यं च मदीयं, मदीयत्वे हि अहंकारवृत्ति स्तेन त्वेन तया वा जगत् परिच्छिन्नत्वेन ज्ञेयम् इति । स वै हि स्वयम्भू र्जगदखिलं भोगकर्माऽऽदानविसर्जनाऽऽत्मकं निर्माय मयि समर्प्य मद्युक्त आत्मा देवोऽहं भगवानपि मद्धृदि जागरुकः स्थितः इति । मच्छक्तौ मय्याऽऽपन्नायामेतत् सकलं मृतमिवाऽऽत्मानं विनाऽवस्थितमासीदिति । अत्र श्लोकाः –

एकमेवाऽद्वयं चासीन्नास्तिमात्राकलाक्वचित् ।
सम्भूतामत्र ईशाद्वा मयि लीने इति स्थितम् ।
स्वप्नेन्द्रजालवद् वुद्धिः (विद्धि वा)
केवले नाऽस्तिभिन्नता ॥ (नास्ति भिन्नता वा)
यदि मे भिन्नता नास्ति तदाहं अभवं द्वयम् । इति ।

सर्वमस्मिन् मयि लीने सति न जलं न भूमिः, नाऽग्निः न वायुः, नाऽऽकाशो, न मनो न वुद्धिर्नाऽहंकृति र्न तत्त्वं न किञ्चिदिति ततो मद्धृदिस्थो भवान् जाग्रन्निदमिति चिन्तयत् एतदादिभगवान् स्वशक्त्या सर्वेषामाऽऽकीट ब्रह्मपर्य्यन्तानां आन्तरप्रकाश्याऽहमिव जगत्, कर्त्तृत्व भोक्तृत्व-गन्तृत्व-वक्तृत्वाऽऽदातृत्व-विशिष्टृत्वपूर्ण्णत्वसर्वात्मकत्वेन कदाज्ञेय इत्यर्थे यच्चिन्तितं तत् किं विस्मृतं, सोऽहं सर्वेषाम् अन्तरात्मानं जीववत् प्रकाश्य तत् तद्भोगकर्मादि व्यवहारेष्वहं भोक्ता, कर्त्ता, ज्ञाता, अनुमन्ता, धाता, वक्ता, अनुरक्ता, अनुशक्ताऽस्मीति देहभोगादौ च संपूर्ण्णं केवलमहमेवाऽऽसमिति,

न पुनर्देहादेरुत्पत्तिः तदनुपपत्युक्तो भानलयो र्हि मद्धाम्नि मद्धामस्वनावृत्तिरिति स्थितम्, ततो हो वै चिन्तितं मयेदम्, एतेषाम् आत्मनः ज्ञानं न जातं, भक्तिश्च न कृता । कथं मयि लीनाः स्युः, एवं मच्छर्क्ति साक्षाद् विकल्य, देवि ! सुभद्रे ! ज्ञानरूपे ! जगत्पूज्ये ! महानिद्रे ! त्वमेतान् गृहीत्वा गच्छ, मदर्थे यत्नमाचरिष्यसि, सोऽकामायदहं पुनर्वहुस्यां प्रजायै, (सोऽहं अकामयदिति) शेषस्तु त्वय्यर्पितः यथा वाध्योऽस्य भवेत् तथाध्येयमिति । सा वै ह्युवाच – एकाऽहम् अद्वितीयाऽहं, जडाऽहं, प्रकृतेः परा वहुभावे कथं त्वयि स्थिताऽहमिति, यद्वचस्तदुवाच भगवान्, मया नानात्वमापन्ना सती न द्या द्या शेषैरपि भक्तत्वेन त्वम् अनुग्रहीष्यसे, त्वया च मद्ज्ञाने यत्नं ध्येयमित्युक्त्वा लीलार्थमात्रमेतेषां स्वप्रकाश्याऽहं वहुवभूव । तस्माद् धाम्नो मद्भवमात्रस्याऽग्रं संकल्पजगत्क्रीडार्थमहमिव परिस्फुरति । अहमिवाऽहं केवलोऽहं, शुद्धोऽहं, एकोऽहं, गुणाऽतीतोऽहं, यः सोऽहं नानात्वभावमापन्नो हि गुणवान् भवामि । देहवान् भवामि । रूपावान् भवामि, कर्मवान् भवामि प्रत्यक्षं भवामि । गुणदेहरूपकर्मप्रत्यक्षादिसृष्टिविधौ अहं शक्ति प्रभावात् प्रपंचतः । नमोऽस्तु, तयैवमेवं स्थितम् । इतितः, सहोवाच नारदः, किमिदं चित्रं जगद्, देहभोगकर्मादिविना भाव उत्पद्यते, किमिदं देव ! तत्राऽऽह वै भगवान्, यदा वत्सवालकान् चौर्य्यव्यवहितो ब्रह्मणः समक्षं क्रीडार्थं तत् तद् भोगकर्माऽनुबन्धदेहादिभेदान् वत्सवालकान् सृष्ट्वा तत् तन्मातृकादेरिव प्रीतिविहितात्, किं तेषां देहभोगादेः सत्वमस्ति ? किन्तु लीलामात्रमेतद्, वस्तुतोऽनादित्वं जगदिति । ब्रह्मणोऽहं कृतित्वं निरस्तं यत् तत् किं विस्मृतम् ? एतेनाऽपि मन्मतयो मत्परं भावम् अनाऽऽकलय्या-ऽऽत्मानं सीदन्ति । स्वकर्मणा देह्यहमुपजायते । भोगवानुपजायते इति मन्ये । चरन् जरामरणं तापत्रयाद्यनुभावेनाऽऽत्मकर्त्तृत्वेनाऽभावात्मा जायते म्रियते च । स्वकर्मभोग वशाद् दुःखमनुभवत्यनुरोधेन जरामरणादि स्वक्रियते इति च निरस्तम्, यतो हि वै आकीटसर्वम् अभूद् भवामीति, आसतो देहभोगादेस्तद् भावम् अनाध्याय देहिनां केवलोऽस्मात् यद्भाव्यं तं निवर्त्तयेत् । तदाऽहमेव केवलम् आत्मा इति न किंचिद् अहं ज्ञाने दृढीभूत इति । तच्छक्ति समुच्छेदेन देही न देहः, नाऽदेही नाऽदेहः, न भोगी न भोगः, न गुणवान् अहं, न गुणाऽती-

तोऽहं, नाऽहम् एतत् तु केवलम् अहं शक्तिः प्रपंचतम् इति, तत्र श्लोकाः –

एको देव निरीहोऽहं शक्तिभावादहं वहुः ।
भूतस्रष्टा भूतभावो भूतव्यापी भवाऽपहः ।१।
भूताऽऽवासो भूतसाक्षी कर्माऽध्यक्ष्योऽक्षयोव्ययः ।
केवलो निर्गुणश्चैताननहं परमात्परः ।२।

इति, देव ! भवत्सु अमज्जत् त्वत्तः सर्वं जातम्, तत् कथं बासुदेवः कथं वा ज्ञातोऽसि, का चाऽहं शक्तिरिति । सहोवाच श्रीकृष्णः, वसति यस्मिन् तत् परमं रहस्यम् अतिगोप्यं त्रैलोक्ये च देवादयो न जानन्ति । यदर्थे महेशोऽपि दिगम्वरस्तपस्वी, किमन्यैः ज्ञेयः तन्नियतवसतित्वेन बासुदेवः प्रसिद्ध इति प्रसिद्ध्यति । प्रकृतेः परोऽनहं गोविन्दाय नम इति, मूलमन्त्रं जपतो जाग्रतो भवतः समक्षं यः सोऽहं विद्यमानत्वेन ज्ञातमिति, शक्तिस्तु निरवयवा मद्विषया अहं धाममिति, (थामेति, वा) । तं हि वै उवाच नारदः – एते लोकाश्च मूढाः पशवः, इमम् अहंकारेण भोगमारब्धदेहिनम् आत्मनो महातापत्रयात्मक दुःखमनुभूताः, कथं भक्तिविषयाऽज्ञानिनः स्फुरति अत्र श्रीभगवान् कृपासिन्धुः जपत् परित्राणार्थं मात्रलीलाविभूतिरितीदानीमस्मत् संसारकूपात् पतितोऽन्धान् अज्ञानिनो जनानुद्धृत्य स्वविषयरसिकान् कुरु । माया च महाप्रलयोऽधिमन्तव्य इत्युत्तरात् श्रीकृष्णरूपे समक्षं स्वयं शक्तिकं सकलं जगन्नारदेन सदायास्ते (सदा आस्ते)जसा (तेजसा) । तद्धाम्नि लीनं न किंचिन्मात्रमनुभवार्थं नास्ति, वाच्यतां नास्ति, ज्ञेयता (तां) नास्ति, अभिधेयता नाऽस्ति, भावाऽभावो नाऽस्ति, सदसन्नाऽस्ति, केवलमनुपसुखसिन्धोः (सिन्धौ) जडो भूतो नारदः स्थितः । सर्वे च कृष्णभावमापन्नाः सन्तः आनन्दवशेन जडीभूता इति कालातीतम् । तत्र हि नारदः स्वात्मानं केवलमानन्दमात्रमवधारितश्च । तद्धाम्नि सुखस्वरूपे अव्यक्ते ध्वनौ समुद्भूते सच्चिदानन्दकन्दे बासुदेवे ह्याऽऽविभूति तद् हृदयात् श्रीकृष्णात्मकं नारदाद्यखिलं जगदाविर्भूतमिति । अत्र श्लोको यथा –

तस्मिन् धाम्नि समुद्भूतम् अनहं भाव सङ्गितम् ।
सोऽपश्यत् कृष्णलीलाद्याशक्तं तच्चेष्टतेजगद् ॥ इति ॥

नारदो हि श्रीकृष्णसहचरभूतस्तु श्रीकृष्णगुणं गायति तदुपध्यायति,

तद्ज्ञानं जानाति । अखिलं जगत् सर्वमेव, श्रीकृष्णमात्मानमालक्ष्य एवं विचेष्टितम् इत्येतत् श्रीकृष्णविभूर्ति स्मृत्वाऽऽत्मा सुभद्रादेवौ वैष्णवो कलौ निशान्ते ज्ञानात्मिका शक्तिः शेषाय प्रकाशयेत् । शेषस्तु "ॐ तत् सद् आत्मानं श्रीकृष्णधाम्नि सर्वमेकीकृत्य साक्षात्कृतेऽव्यये तद्धाम्नि शान्तोभवेदिति, शान्तोऽभवदिति वा ॥"

॥ इत्याथर्वणि श्रीकृष्णशान्तोपनिषत् ॥

* अथ त्रिपुरप्रकरणोपनिषत् – तापनीयो वा *

ॐ शब्दस्पर्शरूपरसगन्धादयो विषयाः पंचपृथिव्यादयश्च परमात्मनः समुत्पन्नास्तस्माद् वा एतस्मादात्मनः आकाशः संभूतः । आकाशाद् वायुः , वायोरग्निः, अग्नेराऽऽपः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधिभ्योऽन्नम्, अन्नात् पुरुष इति । एवं पृथिव्याऽऽपस्तेजो वायुराकाश-मिन्द्रियाण्यहंकारोवुद्धिर्महानव्यक्तमव्याकृतमित्युच्यते । तत्र पृथिवीधारणे, आपः पिण्डीकरणे क्लेदने च, तेजः पचने प्रकाशने च वायु व्यूहने स्पर्शने च, आकाशमवकाशप्रदाने । आकाशमेकलक्षणम्, द्विलक्षणो वायुः त्रिलक्षणं तेजः, आपश्चतुर्लक्षणाः, पञ्चलक्षणापृथिवी । शब्दगुणमाकाशम् परस्पराऽनुप्रवेशेण शब्दस्पर्शगुणोवायुः, शब्दस्पर्शरूपगुणं तेजः, शब्दस्पर्शरूपरसगुणा आपः, शब्दस्पर्शरूपरसगन्धगुणा पृथिवी । यत् कठिनं सा पृथिवी, यद् द्रवं तदाऽऽपः, यदुष्णं तत् तेजः, यत् संचरति स वायुः, यच्छुषिरं तदाऽऽकाशं, इत्येतत् स्थूलं शरीरम् । अन्योऽन्याऽध्यासत् सदसदात्मकम् । मनः सकल्प-विकल्पात्मकं, इन्द्रियाणि विज्ञानशक्तयः क्रियाशक्तयश्च । विज्ञानशक्तयः श्रोत्रं त्वक् चक्षुः जिह्वा घ्राणमिति, पञ्चवुद्धीन्द्रियाणि । क्रियाशक्तयो वाक्पाणिपादपायूपस्थाख्यानीति पञ्चकर्मेन्द्रियाणि । प्राणाऽपानव्यानोदान-समाना इति पञ्चवायवः । मनोवुद्धिरहंकारश्चितम् इत्यन्तःकरणचतुष्टयम् । संकल्पविकल्पात्मकं मनः अहंकारोऽभिमानलक्षणम् । वोधव्यलक्षणा वुद्धिः चेतयितव्यलक्षणम् चित्तम् । वुद्धिर्महान् प्राणो हिरण्यगर्भः परिष्वज्य आत्मा यथा सूत्रवायुरित्येतत् सूक्ष्मं शरीरम् । अव्यक्तमव्याकृतं प्रधानवीजम् । क्षेत्रं तमः इति सुषुप्तम् । सशरीरी आत्मा नित्यशुद्धवुद्धिमुक्तसत्यस्वभावः

आकाशवद् अवस्थितः । स वेदसौम्य इदमग्र आसीत् । इत्यादि श्रुत्युक्तलक्षणः । स परमात्मा इह प्रविष्टः सर्वभूतेषु स्थित्वा श्रोत्रेण शब्दं प्रतिपद्यते । त्वचा स्पर्शं, चक्षुषारूपम्, जिह्वया रसं, नासिकया वासः, वाचा वक्तव्यं, हस्ताभ्यां आदातव्यं, पद्भ्यां गन्तव्यं, पायुना विसर्जयितव्यं, उपस्थेनाऽऽनन्दयितव्यं, मनसा मन्तव्यं, वुद्ध्या वोधव्यम्, अहंकारेण अहंकर्त्तव्यं, चित्तेन चेतयितव्यम् । मनसा विकारं प्रतिपद्यते । स परमात्मा क्षेत्रज्ञः, कर्त्ता, जीवो विज्ञानात्मा मणिवद् उपाधिविशेषात् । तं विदित्वा कर्त्तारमात्मानं न लिप्यते कर्मणा पापकेनेति । श्रौत्रमध्यात्मं, श्रोतव्यम् अधिभूतं, दिशस्तत्राऽधिदैवतं, त्वगध्यात्मं, स्पर्शयितव्यम् अधिभूतं, वायुस्तत्राऽधिदैवतम् । जिह्वाऽध्यात्मं, रसयितव्यमधिभूतं, वरुणस्तत्राऽधिदैवतम्, नासाऽध्यात्मं, घ्रातव्यमधिभूतं, पृथिवी तत्राऽधिदैवतम्, वागध्यात्मं, वक्तव्यमधिभूतम्, अग्निस्तत्राऽधिदैवतम्, हस्तावध्यात्मम्, आदातव्यमधिभूतम्, इन्द्रस्तत्राऽधिदैवतम्, पादावध्यात्मं गन्तव्यमधिभूतं, विष्णुस्तत्राऽधिदवतम् । पायुरध्यात्मं, विसर्जयितव्यमधिभूतं, मित्रस्तप्राऽधिदैवतम् । उपस्थमध्यात्मम्, आनन्दयितव्यमधिभूतं, प्रजापतिस्तत्राऽधिदैवतम् । मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रस्तत्राऽधिदैवतम् । वुद्धिरध्यात्मं, वोधव्यमधिभूतं, ब्रह्मा तत्राऽधिदैवतम् । अहंकारोऽध्यात्मम्, अहंकर्त्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम् । चित्रमध्यात्मं, चेतयितव्यमधिभूतम्, क्षेत्रज्ञस्तत्राऽधिदैवतम् । एवमध्यात्माऽधिभूताऽधिदैवतं तत् सर्वमुक्तम् । स परमात्मा निर्विकल्पो निरवयवो निरिन्द्रियो (निरिन्द्रो) निर्गुणो निरञ्जनः सर्वगतः सर्वव्यापी, सर्वज्ञः सूक्ष्मो नित्योऽक्षरं ब्रह्म । विज्ञानमानन्दब्रह्म सत्यं ज्ञानमनन्तम् । ब्रह्म एकमेवाऽद्वितीयं ब्रह्म, ॐ इत्येकाक्षरं ब्रह्म, प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्म, आकाशशरीरम् ब्रह्मसर्वं खलु इदं ब्रह्म । आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वपुरुषं, एवेदं सर्वं तेनेदं पूर्णं पुरुषेण, इत्येतै विंशेषणैर्विशेषितं परंब्रह्म तदहमोमिति प्रतिपद्यते नील सुगन्धिमहदुत्पलमितिवत् । शब्दादय आत्मानं न जानन्ति परस्परमप्याऽऽज्ञाधीनत्वाद् वाह्यघटपटादिवत् । एवं देहेन्द्रिय मनोवुद्धिसंघाता आत्मानं न जानन्ति, परस्परमपिदुष्टत्वात् शब्दादिवत् । शरीरमपि आत्मानं न जानाति घटादिवत् दृश्यत्वात् । इन्द्रियो आत्मानं न

जानन्ति प्रदोपदृश्यत्वात् । मनः आत्मानं न जानाति इन्द्रियवद् दृश्यत्वात् । वुद्धिरपि आत्मानं न जानाति मनोवद् दृश्यत्वात् । अहंकार आत्मानं न जानाति वुद्धिवद्दृश्यत्वात् । चित्तमपि आत्मानं न जानाति, अहंकारवद् दृश्यत्वात् सुखदुःखादयः आत्मानं न जानन्ति रागादयश्चाऽऽत्मानं न जानन्ति चित्तवद् दृश्यत्वात् । सुषुप्तौ इन्द्रियमनोवुद्ध्यादीनामभावे शब्दादयो न जायन्ते नाऽऽत्माऽभावे, यस्मात् तस्मान्नाऽहं दृश्यो द्रष्टैवाऽहं सर्वप्रत्ययसाक्षित्वात् । अपवरकमध्ये प्रदीपवत् स्वभावेनैव प्रकाशयति यस्मात् तस्माद् गृहं प्रविष्टुमार्यात्वादीन् (प्रविष्टुम् अर्हत्वादीन् वा) प्रयत्नेनाऽभिमानरहितप्रदीपवत् प्रकाशयति यथा तथा वुद्धिगृहिज्ञप्तिस्वरूपः, स्वयं ज्योतिर्भवति । स्वेन भासा सर्वमिदं विभाति, न तत्र सूर्य्यो विभाति न चन्द्रतारकं, नेमा विद्युतो भान्ति, कुतोऽयमग्निः, "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इत्येवमादिवचनेभ्यो वुद्धिवृत्तानां चक्षुरादिद्वारेणोत्पद्यमानानां रूपाद्याकारप्रत्ययानां सुखदुःखमोहात्मकानाम् अभ्यन्तरे स्मृतीच्छा प्रयत्नरागद्वेषाभिमानरहितः स्वभावेनैव प्रकाशयति - यस्मात् तस्मान्नित्यत्वं शुद्धत्वं विकाररहितत्वं सर्वज्ञत्वं सूक्ष्मत्वम् अचलत्वम् अनामरूपकर्मात्मकत्वम् अशनपिपासे प्राणस्य शोकमहौ मनसः, जरामृत्युशरीरस्येति । योऽशनापिपासे प्राणस्य शोकं मोहं जरां मृत्युमत्येति । यदिदं किंचाऽऽस्वभ्यः, आशकुनिभ्यः, आकृमिभ्यः, आकीटपङ्गेभ्यः, तत्र प्रकृतेरन्यत्वम् इति सिद्धं न त्वाऽऽत्मनः इति । तस्माद् जाग्रत्स्वप्नसुषुप्तिसु एक एवाऽऽत्मा जागरिते वैश्वानरः, स्वप्ने तैजसः, सुषुप्तौ प्राज्ञसूर्य्यो मूर्द्धनि संस्थितः । स एष निर्विशेष स्तुरीय परमात्मा सोऽहमिति । "यतो वाचोनिवर्त्तन्ते अप्राप्य मनसा सह इत्यादि श्रुतेरपि (वाचो निवर्त्तन्ते) ।"

॥ त्रिपुरप्रकरणोपनिषत् समाप्ता ॥

❊ अथ श्रीनृसिंहतापनीयोक्तवृहन्नृसिंहोपनिषत् ❊

ॐ उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्यु मृत्युं नमाम्यहम् ॥

अस्य मन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीनृसिंहो देवता, हं

वीजम्, माया, वा ईं शक्तिः सर्वकर्मणि विनियोगः । अथ खलु आहुः, अस्याऽनुष्टुभः कः ऋषिः किं छन्दः का देवता । न वै विज्ञाय ऋषिम् अविज्ञाय छन्दोऽविज्ञाय देवतां न प्रयुंज्यात् । यदि प्रयुंज्याद् असमर्थकोऽस्य मन्त्रो भवेत् । यो हो वै द्रष्टा स ऋषिः कथ्यते । छन्दो वै स्वरूपं मन्त्रस्य । यत् प्रधानो मन्त्रः स वै देवता । न ह वै द्रष्टुस्वरूपाप्रभिधेयाऽविद्वान् (न ह वै द्रष्टु स्वरूपाऽभिधेयान् विद्वान् वा) मन्त्रं वेद, नाऽविदितमन्त्रस्तं प्रयुङ्क्ते । न चा प्रयुंजानस्तत् फलमृच्छतीति । तत्रैव ब्रूयात् । ऋषिरस्य ब्रह्मेति । स वा इममादौ ददर्श । यदक्षराणि द्वार्त्रिशत् तस्मादनुष्टुप्, द्वात्रिंशदक्षराण्यनुष्टुप् उच्यते । देवो नृसिंहः सलिङ्गत्वात् । मन्त्रस्य य ऋषिछन्दो देवान् वेद समन्त्रं वेद, यो मन्त्रं वेद स प्रयुङ्क्ते सफलमृच्छेतीति । वेदगुह्यं, वेदगुह्यम् ।१। देवा असुरेष्व स्पर्द्धन्त । तेऽसुरादेवानजयन् ते त्रिलोकान् विध्वंस्याऽतिष्ठन् । ते देवा विभ्यन्तो दिक्षुप्राद्रवन्, समिन्द्रो विष्णुमभ्यधावन्, असुरैरर्दमाना दिक्षुः प्राद्रवाः (मन्नत्स्वष्टस्यखाद्यसीति । मन्त्रसृष्टस्य खाद्योऽसीति वा) स उग्रदंष्ट्रो लाहिताक्षस्तानसुरानवधीत् । तस्मादुच्यते उग्रमिति । यः प्रथमेनैतेन पदेनोग्ररूपं विष्णुमुपासीत स भ्रातृव्यान् जित्वा तस्यैव सायुज्यमियात् ।२। पुरा खलु इदं तमसा संभृतमभूत् । न द्यौच्छन्नदिशोऽज्ञायन् स प्रजापतिरनेनोग्ररूपं विष्णुमुपातिष्ठत् । स आदित्यो भूत्वा तमोऽपहनत् । ततो वै य एतेन पदेन तमुपतिष्ठते सोऽविद्यातमोपहः, आदित्यरूपं ब्रह्म ज्योतिः । तदाहुरेते नैव पदेन रुद्रः स्वमूर्तेः संहरति प्रजाः, संहरति प्रजाः ।३। प्रजापतिर्देवाऽसुरानसृजत । ते देवाः परस्परं श्रैष्ठ्यायस्पर्द्धमाना न कस्यचिद् वशत्वेनाऽतिष्ठन्त । तेऽप्यशंकमानेष्वसुराद्भयबर्द्धयन्त । स प्रजापति-रमन्यत । सर्वातिशायिनं सर्वनियामकं कथं पुत्रं जनयेयमिति । स विष्णुं प्रापद्यत, तस्मै विष्णुरस्याऽनुष्टुभो द्वितीयं पदं प्रददौ । अनेनमामुपास्वेति । सोऽनेनोपासीत । स सर्वातिशायिनं सर्वनियामकं वीरमिन्द्रमजनयत् । योऽनेनोपासतैतद्विष्णुः स सर्वातिशायिनं सर्वनियामकं वीरं जनयेत् । यस्माद् विविधान् विकारान् कारणेभ्य ईरयति, तद् वीरस्य वीरत्वं, य एवमेतस्य वीरत्वं जानाति स वीरं जनयति स वीरं जनयति ।४। वैरोचनो वलिः

किलवीर्य्येण देवान् जित्वा लोकानध्यतिष्ठत् । ते देवा विष्णुं शरणमधावन् । तान् विष्णुरब्रवीत् - मा भै, तमहमधः पातयामीति । स वामनरूपं धृत्वा तं सो मोद्यमिनं बलिमुपाऽधावत् । स तमयाचत, दक्षिणासु नीयमानासु यज्ञपते ! मत् पदत्रयसम्मितं क्षेत्रं मे देहि, यत् दद्या यज्ञीयं फलं तेऽहमिति । स नद्धोवाक्येन (कः सन्नद्धे विरह, मेघदूतवद्वाक्येन) तं प्रसाद्य तस्मै पदत्रयं प्रायच्छत । तत्क्षणाद् हिं वर्द्धमानस्त्रिलोकान् वपुषा पूरयति स त्रिभिः पदभिः त्रिलोकान् नुं अक्रामत । तस्योच्छ्रियमाणस्य वामपदस्य नखोद्भिन्नाद् ब्रह्मादुपरितनाः (ब्रह्मण उपरितनाः) आपः सुस्रौवुः (सुषृवुः) । ताः सुमेरोरभ्यपतन्, तासां संस्पर्शात् पवित्रतरा आसन् । यदसौ महताकायेन द्यावाभूमौ व्याप्तवान् तदिदमुक्तं महाविष्णुरिति । यः कामयेत सर्वमिदं भवेयमिति, सोऽनेन मन्त्रेण तमुपासीत स तत्सर्वं भवति यश्चैवं वेद, यश्चैवं वेद ।५। तद् वा इदमग्रे सलिलमासीत्, स प्रजापतिः प्रजां स्रष्टुं लोकान् पश्यमानो वभ्राम । सोऽन्तः सलिले विचरन्तः कूर्ममपशयत् । तमपृच्छत्, कस्त्वमिति ? सोऽब्रवीत् पुरुषोऽहमिति । तं प्रजापतिरब्रवीत्, कः पुरुषः इति । साऽब्रवीत्, येनेहसत्येन ज्योतिषा काष्ठमिवाऽग्निनापूर्ण्णं सवै पुरुष इति । तं प्रजापतिः प्रणिपत्याऽब्रवीत् भगवन् ! येन ते रूपेण जगदिदं पूर्ण्णं तन्मेदर्शय प्रसीदेति । तस्मै प्रादर्शयन्नारसिंहमनाद्यन्तज्योतिर्मयम् । प्रजापतिर्भूयोभूयः प्रणम्य शिरस्यञ्जलिं निधाय भगवन् ! अदृष्टमश्रुतं स्वात्मानं विभासमिदं रूपं दृष्ट्वा महान्धकारो मेऽनुनश्यतु । प्राप्ताः सर्वकामाः, एतदेव परमं रूपं, जगन्मोहनाय अन्यानि रूपाणि विदधत्स्व । त्वामनेनैव रूपेण कथमहं पश्यामीति । तं भगवान् अब्रवीत् न त्वमर्हसि सर्वदा रूपमिदं द्रष्टुं, त्वं हि मया जगत् सृष्टौ नियुक्तः । ये पुनरखिलकर्माणि विसृज्य महानारायणायैवोपासते ते खलु इदं रूपं द्रष्टुमर्हन्ति । त्वमपि निवर्त्तितकर्मा मामेदं द्रक्ष्यसीति । तं प्रजापतिरब्रवीत्, भगवन् ! न दृश्यन्ते लोकाः, सलिलमेव दृश्यते । कुत्र प्रजाः सक्ष्यामीति । तस्मै भगवान् अस्याऽनुष्टुभः चतुर्थं पदमुपादिशत् । तेनोपास्यमानः स्वयमेवाऽग्निर्भूत्वा तदधाक्षीत् जलमशेषम्। ततो निर्जलेषु प्रजापतिः प्रजायथापूर्वमसृजत । यः कामयेत सर्वान् कामान्

भोक्तुं शक्नुयादिति । सोऽनेन मन्त्रेणाऽग्निरूपं नरसिंहमुपासीत । अग्निरिव काष्ठानि सर्वान् भोगान् भुङ्क्ते । यश्चैवं वेद यश्चैवेद इति ।६। इन्द्रः प्रजापतिमुपससार, ब्रह्मजिज्ञासमानसं तं प्रजापतिरब्रवीत् । तपसा ब्रह्म जानीयास्तपो वै ब्रह्मेति । सोऽब्रवीत् किं तपः करवाणीति, तं प्रजापति- रब्रवीत्- उपासनैव तत् तपः, तदुपासनया जानीया इति । सोऽब्रवीत् कथमुपास्य इति, तस्य (तम्) प्रजापतिरस्याऽनुष्टुभः पंचमं पदमुपादिशत्, अनेन मन्त्रेण सर्वतश्चक्षुः सर्वतः श्रोत्रं सर्वतः शीर्षं (शिरः) सर्वतः पाणिः सर्वतः पादः सर्वतो मुखं पुरुषम् उपास्य सर्वभूतमेव तं ज्ञास्यतीति । तत्रैवं ब्रूयात् लोकानामुत्पत्तौ पालने बिलोपने च स इत् कर्त्ता । तस्य यद्विलोपनं रूपं तन्मुखम्, यत् पालनं तद्वक्षः, यदुद्भवाय तन्नाभिः । यन्मुखं विलोपनं तद्घोरनृसिंहस्य एवाऽभूत् । यत् पालनं तद्वक्षः, तच्छ्रियोनिकेतनम्, अभूत्, यदुद्भवाय नाभिस्तदस्य प्रजापतिरासीत् । अथाप्याहुः - अग्निर्वाऽस्य मुखम्, तस्मादग्नौ ब्रह्माजह्यति । यदग्निमुखं तद्घोरं नृसिंहस्यैवाऽभूदिति । तथाप्याहुः - विविधान् हि पशूनसौ ससर्ज ग्राम्यानाऽऽरण्यांश्च । यदस्य रूपं नरस्यैव स्याद् ग्राम्यपशुभिरारण्या बाधिताः स्युः, यदि सिंहस्यैव (सिंहस्येव वा) आरण्यैः ग्राम्या वाधिताः स्युः । तस्मादस्य नारसिंहरूपमभूत् उभयेषां पशूनां पूर्त्या इति, तदेतदुच्यते नृसिंहं नृसिंहमिति ।७। मानवः किलपुरा रुद्रोपसृष्टः पुंस्त्वात् प्राच्यावितः पुरोहितं वशिष्ठमपससार । सोऽस्याऽनुष्टुभः सप्तमपदमुपादिशत् । अनेन मन्त्रेण प्रकृतेः परं पुरुषमुपास्य ताभिर्मायाभिरासुरीभिः राक्षसीभिः रौद्रीभिः मानुषीभिरूपास्यमानं मायेशं देवं नरसिंहमिति । सोऽनेनोपास्त तस्य रौद्री माया व्ययंगात् (व्यगात्) स्वप्नया पुंस्त्वमवाप, अभयंकर आसीत् । सोऽन्ते प्रकृतेः परं पुरुषमवाप । यो विभीयाद् रक्षोभ्यः पिशाचेभ्यः, शत्रुभ्यः, पाप्मनो वा सोऽनेन मन्त्रेण तं नरसिंहमुपासीत। स वै तैरनाहष्यो भवेत् । अथ हैनं सर्वे समानयेयुः, तस्मै नरसिंहस्य पदं प्राप्नुयात् । तस्मै अर्थात् सः ।८। इन्द्रो वृत्रमहन्, तं ब्रह्महत्या समाऽऽवृणोत्। तं देवा नाऽभ्यनन्दन् । स विभेषन् (विभ्यन्) अलीयत परमायां गुहायाम् । ते देवास्तामपश्यमाना व्यचिन्तत् । तं सत्येनाऽन्वैच्छं स्तं सत्येन नाऽन्वविन्दं

स्तं तपसाऽन्वैच्छन् तं तपसा नाऽन्वविन्दन् । तं दमेनाऽन्वैच्छं स्तं दमेन नाऽन्वविन्, तं यज्ञेनाऽन्वैच्छं स्तं यज्ञेन नाऽन्वविन्दन्, ते प्रजापतिमब्रूवन् । प्रजापते ! त्वं न इन्द्रं ब्रूहि इति । अपश्यामोऽन्विच्छन्तः । स प्रजापतिः अभिध्यानाद् अपश्यत् परमायां गुहायां निविष्टमिन्द्रम् । तमभ्येत्याऽब्रवीत् । इन्द्र ! निर्गच्छ, त्वां देवा अन्वैच्छन्त इति । स मेऽब्रवीत्, विभेमि निर्गच्छन्तुमिति । स तस्मै प्रजापतिः भद्रमिति मन्त्रमुपदिश्याऽनेन मन्त्रेण देवं नरसिंहं श्रिया सह रममाणं अनन्तेनोपासितं भद्रमुपास्व, मुच्यसे ब्रह्महत्यायाम्, (याः) श्रैष्वसे (श्रैष्यसे, श्रयिष्यसे) श्रिया, श्रद्धास्यसे देवैः इति होवाच । सोऽनेन मन्त्रेण तमुपास्य(स्त) आमुच्यते ब्रह्महत्यायाः श्रयत श्रिया सह श्रयद् देवैरधीयत च । योऽनेन मन्त्रेण भद्रं नरसिंहमुपास्ते स महद्भिः पातकैः मुच्यते । श्रिया श्रयते श्रत्संजातैः ध्रियते नरसिंहस्य सलोकतामाप्नुयात् स लोकतामाप्नुयात् ।९। देवा ह वै पुरा मृत्योर्विभ्युः ते प्रजापतिमभ्येत्य उचुः । प्रजापते ! मृत्योर्भीता वयं त्वां प्रपदयामहे । मृत्योर्भयं कथं नो न स्यादिति नश्येत् इति वा ।) तेभ्यः प्रजापतिरस्याऽनुष्टुभो नवमं पदम् उपदिश्य उवाच । अनेन मन्त्रेण देवं नरसिंहं मृत्युपाप्मानं विदारयन्तमुप- तिष्ठध्वमिति । ते देवा अनेन मन्त्रेण तं नरसिंहमुपतिष्ठन्तः ते मृत्युपाप्मानं व्यजयंस्तेऽमृतत्वमवापुः । यः कामयते मृत्युपाप्मानं जयेयमिति सोऽनेन मन्त्रेण तं नरसिंहमुपासीत । नाऽस्याऽकाले मृत्युर्भवति । अमृतो भूत्वा तस्य सायुज्यं प्राप्नुयात् सायुज्यं प्राप्नुयात् ।१०। वामदेवोऽङ्गिरसम् पितरमुपससार भगवन् ! यज्ञानां कोयज्ञः परम आहुरिति, तस्मा एतदब्रवीत्, आत्मयज्ञ इति, स पुनरपृच्छत्, कः आत्मयज्ञः इति । तमङ्गिरा अब्रवीत् । आत्मनं हविध्यात्वा परमात्मन्यग्नौ जुहूयात् । स आत्मयज्ञ इति । तं वामदेबोऽब्रवीत्, केन मन्त्रेण कुर्य्यात् । न ह्यमन्त्रको यज्ञः संम्भवतीति । तमङ्गिरा अब्रवीत्, नरसिंहविद्यायां दशमेन पदेनेति । तं वामदेवोऽब्रवीत् भगवन् ! तं मे प्रयच्छेति । स तस्मै तं मन्त्रं प्रोवाच । स तेनाऽऽत्मानं परमात्मनि अग्नौ हुत्वा सर्वं संवाप्य तद्भावेन लोकानचरत् । शक्तो योऽनेनमन्त्रेण इमं यज्ञमनुतिष्ठेत् स सर्वं संवाप्य ब्रह्माभूतः लोकान् शक्तश्चरति, इत्यात्मज्ञः । आत्मयज्ञ उक्तः कर्मयज्ञोऽतः परम् । कर्मसन्न्यासे गुरोर्गृहीत विद्योऽभ्येत्य,केशान् विसृज्य विहाय कर्माणि

सर्वजनेषु मैत्रीमावध्य सर्वेन्द्रियार्थेभ्यः आत्मनः प्रत्यहृत्य आत्मा, सच्चिदानन्द लक्षणं नृसिंहं विद्याया उत्तमपदप्रतिपाद्यम् अनुसन्दधानत-स्तदन्ति (न्तः) सं पदमावर्त्तयेत् । (अर्थात् सोऽहम्) विलोलेषु कर्मसु प्रशान्ते चतसि परमं सुखरूपं अतीन्द्रियं स्वसम्वेद्यम् उदीयानं तस्य कृते न प्रयोजनं, नाऽकृतेन, स ब्रह्म भवतीदं वेदरहस्यम्, वेदरहस्यम् ।११।

॥ श्रीनृसिंहतापनीयोक्तवृहन्नृसिंहोपनिषत् समाप्ता ॥

ॐ अथ पुरुषसुबोधिन्याः प्रथमप्रपाठकः ॐ

ॐ आसीन्नित्यमानन्दं स ब्रह्म । न जननमदृष्टमसूक्ष्ममव्यक्त-मव्यवहार्य्य मग्राह्यमध्येयमवध्येयमविज्ञेयमतर्क्यमबोध्यमचिन्त्यसंख्य-मेकम् । न तमो, न गन्धवती, नोष्णं, न शून्यं, न वायुः, नाग्निः नाऽऽपो, न पृथ्वी, न तत्त्वं, तत् केवलं सिद्धशुद्धबोधयम् । स रूपः, स विष्णुः, स ब्रह्मा, स शिवः, स शक्रः, स चन्द्रः, स सूर्य्यः, स कालः, स सुखदयादिः, गुरुः आनन्दनिधानः, शिवः, पिता स्वयंभूः सहोदरः कृष्णधाम त्रिगुणात् परः, इत्यत्र श्लोका भवन्ति - ज्ञाने सरस्वतीनिष्ठा स कामे रुक्मिणीप्रिया,

लीलारूपं राधिकायाः सिद्धं सन्न्यासमुत्तमम् ॥
सुषुप्तो नीलगीः सिद्धा स्वप्ने सिद्धा च रुक्मिणी ।
लीलायां राधिकासिद्धा नाऽतः साधन पद्धतिः ॥
पूर्वांशे तामसो प्रीतिर्मध्यांशे राजसी ततः ।
सात्विकी योगनिद्रायां कालाऽतीतं नमस्कुरु ॥

॥ इति प्रथम प्रपाठकः ॥

ॐ अथ द्वितीय प्रपाठकः ॐ

अथाऽत स्तामसी, सा च प्रकृतिः कृष्णा, सा सरस्वती नित्यैका, सद् सदाऽऽधारभूता, ज्ञानप्रदा, निष्कामा, परमाविद्या, सिद्धा, यतो महत् प्रसिद्धा, सगन्धा, सिद्धपीठा, वहुभेदा, नित्या, सुस्वप्ना यत्राऽऽहाऽऽमुष्यं केवलम् । नभोरूपं स वायुः स चेतनक्रियाऽऽत्मकः, स गुणः, स कालश्च, यत्र कामाऽग्नि हिंरण्यवर्ण्णः तत् परिणामं जलं, तदनुभावा भूः, तत्रत्वं पुमान् इति, ब्रह्माण्डमिदम् । ॥ इति द्वितीयप्रपाठकः ॥

ॐ अथ तृतीयप्रपाठकः ॐ

अथैतस्मात् परतः केवलं तद्धाम, यत्र लीलया स्वयं ब्राह्मणोगुरुः । कृष्णश्चतुर्भुजस्तस्मिं स्तदंशः, परमो भक्तो नित्यमुक्तः सनातनः ।

त्रिकालज्ञो ज्ञाननिष्ठः कृष्णैकहृदयप्रियः ।
जाग्रत् स्वप्नसुषुतीनां जितनिद्रः परः सुखी ।१।
कृष्णसङ्गी कृष्णवन्धुः ज्ञानध्यानपरायणः ।
त्रिकालात्पर एवाऽऽसीत् निष्कामः कालनाशनः ।२।
निरीहो निर्गुणो नित्यः कृष्णलीलासु तत्परः ।
नित्यानन्दो नित्यसुस्थो नित्याऽहंकारवर्जितः ।३।
कृष्णजीवः कृष्ण आत्मा कृष्णप्रीति विवर्द्धनः ।
स्वेच्छाऽऽचारी शुद्धज्ञानो सन्न्यासी कृष्णजीवनः ।४।
(अहं शून्यो मये वुद्ध्या हृदि यद् यत् परुच्छिदम् ।)
अहं शून्यो मयो वुद्ध्या हृदि यद् यत् परुच्छिदम् ।
स्वभावमति संचारविहारादि प्रतिष्ठितम् ।५।
केचिद् भक्ता मनोनिष्ठा वुद्धिनिष्ठाश्चसात्विकाः ।
केचिदात्मपदाधीना श्चित्तधर्मास्तथाऽपरे ।६।
केचिद् ज्ञानेन्द्रियाः केऽपि कर्मेन्द्रियाः सलीलया ।
एवं भावैर्जगन्नाथे भक्तिमुत्पादयेत् सुधीः ।७।
दिवारात्रं कालरूपं विनिर्माय सकौतुकाः ।
एवं निशापदे भक्ताः (निराऽऽपदे) कृष्णलीलाविधिं ययुः ।८।
महानिद्रा यत्र शक्तिर्निशेव परमां पुरी ।
सुरभिर्यत्र ब्रह्मज्ञा तत्राऽहं केवलं सुखम् ।९।

अथ मे भ्रातः ! शेषदेव राम ! निद्रां स्वप्नवतीम् अत्युग्रां जडां मुंच । कतिवारान् संस्मृते विधौ जाड्योऽसि, एषारुक्षा निष्करुणा गुणवती माया क्रूरा स्वायंभुवं सर्वं कृष्णभ्रातरं वासुदेवं त्वाऽन्धैव (त्वां ह्येवं वा) प्रत्यावृणोति, (त्वाऽन्धेव वा) इदं (अस्यां) जगत्यां च तद्वश्योऽसि, संसारिगमुक्तश्च (संसाररिणोऽमुक्तश्च) तपसः सकामेनाऽऽत्मानमनाध्याय स्वे धाम्नि वंचितोऽसि, इदं जगत् नष्टमिति । इयमेवाऽविद्या मद्दर्शनात्

पुरस्ते मन्दं मन्दं याति । तद्भिन्नरुचिं नाऽऽस्वादयन्त्वेन्द्रियाः । स्वप्नाऽभिभवे नीरसाऽग्रं जगत् विचेतनं विततं विनष्टम् । त्वमाऽऽत्मानं विस्मृतवानसि । इदमेव तुरीयमिति, इदं तद्धाम । यत्र स्वनामनिष्ठैः भक्तवालकैः सह क्रीडन्तं कृष्णं त्वद्भ्रातरं पश्य, तस्य प्रीतिं रचय, लीलया तत्समं सुरभिं विद्यां रक्षय । तत् क्रीडां विरचय, तवाऽस्मिन् परमे धाम्नि स्वात्मानं धारय, इदं यत् कृष्णं तत् परमंधाम, तत् सर्वेषां भवतश्च नामेत्यव्ययमहं संपादय । यत्र जरामरणं नाऽस्ति, चिन्ता नास्ति, मनोनास्ति, अहंकारो नास्ति, यत्र विना भक्तं मां च कोऽपि न जानाति, यदर्थे महेशोऽपि साधकः, तद् भक्तो भव, तत् सज्जीभव, अहमेव तच्छक्तः स्वस्येति प्रसिद्धा च (अहमेव तच्छक्ता) इत्युक्त्वा पश्यतस्तस्य पुरः कृष्णांशे स्थिता इति ॥

॥ तृतीय प्रपाठकः समाप्तः ॥

* अथ चतुर्थ प्रपाठकः *

अथ सुषुप्तौ रामः स्वबोधमाधाय इव कं मे देवः, क्वाऽसौ कृष्णः, योऽयं मे भ्रातेति तस्य का निष्ठा ? ब्रूहि इति । सा वै उवाच - तत्र तस्याऽगाधमहिम्नः सुखसिन्धोरहं शक्तिः महानिद्रासुखदायिनी, यत्रेदं सुस्वप्नम्, सुरहस्यं मच्छायैव महानिशा सिद्धपुरी । तत्रैक देशे मथुरायां लीलया वसुदेवत्वेन विकल्पनया स्वं द्विधा संस्थाय वसुदेवः कश्चिद् आधारभूता तमोरूपा देवकीति कारितस्याः छाया इव रोहिणी सुगन्धा च वासुदेवौ रामकृष्णौ । रोहिण्यां रामः देवक्यां कृष्णः अयमहं द्वयो भवतोरौरसे एवमाविभूतयो स्तयो र्भवानहं कृष्णः ।

" एवं च गोकुले रामोऽहं च कृष्णोऽपि माथुरे ।
गोपलीलाव्रताः भक्ताः गोप्यस्ताः श्रुतयः (स्तुतयः) स्मृताः ॥१॥
सिद्धार्थवादिनी देवी राधिका यत्र भक्तिदा ।
वेदसार्थाः गोपवालाः सामसिद्धार्थगायकाः ॥२॥
स्वयं कृष्णो वेणुवाद्यै स्तत् तन्नाम विकल्पयेत् ।
सुरभिं परमां विद्यां गोरूपां परिपालयेत् ॥३॥
नानाक्रीडारसैर्भक्तैर्मायूरपुच्छसन्निभम् ।

चित्रं चित्रसुधासारसमं संगीतगायकैः ॥४॥
सख्यमुत्पाद्यते तस्यां यस्य देवस्य भक्तितः ।
तत्रान्तरे कृष्णः - श्रुतिभूषामेकरूपां कर्णान्तकुसुमोपमाम् ॥५॥
तत् पदार्थाऽन्तरवाच्यां हृत्स्वर्णसरसीरुहाम् ।
आश्लिष्य हेमलतिकां सुखमुत्पादयेत् सुधीः ॥६॥

तत्रान्तरे स द्वारकायां सकलभूतचूडामणिः श्रीकृष्णोऽष्टसिद्धिदः कामार्दी श्चोत्पाद्य तेन समं समायातोऽहमपि (याताऽहमपि) भवतो र्द्वयो सङ्गित्वेन बोधकत्वेन सहचरत्वेन सोदरत्वेन एकत्रमिलितमिति । अथ पुरुषोत्तमो यस्यां महानिशायां श्रीपुरुषोत्तमाऽभीधयिनी पुरीयं साक्षाद् ब्रह्म । यत्र परम - संन्यास स्वरूपः कृष्णः कल्पपादपः सुमुखं ससुखं, नित्यमङ्गिरादिसिद्धमहानिद्रेति शक्तिः । सुस्वप्नं स्वमहं नीलसरस्वती विद्या लक्ष्मीर्गन्धवती राधिकेति च विमलेति । यत्र मथुरा गोकुलद्वारका वै कृष्णपुरी श्वेतपुरी, रामपुरी, शिवपुरी, यमपुरी, नरसिंहपुरी, नारायणपुरी, कुवेरपुरी, गणेशपुरी शक्रपुरी । यत्र सुरसा पातालगङ्गा रोहिणीकुण्डम् अमृतकुण्डमित्यादि नानापुरी । यत्राऽन्नं ब्रह्म परमं पवित्रं शान्तोरसः कैवल्यं मुक्तिसिद्धिर्भूर्द्धि-र्महत् तत्त्वमिति । तत्र न जरा न मृत्युः न कालो न भङ्गो न जयो न विवादो न हिंसा नाऽशान्ति र्न निद्रा न स्वप्नम् एवमेव लीलाः कामचराः स्वविनोदार्थं भक्ताः सोत्कण्ठिताः सुरहस्यलीलाः क्रीडन्ति कोऽपि गीर्रूपः, लक्ष्मीसमा का च राधिकासमा च कोऽप्यक्रूरसमश्च कोऽप्युद्धवश्च, के च ब्राह्मणाः शिवश्च योगी च ज्ञानी च कर्त्ता च भोक्ता च । केऽपि देवा मत्स्यदेव इव वेदांश्च गायन्ति, के चाऽन्ये कुर्मादयः स्वभावाः । केऽपि ऋषयः पितरो भ्रातरो वान्धवा सदारादय इत्यादि लीलारसिका भक्ता विरहन्ति । एतेषामात्मनः साक्षी कृष्णः, अत्र श्लोकाः -

एको देवो नित्यलीलाऽनुरक्तो भक्तव्यापी भक्तहृद्यन्तरात्मा ।
कमाऽ६ यक्षो भक्तभावानुवादो क्रियासाक्षी भक्तजीवो निरीहः वा । इति ।

स श्रुतिरूपां सुरभिमिव रक्षति लीलया वेदार्थप्रतिबोधितै र्भक्तैः सह क्रीडति । तत् तत् प्रतिपादने भक्तगणे स्वानुभावस्तत् पदं यत् सोऽतिगृह्णाति, समास्वादयति, विनोदयति, विलापयति अनुमोदयते च । तदनुभावाद् भक्ता

गोपिका इव तद्भावरसिकाः तत्पतित्वेन भजन्ते । बन्धुत्वेन केचित्
अनुगृह्णन्ति, पुत्रत्वेन केऽपि प्रेमोन्नतिं कुर्वन्ति केचित् सुरभिं पालयन्ति ।
भक्तास्तद्भावरसिकास्तत् प्राणास्तज्जीवनास्तन्नामपरायणास्तल्लीला-
रसिकाः, कोऽपि वसुदेव इव जननविकलः, कोऽपि देवकीव स्तुतिपरस्तत्र
कोऽपि जात इव स्वयं कृष्णो वसुदेवक्रोडस्थः गोकुलमायातः,
कोऽपिनिद्राहतचेतो यशोदासुतः, कोऽप्यहमिवाऽमायिकः, तं कृष्णं विहाय
सहानीतां मथुरायां नीतः । कोऽपि पूतना इव कृष्णकण्ठ सतत विद्यातत्परः,
केचिन्निर्भरक्रीडारसोन्मादकाः सुरभिरक्षण-विनोदचित्ता वेणुस्वनै मुरजवाद्यैः
कृष्णं नृत्ययन्ति । कोऽपि राधिका इव प्रेमाकलितचित्त विकलाऽऽर्त्तः कृष्णं
याचते । इत्यादि सुस्वप्ने प्रशंसिते (प्रशमिते) लब्धबोध इव जाग्रन्निव परमार्थ
इव आनन्दात्मक इव अनुभावरसिक इवेति । रामः - देवि ! महानिद्रे कात्वं
शक्तिः, या च महानिद्रा, का चाऽहं शक्तिः या च महानिद्रा त्वमेव परमाशक्तिः,
का च महानिशेव पुरी, यत्र पुरुषोत्तमः प्रसिद्धः, तत्र सुस्वप्नं किं "स्वमपि किं
वा कथं लीलया बसुदेवोत्वेन कल्पनां द्विधा विधाय बसुदेवदेवक्योः
प्रस्तुतिस्तदंशा च कथं" रोहिणी, कस्माद्, वासुदेव देवक्यां जातः, रामः
कथं रोहिण्याम् । द्वयोरंशे कथं त्वं शक्तिर्भवसि, का च मथुरा, गोकुलं च किं,
द्वारका का च, निष्ठा ब्रजबालका वेदार्थ इव कथं वा प्रसिद्धाः, सुरभिर्विद्या
च, गोपीश्रुतिरित्यादिः पृच्छतीति । सा वै ह्युवाच, भ्रातः ! देव ! महाराम !
सर्वेषामेकमेवाऽक्षरं नाम महामन्त्रं स्वरूपं तदपि कृष्णस्य तदहम् । एतद्
रहस्यं योगिनो न जानन्ति । ज्ञानिनो न जानन्ति, देवा न जानन्ति, ऋषयो
न जानन्ति । परमनिगूढमनुपम कृष्णस्य केवलं सुखत्रिगुणात्परं ऋग्यजुः
सामवेदात् परं ॐकारात् परं अक्षरात् परं तुरीयातीतं । यत्र न दुःखं, न
शोकं, न मोहः, न जरा, न मृत्युः, न कालः, न निद्रा, न स्वप्नं, न सुप्तिः, न
तमः, न प्रकृतिः, न त्वं, नाऽहं, नोष्णं, नाकाशो, न शब्दो न वायुः न स्पर्शः,
नाऽग्निः, न रूपं, नाऽऽपो, न रसो, न पृथ्वी, न गन्धो, न विकृतिः, न
विरतिः, न विग्रहो, न माया, न गुणश्च । ज्ञानमात्रम् अस्तिमात्रम् सत्तामात्रं,
परमाणम्, असंख्यम्, अनन्तमेकं नित्यमस्तित्वेन प्रसिद्धम् । तस्य स्वतो
लीलास्वभावः, तदनुग्रहशक्तिः, तस्याऽहं विना न प्रसिद्धिः । स च स्वतो

लीलया चिन्तामणिप्रभां महानिशानामपुरीं कनकमयीं लीलाऽचलस्थितां
सुखमकल्पयत् । तत्र सुस्वप्नं स्वरूपमिव । सकलोपनिषदर्थमिव वासुदेवमिव
चतुर्भुजमिव परमशान्तमिव कृष्णमिव कौतुकमिव विग्रहमिवाऽहमिवोत्पादन-
मिव सुविलासलालसमिव सुकल्पितभक्तजनमिव एकमेवाऽभेदं समवृत्तं परमहृदं
परिजनमिव मिलितं लीलायितं ज्ञानभक्तिवैराग्यसौमनस्यत्वेनैवैकी-
करणतया स्वीयानं (शयानं) शान्त्युक्त जनानिव (सान्त्वोक्त, शान्त्वक्त)
लीलारहस्यविदितज्ञानान्, स्वभव्यक्रीडार्थं (स्वभाव्य) मात्रात्मको रसदो
वासुदेवः । स्वतः सच्चिद्विनोदमात्रं शुद्धज्ञानिनं परमभक्तः सात्विकं
वासुदेवत्वेन संचिन्त्य तदंशरूपा तमस्प्रकृतिः परमोपनिषद् देवकीव
परानुभृता, सा च कृष्णभावा त्वं तदंशाराजसी रोहिणी चेति तस्मिन्
नियतवसतिः । कस्य वसुदेवस्य धर्मस्य तत् सुतत्वेन सुप्रसिद्धो वासुदेवः,
आदिभूता लीलामानुषविग्रह इव देहीदेवक्यां जातः, केवलाऽनुभवाऽऽनन्द-
स्वरूप इव परमार्थ इव गीयते सद्भिरेवं वस्तुतो जन्ममरणशून्ये, महानिशापदे
तस्याऽस्य भगवतो जननमिव बोध्यं ध्येयं, मेयं, हृद्यं सौख्यं, क्रीडनीयं,
केवल भक्तिग्राह्यं प्रेमलभ्यं न जन्म, इत्येवं स्वरूपं एवमेवं लीलामात्रं स्वतः
परमकारुणिकस्य भक्तस्य चेष्टितम् । तत् सच्चिद्विनोदमात्रमिति सुस्वप्नं,
रसदमिति तदग्रजत्वेन रामस्तत् संज्ञाप्रसिद्धः । स्वयम्भूरिति यत्र योगिनः
संसारिणश्च चित्तमत्ते शेते (मध्येऽशेषे) सूक्ष्मे परमे रमते शेते (रमन्ते,शेरते)
स एव चतुर्षु स्वगीरच्छिन्नेषु विद्यत इति । सृष्ट्यर्थं प्रथमतो मत्तो जात इव
स्वयंभूसद्देवानी (देवानां) लीलया तदनुरूपायाः (रूपायां) देवक्याः छायामिव
रोहिण्यां तद्विनोदार्थं त्वद्वीजो जात इव (वीजाज्जात इव) प्रसिद्धो न तस्य
वस्तुतो न जन्मेति स एव वासुदेवः । अतस्तौ द्वौ सुवृक्षौ सुपर्ण्णौ सहजौ
सखायौ सुमनौ, सुविद्यौ, निन्दोदित्यौ (दितौ) सुविग्रहौ, सन्न्यासिनौ, इत्यहं
शक्तिस्तत् पदसन्धानविशेषा न सावयवा । परमं धाम, सच्चैतन्यमात्रमिति
स्वाश्रयवृत्तिनिष्ठं तत्र निशायामशे (यां शेषे, यां शये, वा) (अत्र मन्ये कर्त्ता
अहमिति शक्तिः) यस्मादिदं सुस्वप्नं शान्ति रक्षणं स्वनाभिनिलयं
वाचनिकमाथुरं जगत् सर्वं मथ्यते, तच्छिद्यते, चूर्ण्णीक्रियते, परमाणुसमं
मनोनिष्ठं वासुदेवपरं, तत्र स्वमहं ब्रह्मेति तदविहार, धाम इदं देवदुर्लभं

स्वप्रकाशं कायिनं पार्थिवं गोकुलं श्रुतिपरं यमुनान्तरितं मूलाधारस्वरूपं महानिवृत्तिफलदं नित्यं वसन्तोद्भिन्नं, वृन्दावनोपवृंहितं सुखदं गोपलीलयं (निलयं) भक्तप्रियं । यत्र राधिका योगनिद्रा भक्तिलक्षणा, प्रेमविलासिनी, मधुरभाषिणी, वृन्दावनविहारिणी, भक्तिलक्ष्म्या सिद्धेति । तत्र नन्दनन्दनत्वेन आनन्दरूपस्वरूपेण स्वयं ब्रह्म यदुपतिः भक्तब्रजबालकैरिव वेदार्थसहोदरैः स्वनामपरायणैः समं हेममूरलीं वादयन् कल्पतरुमूले सुरभिविद्यामरक्षीत् । विमला स्वरूपा श्रुतिरिव परमासिद्धा सात्विकी योगनिद्रा यशोदाप्रतिकृतिरिव सा राधिका तन्निनादं श्रुतिगानं समाऽऽध्याय (समाऽऽधीय) तन्निष्ठा प्रतिष्ठते एका हृद्या कृष्णप्रियासमासुखप्रकृतिर्भक्तचेष्टितेति ।

॥ इत्याथर्वणि पुरुषसुबोधिन्याश्चतुर्थप्रपाठकः ॥

❊ अथ पञ्चमप्रपाठकः ❊

अथाऽतः कृष्णः तच्छुत्यर्थनिष्ठां तां सुरभिं विद्यां वेदार्थनिष्ठभक्त-जनाऽऽकर्षणयमुनायामक्रूराय दर्शिताऽऽत्मविभूतिः तया (विद्ययेत्यर्थः) सह मथुरामेत्य विविधदुष्टान् निहत्य तामेव विद्यामधीत्य गुरोरानीतमृतपुत्रको हरिः सकलशास्त्रार्थसाक्षीस्वरूप इव ब्रह्मात्मकः कृष्णः सुवर्ण्णमयीं तां विचित्रां द्वारकापुरीं सस्मार । सा च सप्तद्वीप पराशुद्धज्ञानोदयात् जन्मकर्माऽनुभावा, कृष्णलीलया सुहृदया रुक्मिणी समा, आकीटब्रह्मणो द्वारम् एककारणं जले । तत्र आकृतिसंस्थानं मानसिकं, मनोगम्यं, तदेवरूपाशुद्धापुरी सुविद्यात्मिका समुद्रान्तः स्थापिता प्रादुरासीत् । तत्र गोमतीतीरमथुरानृपतः सविधः सभक्तः सपरिच्छदस्तस्यां प्रकृत्यां मथुरागोकुलयो यद् यद् विलसितं तत् तत् कामादींश्च उत्पाद्य समूलकल्पपादपं मत्या वै नियोज्य स्थापिता (मत्यायै नियोज्य स्थापिता) राजराजेश्वरशिरस्यभिषिक्तः (राजराजसु अभिषिक्तः) शिष्टान् संपाल्य दुष्टान् निगृह्य तत् तद् भक्तानम्भसात् कृत्वा नारदायाऽऽत्म विभूतिं महाप्रलयं प्रदर्श्य दर्शितात्मज्ञानोद्धवकः कालं सक्षयं नात्माधृतकलेवरः श्रुतेः समक्षं स्वां श्वेतपुरीं विचिन्त्यात्राऽऽयातः श्रीकृष्णोऽहमिति । तत्र भावांश्च एवमेवं यथानिवृत्य कामादीनां वैरमुत्पाद्य एवं सस्मार, (सस्मर) अहमेव द्वयोर्भवतोरंशे एकत्वेन हृद्यत्वेन ज्ञेयत्वेन

मिलितमिति स्वनामवर्त्मना भक्ता विद्याश्च भक्तिश्च कृष्णांशे मिलितेव ।

एकीभूता यदा सिन्धौ नदानद्यश्च कोटयः ।
अपामापोऽग्निर्बह्नौ वद् आकाशः खेचनिषकलः ।
तथा सर्वाणि कार्य्याणि स्वेधाम्नि मिलितानिवत् ॥

॥ इति पञ्चमपाठः ॥

❊ अथ षष्ठपाठः ❊

अथातः ऋग्यजुः सामस्वरूपम्, अकारोकारमकारलक्षणं, ब्रह्माविष्णु शिवात्मकम्, इच्छाक्रियाज्ञानशक्तिनिष्ठम्, कायिकवाचिकमानसिकभावम्, सत्वरजस्तमः स्वरूपम्, कृत त्रेताद्वापराऽनुगीतम्, भूर्भुवः स्वर्लक्ष्यम् । ॐकारम् अक्षरं तुरीयं श्वेताक्षं धाम ब्रह्म आसीत् । तत्राऽन्तजीवपुरे सर्वान् भक्तवालकान् समानीय विविधरसकौतुकादिमहोत्सवं विधाय तैः सार्द्धं समाधिना एकीभूय स कृष्णोऽस्यां महानिशायां पुर्य्यामारुरोह । तत् तुरीयाऽतीते परमे धाम्नि विलक्षणे शक्त्यतीते प्रपञ्चाऽलक्ष्ये गुणात्परं कलेरपरं केवलं ब्रह्माविर्भूतं, तच्च पञ्चधा परिच्छदं, कृष्णोऽहं, भगवान्, भक्तश्च, सुदर्शनश्च । एतद् रहस्यं महानिशायां सुस्वप्नं पश्य यत्र "न जरा न मृत्यु र्न कालो न पापम्, न पुण्यं न निद्रा न स्वप्नं न शब्दः । न क्षुधा न तृष्णा न लज्जा न भयम् नरागो न वेशो न मोहो न दुःखम् ।" नाऽहं न समलसंस्कारा न मनो न वुद्धि र्न चित्तं नेन्द्रियाणि, न ब्रह्मा, न विष्णु र्न रुद्रो, न गुणं , न रूपम्, न स्थूलं, न जाति, र्न व्यक्ति र्न क्रिया, न ज्ञानं न शरीरं, न देहो नाऽऽदिर्नान्तं, नाऽऽत्मेति, केवलं तत्सुखं धाम । तस्मिन्नहमिव ते भक्ताः स्वनामाक्षरमहामन्त्रप्रसिद्धा धर्मस्वरूपाः सकलवेदार्थामत्स्याद्याविभावान् वेदानुद्धरणसंस्कारान् शक्त्यादिभेदान् आजन्म कर्मप्रतिष्ठाविहारान् कल्पयन्ति । गोविन्द वासुदेवरामकृष्णकल्क्याद्यात्मरूपं तन्वन्ति । यत्र अन्नं ब्रह्म, कपिला धेनुः स्वयं कल्पतरुः, सुरभिर्विद्या नरः कृष्णः । शयनं प्रणामो वाक् प्रचारः स्तुतिः पतिः प्रदक्षिणं सुस्वप्नं विहारो मृत्युरपुनर्भव इति तत्रैकस्मिन् कल्पतरौ त्वं साक्षाद् ब्रह्मा, कृष्णः स्वयं (सोऽयं, वा) भगवतोरंशैरहमिति ज्ञात्वा रामोऽपगतनिद्रः खण्डितमायास्वप्नः लब्धबोध

इवेषन् मिलितहेमाम्वुजलोचनो विघूर्ण्णितशिरः संकोचितकरचरणादयः मन्दं मन्दमस्फुटगम्भीरं जय जय कृष्ण ! जय जय देवि सुभद्रे ! जय जय गोविन्द ! जय जय सुदर्शन ! जय जय कृष्णविनोद तत्पर ! परमपुरुषाऽचिन्त्यमहिम्न ! परमभक्तवेदार्थपुरस्कृत सिद्धकलेवर-प्रतिम ! त्रैलोक्यविजित ! प्रसीद, जय जय देव ! प्रसीद । कल्पतरौ एकाऽऽकृतिरेकनिष्ठमेकपद्मम् एकमेव पृथक् नापृथक् नापृथक् न भेदो नाऽभेदः नाऽहं केवलमेकसुखं लीलामात्रं रसमात्रं विनोदमात्रं सुस्वप्नमात्रं परमप्रेमाऽऽस्पदं स्तिमितजलदश्यामसुन्दरं भ्रातरं तथा कृष्णमपश्यद् रामः । उभयांशे तथाऽहं भगिनीं महानिद्रां च गोविन्दं परमपुरुषं सुदर्शनं ज्ञानरूपं च कृष्णलीलारसिकैः स्वनामनिष्ठैः क्रीडता इव पञ्चविग्रहवन्त इव लीलारसाऽऽस्वादितामेवं क्रीडावतां चाक्षुषा इति । तत्राऽपि नानारूपधरैर्भक्तैः कृष्णलीलादिषूत्सुकैः । मथुरागोकुलद्वाराश्वेताऽऽख्यासु च यत् कृतम् ।१। तत् तत् क्रीडारसोन्मादैर्भक्तभावैरतन्द्रितः । चित्रमुत्पादयेद-रामः कृष्णप्रीतिविवर्द्धनः ।२। स्वयं तद्भावसादस्थैः हर्षोत्फुल्लैः सुखास्थितः । स्वनाम्ना मूलमन्त्रेण ह्वयते (हूयते) सकलं जगत् इति ।३। श्रीकृष्णोऽपि तद्भक्ताऽऽमोदनेन सह रामस्तत्र स्वमन्त्रेण निष्ठः स्थित इत्यहं चोभयांशे निगूढमित्येव रहस्यं नित्यं योऽधीते योऽध्यापयति यः शृणोति यः कथयति यो मनुते योऽधिरोहति स संसारान्मुक्तो भवति स भवतापाच्छान्तो भवति, स योगी भवति, स ज्ञानी भवति, स भक्तो भवति, स कृष्णानुसङ्गी भवति, स नरपूज्यो भवति । स नागपूज्यो भवति, स ब्रह्मर्षि भवति, स कल्पतरुर्भवति, स कृष्णप्रियो भवति स रमाप्रियो भवति, स सर्वेभ्यो दुःखेभ्यो भुक्तो भवति, स सर्वधर्मभाग् भवति, तस्य वाक्सिद्धिर्भवति, तस्येच्छा सिद्धिर्भवति, स सर्वज्ञो भवति, स सुखी भवति, स चाऽनन्तगुणवान् भवति, स विष्णुर्भवति, स रामो भवति, स सुविद्यो भवति, स राजा भवति, स महालक्ष्मीं प्राप्नोति । स पण्डितो भवति, स तेजो वलबुद्धिविक्रमवान् भवति, स चाऽसंख्यमहिमवान् भवति, स च असंख्यमहिमवान् भवति, स चाऽसंख्यमहिमवान् भवति इति ॥

॥ इति षष्ठप्रपाठकः ॥

॥ पुरुषसुबोधिन्याः पूर्वतापनीयं समाप्तम् ॥

❋ अथोत्तरतापनीये प्रथमप्रपाठकः ❋

अथ सुषुप्तौ रामः सुबोधमाधाय इव को मे देवः क्वाऽसौ कृष्णः, योऽयं मे भ्राता इति तस्य कां निष्ठां ब्रूहीति । सा वै ह्युवाच, राम, शृणु, भूर्भुवः स्वर्महो जनस्तपस्सत्यम् अतलं वितलं सुतलं रसातलं तलातलं महातलं पातालमेवं पञ्चाशत् कोटियोजनबहुलं स्वर्ण्णाण्डं ब्रह्माण्डमिति । अनन्तब्रह्माण्डानामुपरि कारुण्यजलोपरि महाविष्णो र्नित्यस्थानं वैकुण्ठम् । स होवाच, कथं शून्यमण्डले निरालम्वेन बैकुण्ठमिति । साऽप्युक्ता, पद्माऽऽसनासीनः कृष्णध्यानपरायणः शेषदेवोऽस्ति, तस्याऽनन्तरोमकूपेषु अनन्तकोटिब्रह्माण्डानि अनन्तकोटिकारुण्यजलानि, तस्य मस्तकोपरि सहस्रपरिमितानि फणानि फणोपरि बैकुण्ठं विष्णुलोकमिति, रुद्रलोकं शिववैकुण्ठं दशकोटियोजनविस्तीर्ण्णमिति । तदुपरि सप्तकोटियोजन-विस्तीर्ण्णं विणुचक्रं सुदर्शनमिति । तदुपरि त्रिकोटियोजनविस्तीर्ण्णं कृष्णस्य स्थानं गोकुलाऽऽख्यं, माथुरमण्डलं, महत् पदं, सुधामयसमुद्रेणाऽऽवेष्टित-मिति । तत्राऽष्टादलपद्मकेशरमध्ये मणिपीठे सप्ताऽऽवरणकमिति, स पप्रच्छ, किं रूपं, किं स्थानं, किं पद्मं, किमन्तः सेवकाः । किम् आवरणमिति । सा वै ह्युवाच, गोकुलाख्ये माथुरमण्डले वृन्दावनमध्ये सहस्रदलपद्ममध्ये कल्पतरोमूले, अष्टदलकेशरे गोविन्दोऽपि श्यामः पीताम्बरधरो द्विभुजो मयूरपुछशिरो वेणुवेत्रहस्तो निर्गुणः स गुणो निराकारः साकारो निरीहः सचेष्टो विराजत इति । द्वेपार्श्वे चन्द्रावली राधिका चेति । यदंशेन लक्ष्मीदुर्गा विजयादिनानाशक्तिरिति । पश्चिमे सम्मुखे ललिता, वायव्ये श्यामला, उत्तरे श्रीमतिः, ऐशान्यां हरिप्रिया, पूर्वे विशाला, अग्नौ श्रद्धा, याम्यां पद्मा, नैर्ऋते भद्रा, षोडशदलाऽग्रे चन्द्रावती, तद्वामक्रमतश्चित्ररेखा, तत् पार्श्वे चित्रकरा, तत् पार्श्वे कृष्णप्रिया, तत् पार्श्वे कृष्णवल्लभा, तत् पार्श्वे वृन्दावती, तत् पार्श्वे मनोहरा, तत्पार्श्वे योगिनन्दा, तत्पार्श्वे परानन्दा, तत्पार्श्वे सत्यानन्दा, तत्पार्श्वे प्रेमानन्दा, चन्द्रा, किशोरीवल्लभा, तरुणकुशला एवं विविधा गोप्यः कृष्णसेवां कुर्वन्ति । इति वेदवचनं भवति, इति वेदवचनं भवति, इति वेदवचनं भवति, मानसपूजया जपेन कीर्त्तनेन ध्यानेन स्मृत्या

मानसेन सर्वेण नित्यस्थलं प्राप्नोति, नाऽन्येनेति ।३।

॥ पुरुषसुबोधिन्या उत्तरतापनीये प्रथमप्रपाठकः ॥

* अथ द्वितीयप्रपाठकः *

ॐ पश्चिमादौ क्रमेण सेवारताललितादयः, पश्चिमे ललिता ताम्बुलं, वायव्ये श्यामला गन्धपात्रं, कौवेरे श्रीमतिः चामरं, ऐशान्यां हरिप्रिया रत्नमालां, पूर्वे विशालाश्वेतछत्रं, अशेषधातुलसीमालाऽग्नौ श्रद्धा, याम्यां पद्मा भोज्यपात्रं, नैर्ऋते भद्रा पट्टवस्त्रं, षोडशदलाऽग्रे चन्द्रावती मुक्तामालां, चित्ररेखा वनमालं, चित्रकरासुधापात्रं, मदाङ्गी मदनसुन्दरी पद्ममालां, श्रीदेवीरत्नछत्रं, शशिरेखा पीतवस्त्रं, कृष्णप्रिया मणिपादुकं, कृष्णवल्लभा चित्रकाष्ठं, वृन्दावती नीलछत्रं, धूपपात्रं मनोहरा, घनसारं योगिनन्दा, व्यजनं सत्यानन्दा, स्वर्णस्थालीकरेण प्रेमानन्दाऽन्नपात्रं, चन्द्रासेवानियोजितकिशोरिणः हास्याऽऽलापः, प्रथमा सहजानन्दा परानन्दा परात्मिका एताः गोप्यः कृष्णाग्रे नृत्यगीतः (नृत्यगीतरता इत्यर्थः) सव्यं रामानन्दा सिद्धा च सिद्धदायिनी एवं गीतगायनं, जया भद्रा पद्मा पद्मावती एता मृदङ्गवाद्यं, सत्यानन्दा क्रियानन्दा, आनन्दा शुभादयश्च सुदयाऽक्षलोमाङ्कुरी इत्यत्र वेणुवाद्यम्, कृष्णप्राणकरी, प्रेमविलासिनी ईश्वरी, प्रेमरमा, प्रेमपरमेश्वरी अत्र शृङ्गादिवादनम्, प्रेमोन्मादा, प्रेमसिद्धा, प्रेमाराध्या, प्रियम्बदा, प्रेमसाध्या, प्रेमगीता, प्रियंकरी वीणावाद्यतत्परम् । प्रथमाद्यासाध्या प्रसन्ना जयन्ती जया निश्चला-यमुनागङ्गाशुभभूषणा खवादनैः (खवाद्यानि) विमलानिर्मलावालानीला-सुशीलास्वर्ण्णरूपा स्वरूपिका कांस्यवाद्यम् । हेलाचेला सुवेला तरलासरला-विमलास्वरूपा शुभरूपा स्वर्ण्णगात्री शुभप्रदा यन्त्रवाद्यानि । कमला सुरला खेला सानन्दा नर्मदा मन्दा सुमदा सुखदा वेणी रत्नगायत्री जयप्रदा तालवादनं, कपिला पिङ्गलाक्षी कुटिला कृष्णपिङ्गलाकुण्डली कुण्डलाहार-मण्डली मण्डनप्रिया काष्ठवाद्यम् । सोमपाऽप्रमृतपासौम्या शुभाराधा स्वयम्बरा शंखवाद्यम् । सिद्धैश्वर्य्या तु वेताला गण्डपालि शुचिस्मिता, अमृतीवादनम् । रुक्ममाली वेतालिसिद्धैश्वर्य्या एवमर्द्दलं खतत्परम् । वाणीश्वरी सुकृष्णा नेपाली नाकुली एता गोप्यः सावधानाऽनुरक्ताः ।

॥ इति द्वितीयप्रपाठकः ॥

* अथ तृतीयप्रपाठकः उत्तरतापनीये *

ॐ साऽप्युक्ता, तस्य वाह्ये शतदलपद्मपत्रेषु योगं पीठे पुरः सक्रीडानुरक्ताः गोप्यः तिष्ठन्ति । एतद् वाह्ये स्वर्ण्णप्राचीरं, चतुर्द्वारपालाः चतस्रः गोप्यस्तिष्ठन्ति । ततः पारिजातवृक्षसमूहः । ततो दलपीठानि । ततः प्रथमाऽऽवरणे पश्चिमे सम्मुखे स्वर्ण्णमण्डपे गोपकन्याः, द्वितीये सुदामादिः । स्तोककृष्णादिः तृतीये । चतुर्थावरणे यमुनातटे सुरभ्यादिः । पंचमावरणे पारिजातमूले रुक्मिण्यादिवेष्टितो वासुदेवोऽपि । षष्ठाऽऽवरणे अनन्तः अपि यामलार्जुनवृक्षश्च । सप्तमावरणे शुकलो विष्णुर्द्वारपालश्चाऽस्य संकाशात् (सकाशात्) सहस्रसोऽवताराणि भवन्ति। एतद् वाह्ये ब्रह्मकुण्डमिति। तत्र स्नात्वा गन्तुं समर्थो भवति। उत्तरेपीठे प्रथमे (प्रथमाऽऽवरणे) स्वर्ण्णमण्डपे देवकन्याः, द्वितीये सुदामादयः, तृतीये सुभद्रादिः, चतुर्थे श्यामलादिः, पञ्चमे हरिचन्दनमूले रेवतीसहितो बलभद्रोऽपि, षष्ठे सिद्धगन्धर्वगणोऽपि, सप्तमे रक्तवर्ण्णद्वारपालो विष्णुरिति । एतद् वाह्ये श्यामकुण्डम् अत्र स्नात्वा प्रेमभक्तिः भवति। पूर्वे प्रथमावरणे योगपीठे स्वर्ण्णमण्डपे मुनिकन्याः द्वितीये सुदामादिः तृतीये सुभद्रादिः । चतुर्थे सुविमलादिः, पञ्चमे सन्तानवृक्षमूले रत्या सह प्रद्युम्नोऽपि । षष्ठे यक्षविद्याधराश्च । सप्तमे गौरवर्ण्ण द्वारपालो विष्णुरिति । एतद् वाह्ये राधाकुण्डम्, अत्र स्नात्वा गोप्यङ्गो भूत्वा कृष्णपूजार्हो भवति । दक्षिणे प्रथमावरणे श्रुतिकन्याः, द्वितीये किन्नरकन्यादिः, तृतीये लवङ्गादिः, चतुर्थे कामधेनुवृन्दम्, पञ्चमे कल्पतरोर्मूले उषया सह अनिरुद्ध इति षष्ठे सनकादिमुनयः । सप्तमे कृष्णवर्ण्णो द्वारपालो विष्णुरिति एतद् वाह्ये रुद्रकुण्डम् । अत्र स्नात्वा विष्णुरूपी भवति । यमुनायां स्नात्वा दर्शनाऽर्हो भवति । मानसपूजायां जपेन ध्यानेन कीर्त्तने न स्तुति मानसेन सर्वेण नित्यस्थलं प्राप्नोति, नाऽन्येनेति ।

॥ इति उत्तरतापनीये तृतीयप्रपाठकः ॥

* अथ चतुर्थ प्रपाठकः - वृन्दावनतापिनी *

ॐ सपृच्छति कतितद्वनानि (कियन्तिवनानि) केषु दलेषु कानि क्रीडास्थलानि, इत्युक्ते साऽप्युक्ता । भद्र श्री लोहभाण्डीर महातालखदिर

कावहुलाकमुदानि । काम्य मधुवृन्दावन द्वादशवानानि । कालिन्द्याः पश्चिमे सप्तवनानि । पूर्वे पञ्चवनानि । तत्र उत्तमं गुह्यमस्तीति, महावनं गोकुलाऽऽ-ख्यमिति । मथुरा मधुवनमिति, पञ्चभद्रादीनि पूर्वेण, उत्तरे सप्तशालादि खदिरखण्डिरनन्दनवनानि । नन्दीश्वरवननन्दनवनानि, नन्दखण्डवनानि, पलाशाऽशोककेतकी कुसुमसुगन्धाऽऽमोदनं च, केलिवनं, अमृतवनं, भोजनवनं, सुख (मुख) प्रसाधितवनं, वस्त्रहरणवनं, शेषशायिनवनं (शेषशायिनं वनं वा) श्यामवनं, गुह्यवनं, दधिवनं, श्रीमद्वनं (वा श्रीरामवनं) वृषभानुवनं, संकेतवनं, दीपवनं, रासवनं, क्रीडावनं, धूसरवनं, हेमद्रुमवनं, सत्ववनं (सत्यवनं वा), वीरवनम्, उत्सुकवनं, चन्दनवनानि । एतेन चतुरुत्तर विंशति वनानि (चतुरुत्तरचतुर्थानि वनानि वा) नानालीलामयानि नित्यस्थलानि इति, चतुर्विंशत्यधिक शतदलवाह्ये विष्णो र्योगपीठमिति । एतद् वाह्ये वैडूर्य्य प्राचीरंचतुर्द्धारं लक्षसूर्य्यसमुज्ज्वलं कल्पद्रुमाऽऽकीर्ण्णं (कल्पद्रुमेणैतत् कीर्ण्णं) एतद् वाह्ये स प्रावरणमिति । श्री वृन्दावनं यमुनादिवेष्टितं ब्रह्मादिसेवितं, योगीन्द्रादिध्यानतत्परं, कोकिलादिध्वनि मनोहरं, कपोतगावै सुन्दरं (कपोतशावैः सुन्दरं, वा) मयूरनृत्याढ्यं, कुसुमरेणु रञ्जितं, मन्दादिपवनसंयुतं वसन्तऋतु सेवितं (मन्दादिपवनसंयुतवसन्त-ऋतुसेवितम् वा) यत्र दुःखं नास्ति, शोकं नास्ति, जरा नास्ति, मरणं नास्ति, क्रोधाक्रोधं नास्ति । यत्र पूर्णानन्दमयः किशोरवयसः(नित्यः) नित्यम् अष्टकोणनिर्मितयोगपीठः, तत्र माणिक्यसिंहासने स्थितः गोपीजनवल्लभो दिव्यो ब्रजस्वरूपो ब्रजेन्द्रो ब्रजवालैकवल्लभोऽनादिरादिश्रुतिमुख्यः द्विभुजो दलितां जनदेहः, श्यामनीलकुटिलशिखंण्डिदलमण्डितः, तीर्य्यग्गुंजावतंसः मणिमयकिरीटशिरः, गोरोचनातिलकः, कर्ण्णयोः मकरकुण्डले, नासाग्रे मुक्ताफलं, सिन्दूराऽरुणाधरः, तीर्य्यग्ग्रीवः श्रीवत्सकौत्सुभधरः, मुक्ताहारविभूषितः, वन्यस्रग्मालतीदामः, चन्दनभूषितशरीरः, करे कंकणकेयूरः, कट्यां किंकिणिकः, पीताम्बरधरः, गभीरनाभिकमलः, सुवृतजानुयुगलः, ध्वजबज्रादिना चिह्नितपादपद्मतलः, (पादपद्मयुगलः वा) तद् अंशाशेनकोटिमहाविष्णुरिति । एवं रूपं कृष्णचन्द्रं चिन्तयेन्नित्यशः बुधः, इति । तस्य आद्या प्रकृतिः, राधिका, नित्यनिर्गुणा, सर्वालंकारशोभिता,

प्रसन्ना, अशेषलावण्यसुन्दरी, अस्मदादीनां जन्मदात्री, यस्या ह्यंशात् वहवो ब्रह्माविष्णुरुद्रादयो भवन्ति । एवंभूतस्याऽगाधमहिम्नः सुखसिन्धोरंशे नोत्पन्नः इति (त्वम् इति अवगन्तव्यः) ।

॥ इति चतुर्थप्रपाठकः समाप्तः ॥

* अथ पञ्चमप्रपाठकः *

अथ पुरुषोत्तमो यस्यां निशायां श्रीपुरुषोत्तमाऽध्यायिनी पुरीयम् । साक्षाद् ब्रह्म यत्र परमसंन्यासस्वरूपः कृष्णः, यत्र न्यग्रोधकल्पपादपः । यत्र लक्ष्मीर्जाम्बवती, राधिकाकमला, चन्द्रावलीसरस्वती, ललिताविमलादिरिति । साक्षाद् ब्रह्मस्वरूपो जगन्नाथः । अहं सुभद्रा, शेषांशः रामः (त्वमिति) तज्ज्योतिरूपः सुदर्शनः भक्तश्च । एकं ब्रह्मपञ्चधाविर्भूतमिति (विभक्तमिति) यत्र च मथुरा, गोकुलं द्वारका, वैकुण्ठपुरी, श्वेतद्वीपपुरी, शिवपुरी, नरसिंहपुरी, नारायणपुरी, कुवेरपुरी, गणेशपुरी, शक्रपुरी, एता देवताः तिष्ठन्ति । यत्र सुरसा पातालगंगा । श्वेतगंगा, रोहिणीकुण्डं, अमृतकुण्डमित्यादि नानापुरी। यत्राऽन्नं ब्रह्मपरमं पवित्रम् शान्तोरसः, कैवल्यमुक्ति सिद्धिभूर्बुद्धिमहत्तत्त्वम् । यत्र भार्गवी यमुना, समुद्रममृतमय मा रामं वृन्दावनानि, नीलपर्वतं पवित्रं गोवर्द्धनसिंहासनं, योगपीठं प्रासादमणिमण्डपं, विमलादिषोडशचण्डिका गोप्यः, यत्र समुद्रतीरे चरन्ति कामधेनोः वृन्दम् । यत्र नृसिंहादयो देवता आवरणानि, यत्र न जरा, न मृत्युः, न कालः, न भंगः, न जयः, न विवादः न हिंसा, न अशान्तिः, न निद्रा, नस्वप्नम् । एवं लीलाकामचराः स्वविनोदनार्थं भक्ताः सोत्कण्ठिता अस्यां लीलायां (लीलया, वा) क्रीडन्ति । कोऽपि गीर् रूपो, लक्ष्मीसमः का च राधिका समा च । कोऽप्य क्रूरसमः, उद्धवसमः, कोऽपि ब्रह्म, शिवश्च, योगी च, ज्ञानी च कर्त्ता च, भोक्ता च, केऽपि देवाः, के च देवा इव, वेदांश्च गायन्ति, के चाऽन्ये कूर्मादयः स्वभावाः, केऽपि ऋषयः पितरः, भ्रातरः, बान्धवाः, स्वभावादयः इत्यादि लीलारसिका भक्ता विहरन्ति । एतेषामात्मनः साक्षी कृष्णः । अत्र श्लोकः -

एको देवो नित्यलीलाऽनुरक्तो
भक्तव्यापी भक्तहृद्यन्तरात्मा ।

कर्माऽऽध्यक्षो भक्तभावानुवादी
क्रिया साक्षी भक्तजीवो नरेन्द्रः । नरिन्द्रः वा ।

वा - कर्माऽध्यक्ष्यः सर्वभूताऽधिवासः ।
साक्षी चेचा केवलो निर्गुणश्च ॥
(कोऽपि गोरूपो आरभ्य पुस्तके नास्ति शेषं यावत् ।)

॥ इति पञ्चमप्रपाठकः ॥

ॐ अथ षष्ठ प्रपाठकः ॐ

अथ मन्त्रं (यन्त्रं) प्रवक्ष्यामि यत् स्थलं नित्यमुच्यते ।
क्षणाऽर्द्धं कृष्णचन्द्रस्तु यत् स्थानं न परित्यजेत् ।१।
प्रेमरूपा यथा राधा तादृक् कृष्णस्तु कौतुकी ।
स्वशक्त्या विहरेत् तत्र तत् स्थानं न परित्यजेत् ।२।
दिव्यं वृन्दावनं स्थानं शेषांगस्थं च सर्वदा ।
ब्रह्मरूपमिदं स्थानं सच्चिदानन्दरूपकम् ।३।

यन्त्रस्वरूपम् - अष्टकोणं लिखेदादौ दशार्ण्णं तत्र विन्यसेत् ।
तन्मध्ये कामवीजं तु ध्यात्वा कृष्णं लिखेद्बुधः ।४।
नवभिः शक्तिभिः सार्द्धं सहकृष्णं तु राधया ।
संपूज्य योगपीठे तु (षु, वा) माधव्यादीन् स्मरेत्ततः ।५।
षट्कोणं च लिखेद् वाह्ये षड्वीजं तत्र विन्यसेत् ।
वृन्दावत्यादिं षट् शक्तीः, पूजयेत् साधकोत्तमः ।६।
वृन्दावती राधा देवी सुभद्रा च प्रियम्बदा ।
रत्नरेखा च नित्या च शक्तयः परिकीर्त्तिताः ।७।
इमाः षट्शक्तयः कृष्णे निगूढप्रेमदायिकाः ।
आसां मन्त्रं वीजषट्कं नमोऽन्तं प्रणवादिकम् ।८।
गोपनीयं प्रयत्नेन कृष्णप्रेमवहिर्मुखाः ।
तद् वाह्ये प्रथमावृत्ते अष्टौ तद् विन्दुलांछितम् ।९।
ललिताद्यास्तेषु पूज्या स्तासां मध्ये परास्मृताः ।
द्वात्रिंशदूद्ध्वरेखाः स्युः षोडशारं विभावयेत् ।१०।

सिद्धाः षोडशसाहस्रं गोपीनां तेषु पूजयेत् ।
चतुरस्रं चतुर्द्वारं लिखेत् पीठचतुष्टयम् ।११।
दक्षिणे श्रुतिसिद्धानां चत्वारिंशत् सहस्रकम् ।
प्रतीच्यां मुनिसिद्धानामष्टाशीति सहस्रकम् ।१२।
उदीच्यां साधनं सिद्धा लक्षविंश सहस्रकम् ।
पूजयेत् तत्परं चैव लक्षषडविंशपूर्वकं ।१३।
मण्डलादि चतुर्लक्षं साहस्रं पूजयेत् ततः ।

आसां यन्त्राणि आगमसंपादीनि ज्ञायन्ते । चत्वारो वेदास्तत्रैव गीयन्ते । वेदानां माता गायत्री तत्र तत्र पूज्या भवति । चतुर्दिक्षु चतुर्द्वारि अधिष्ठात्री देवता त्रिपुरा, चतुः शक्तिः सायुधाः स परिवाराः सगणाः संपूज्यन्ते।

क्रीडास्थलमिदं ज्ञेयं द्वितीयावृत्तमेवतु ।
तद् वाह्ये च चतुर्दिक्षु सरस्यः सन्ति निर्मलाः ।१।
चतस्रोऽमृतपानीया हंस पद्मादिसंकुलाः ।
पूर्वे सिद्धिप्रदा नाम्ना रत्नसोपानसंयुता ।२।
तज्जलस्पर्शमात्रेण ज्ञान चक्षुर्भवेन्नृणाम् ।
प्रेम भक्त्या तु पश्यन्ति न पश्यन्तीतरे जनाः ।३।
ततस्तद् दक्षिणद्वार्य्याऽऽनन्दप्रदसरोवरः ।
यत् पद्मगन्धमाघ्राय पुष्पिणो भ्रमराङ्गनाः ।४।
पतन्ति विवशास्तत्र कृष्णप्रेमसु विह्वलाः ।
ये च मायागुणाऽतीताः प्रेमभक्तिसमन्विताः ।५।
तज्जलं ये तु पश्यन्ति महात्मानो मनोहरम् ।
पश्चिमद्वारि संकीर्ण्णकाम्यपुष्करिणी परा ।६।
नानामणिसमाकीर्ण्णैः सोपानैस्तूपशोभिता ।
तज्जलस्पर्शमात्रेण साधका दिव्यरूपिणः ।७।
भवन्ति तत्क्षणादेव श्रीकृष्ण प्रेमभाजनाः ।
उत्तरद्वारि तत्रस्थो नाम्ना मलयनिर्झरः ।८।
मणिवैडूर्य्यसोपान पुष्परत्न समाकुलः ।

वसन्तोत्सवयात्रां तु कुरुते तत्र केशवः ।९।
ततो मण्डलवाह्ये च रेखायां केशरेषु च ।
सखाषोडश तस्यैव स गणान् पूजयेत् सुधीः ।१०।
रेखाया वाह्यभागे तु सन्ति कल्पमहीरुहाः ।
तन्मध्यस्थवेदिकायां सुरभिवृन्दमर्च्चयेत् ।११।
कालन्दीं पूजयेत् तत्र वृन्दां कनकभूषणाम् ।
स्फुरद्रत्नोभयतटीं श्यामलाऽमृतवाहिनीम् ।१२।
एतत् पीठं पुण्डरिकं पश्चाऽऽभरणभूषितम् ।
तत्रैव सुरभिं (भी) वृन्दं तत्प्रपानाऽष्टकं शृणु ।१३।
सुरभी, नन्दिनी, सिद्धा, चित्राङ्गी, कामधेन्वपि ।
कृष्णा, कृष्णमुखी, पीता, पूर्वादिक्रमसंस्थिताः ।१४।
तद्वाह्येऽष्टदलं कृत्वाऽम्वुजं प्रणव संपुटम् ।
तेषु चाऽष्टाऽक्षरान् मन्त्रान् विलिख्य तत्र पुजयेत् ।१५।
पूर्वपत्रं कामकूटं तत्र केशी निपातितम् ।
महाऽऽरामपरो ह्यत्र कृष्णः गोपीकदम्बकैः ।१६।
श्रीपुरं वह्निदिक् पत्रं तत्र कृष्णं प्रपूजयेत् ।
वासो हरन्तं गोपीनां नीपशाखाकृताऽऽश्रयम् ।१७।
पीठमानन्दकन्दं च निवोधोत्तर दिग्वनम् ।
यत्र वेणुवादयन्तौ रामकृष्णौ रसाऽन्वितौ ।१८।
अन्वितौ युवतीवृन्दैः गोपीभिः गीतमोहितौ ।
ऐशान्ये यत्दलं प्रोक्तम् अतिपारं तदुच्यते ।१९।
यज्ञपत्नीभिरुलासौः नानोपायनपाणिभिः ।
अन्वितौ रामकृष्णौ तौ ध्यातौ विश्वेश्वरेश्वरौ ।२०।
पश्चिमे यद्दलं प्रोक्तं पद्मपीठं विदुर्वुधाः ।
यज्ञाऽभिषिक्तो भगवान् शक्रे श्वरस्वयम्भूवान् ।२१।
वायुकोणदले पीठं वर्द्धनं विश्वमङ्गलम् ।
यत्र गोवर्द्धनं शैलं धृतवान् भगवान् प्रभुः ।२२।
दक्षिणे यद्दलं प्रोक्तं जयन्तनामपीठकम् ।

यत्र यज्ञभुजं कृष्णं चिन्तयेत् साधकोत्तमः ।२३।
नैर्ऋत्यां मोहनं पीठं तत्र कृष्णं विचिन्तयेत् ।
इत्यष्टपीठसंकाशं बसुपत्रप्रकाशनम् ।२४।(बसुपत्र-अष्टपत्र)
तद्वाह्ये षोडशदलं नानालीलाभिरावृत्तम् ।
महत्पदं महद्धाम प्रधानं षोडशं दलम् ।२५।
तत्रैव भावयेन् मन्त्री (मन्त्रैः वा) सखाषोडषमण्डलान् ।
तद्रेखा वाह्यभागेषु द्वात्रिंशद् दलमुच्यते ।२६।
जन्मादिलीलया तत्र देवदेवीभिरावृत्तम् ।
नाना क्रीडारसं तत्र कृष्णं च परिचिन्तयेत् ।२७।
तद्वाह्ये स्वर्ण्णप्राकारे कोटिसूर्य्यसमुज्जले ।
चतुर्दिक्षु महोद्यानं मन्दसौरभमोहिते ।२८।
पश्चिमे सम्मुखे श्रीमत् पारिजातद्रुमालये ।
तत्राऽधस्तु स्वर्ण्णपीठे स्वर्णमन्दिरमण्डिते ।२९।
तन्मध्ये मणिमाणिक्यरत्नसिंहासनोज्ज्वले ।
तत्रोपरि परानन्दं वासुदेवं जगद्गुरुम् ।३०।
त्रिगुणातीतम् चिद्रूपं सर्वकारणकारकम् ।
चतुर्भुजं महाधामज्योतिरूपं सनातनम् ।३१।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
रुक्मिणी सत्यभामा च सुलक्षणा ।३२।
मित्रविंधा सुनन्दा च तथा जाम्बवतीप्रिया ।
सुशीला चाष्टमहिष्यः वासुदेववृतास्ततः ।३३।
उद्धवाऽऽदिपरिषदाऽऽवृत्तः तद्भक्ततत्परः ।
उत्तरे दिव्य उद्याने हरिचन्दनसंशिते ।३४।
तत्राऽधस्तु स्वर्ण्णपीठे मणिमण्डपमण्डिते ।
तत्रोपरि च रेवतीं शंकर्षणं हलायुधम् ।३५।
पूर्वोद्याने महारम्ये सुरद्रुमतलाश्रये ।
तस्याऽधस्तु महापीठे हेममण्डपमण्डिते ।३६।

श्रीमत्या चोषया सार्द्धमनिरुद्धं जगत्पतिम् ।
प्राचीरदक्षिणभागे मंजुमुक्तान्तरस्थिते ।३७।
सन्तानवृक्षमूलस्य मणिमन्दिरमण्डिते ।
प्रद्युम्नेन रतिश्चैव तत्रोपरि समास्थितौ ।३८।
तत्राऽधस्तु च पाताले आधारशक्तिसंस्थिते ।
श्रीमदनं च तत्रस्थं तद्रूपध्यानतत्परम् ।३९।
तद्वाह्ये स्फटिक श्रीमत् पारिजातमनोहरे ।
चतुर्दिक्ष्वाऽऽवृत्ते दिव्ये प्रतिदिक् प्रसमुज्वले ।४०।
अग्रे सुरगणाः सर्वे सुरेन्द्रविधि शंकराः ।
तद्दक्षिणे मुनिवृन्दैः शुद्धसत्वात्मिकाऽऽत्मभिः ।४१।
तत् पृष्ठे गोपमुख्यैश्च सनकाद्यैर्महात्मभिः ।
तदग्रे वैष्णवाः सर्वे अन्तरिक्षे सुखासने ।४२।
प्रह्लादनारदाद्यैश्च कुमारशुकवैष्णवैः ।
मानसजपकुर्वद्भिः पूर्णप्रेमसुखात्मभिः ।४३।
वाञ्छितं तत्पदाम्भोजे निश्चलं प्रेमसाधनम् ।
तद्वाह्ये तु प्रवालाद्यैः प्राचीरि सुमनोहरे ।४४।
कृष्णं (शुक्लं) चतुर्भुजं विष्णुं पश्चिमद्वारपालकम् ।
शङ्खचक्रगदापद्मकिरीटादि विभूषितम् ।४५।
रक्तं चतुर्भुजं विष्णुं शङ्खचक्रगदाधरम् ।
किरीटकुण्डलोपेतं द्वारपालं तमुत्तरे ।४६।
गौरं चतुर्भुजं विष्णुं शङ्खचक्रगदायुधम् ।
पूर्वद्वारे द्वारपालं हरिद्वर्ण्णं चतुर्भुजम् ।४७।
कृष्णवर्ण्णं चतुर्वाहुं दक्षिणद्वारपालकम् ।
एतद् यन्त्रं महद्गोप्यं वैष्णवानां च दुर्लभम् ।४८।

य इत्थं चिन्तयित्वा च नित्यं पूजयन्ति मनसा वा ते परमज्ञानं लभन्ति (लभन्ते) । ते प्रेमभक्त्या सुवैष्णवा भवन्ति ।

॥ इति आथर्वणि पुरुषसुवोधिन्याः षष्ठप्रपाठकः ॥

॥ समाप्तोऽयमुत्तरप्रपाठकः ॥

* अथ श्रीरामचन्द्रोपनिषत् *

अथ भरद्वाजो याज्ञवल्क्यमुपसमेत्योवाच । श्रीराममन्त्रस्य माहात्म्यं मे व्रूहि भगवन्निति । स हो वाच याज्ञवल्क्यः -

स्वप्रकाशः परंज्योतिः सानुभूत्येकचिन्मयः ।
तदेव राममन्त्रस्य मनोरावक्षरः स्मृतः ।१।
अखण्डैक रसानन्दः स्तारकब्रह्मसंज्ञकः ।
रामायेति सर्वज्ञेयः सत्यानन्दश्चिदात्मकः ।२।
नमः पदं सर्वज्ञेयः पूर्णानन्दैक विग्रहः ।३। इति ।

य एतं मन्त्रराजं श्रीरामन्द्रस्य नित्यमधीते सोऽग्निना पूतो भवति । स वायुना, स आदित्येन, स सोमेन, स ब्रह्मणा, स विष्णुना, स इन्द्रेण पूतो भवति । स सर्वै देवैः ज्ञातो भवति । तेनेति हास पुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति । प्रणवानामयुतकोटि जप्तं भवति, स महान् भवति । अथ पुराणेषूदाहरन्ति -

गाणपत्येषु शैवेषु शाक्तसौरेष्वभीष्टदः ।
वैष्णवेषु च सर्वेषु राममन्त्रः फलाऽधिकः ।१।
मन्त्रस्तेषु फलायाऽऽशु फलदोऽयं षडक्षरः ।
षडक्षरोऽयं मन्त्रस्तु सर्वाऽघौघनिवारणः ।२।
मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ।
कृतं दिनेन दुरितं पक्षमासन्तु वर्षकम् ।३।
सर्वं दहति निःशेषं तूलाऽचलमिवाऽनलः ।
ब्रह्महत्या सहस्राणि ज्ञानाऽज्ञानकृतानि च ।४।
स्वर्ण्णस्तेय सुरापान गुरुतल्पाऽयुतानि च ।
कोटिकोटिसहस्राण्यु पपातकानि यान्यपि ।५।
सर्वाण्यपि प्रणश्यन्ति राममन्त्रानुकीर्त्तनात् ।
भूतप्रेतपिशाचादयाः कुष्माण्डा ब्रह्मराक्षसाः ।६।
दूरादेव पलायन्ति (न्ते) राममन्त्रप्रसादतः ।
रामाऽरण्यपशुघ्नत्वं संचितं दुरितं च यत् ।७।

मद्यपानेन यत् पापं तदप्याऽऽशु विनाशयेत् ।
अभक्षभक्षणोत्पन्नं मिथ्याज्ञानसमुद्भवम् ।८।
सर्वः विलीयते राम मन्त्रस्याऽस्याऽनु कीर्त्तनात् ।
श्रोत्रीयस्वर्ण्णहरणाद् यत्पापं समुपस्थितम् ।९।
रत्नादेश्चाऽपि हरणात् तदप्याशु विनाशयेत् ।
ब्रह्मणं क्षत्रियं वैश्यं शूद्रं हत्वाऽपि किल्विषम् ।१०।
संचिनोति नरोमोहाद् यद् वा तदपि नाशयेत् ।
गत्वाऽपि मातरं मोहाद् अगम्या चाऽपि योषितः ।११।
उपास्याऽनेन मन्त्रेण रामस्तदपि नाशयेत् ।
महापातकिपापिष्ठं संहत्य सञ्चितं च यत् ।१२।
नाशयेत् तत् कथाऽऽलापं शयनाऽशनभोजनैः ।
मातृपितृवधोत्पन्नं वुद्धिपूर्वमघं च यत् ।१३।
तदनुष्ठानमात्रेण सर्वमेतद् विलीयते ।
यत् प्रयागादि तीर्थेषु प्रायश्चित शतैरपि ।१४।
नैवाऽपनुद्यते पापं तदप्याशुविनाशयेत् ।
पुण्यक्षेत्रेषु सर्वेषु कुरुक्षेत्रादिषु स्वयम् ।१५।
वुद्धिपूर्वमघं कृत्वा तदप्याशु विनाशयेत् ।
तप्तकृच्छ्रैः तारकाद्यैः नानाचान्द्रायणैरपि ।१६।
पापं न नाशयोग्यं यत् तदप्याशु विनाशयेत् ।
मेरुतुल्यसुवर्ण्णानि पापैर्वहुविधैरपि ।१७।
यत् किंचिदपि लक्षाणि तदप्याशु विनाशयेत् ।
आब्रह्मजीवदोषा च नियमातिक्रमोद्भवाः ।१८।
स्त्रीणां च पुरुषाणां च मन्त्रेणाऽनेन नाशिताः ।
येषु येषु च दोषेषु रामभद्रमुपासते ।१९।
दुर्भिक्षादिभयद्वेषा न भवन्ति कदा च न ।
शान्तः प्रसन्नवदनो अक्रोधो भक्तवत्सलः ।२०।
अनेन सदृशो मन्त्रो कोऽपि तत्र न विद्यते ।
सम्यगाऽऽराधितो रामः प्रसीदत्येव सस्वरम् ।२१।

दद्यादाऽऽयुष्यमैश्वर्य्यम् अन्ते विष्णुपदं ब्रजेत् ।

तद् एतद् एवमुक्तम् -

ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
(दिवीव) दिविव चक्षुराततम्, तद् विप्रासो विपण्यवो
जागृवांस समीन्धते (समिन्धते) । विष्णो यत् परमं पदम् ।
स मुक्तो भवति स मुक्तो भवति इति ॥

॥ श्रीरामचन्द्रोपनिषत् समाप्ता ॥

॥ अत्र केवलं श्रीरामोपासनायाः फलानि सन्ति ॥

❋ पावमानीसूक्तम् ❋

न्यासः – ॐ पावमानीसूक्तस्य मधुछन्दः ऋषिः अनुष्टुप् छन्दः आपो देवता मार्जने विनियोगः । यथा तालपत्रपुस्तके वर्त्तते तथा लिखामि ।

ॐ यः पावमानीमध्ये गोपीभिः संभृतं रसम् ।
तस्मै सरस्वती दुघे क्षीरं सर्पिः मधूदकम् ।१।
पावमानीः स्वस्त्ययनीः स्वादु पाहि घृतश्रुतः ।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ।२।
पावमानीर्विदन्तु न इमं लोकमथाऽम्वुजं ।
कामात् सम्वर्द्धयन्तु नो देवीर्देवैः समाहृताः ।३।
येन देवा पवित्रेणाऽऽत्मानं च पुनते सदा ।
तेनाऽसहस्रधारेण पावमानीः पुनन्तु नः ।४।
(याः) पावमानीः स्वस्त्ययनी स्ताभिर्गच्छन्ति नार्थिनम् ।
पुण्यं च भक्षयन्नमर्त्योऽमृतत्वं च गच्छति ।५।
पुनन्तु मा देवजनाः पुनन्तु मनवो धिया ।
(मनसा धियः, वा)
पुनन्तु मनसा (विश्वा, वा) भूतानि जातवेदः पुनीहि माम् ॥)
पवित्रे स्थो वैष्णव्यः सवितृभ्यः प्रसव उत्पुनामि ।
आ इन्द्रेण पवित्रेण सूर्यस्य रश्मिभिः ।७।

प्राजापत्यं पवित्रं शतोर्दानं हिरण्मयम् ।
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ।८।
इन्द्रः पुनातु सह मा पुनातु सोमस्तस्यावरुणसनिच्य ।
यमो राजा प्रमृषाभिः पुनातु मा ।९।
जातवेदाश्चक्रयन्त्या पुनातु मा
ऋषयस्तु तपस्तपसे सर्वे सर्वजिगीषवः ।
तपोस्तपसोष्यन्तु पावमानी ऋचोऽब्रवीत् ।१०।
यन्मे मे गर्भे वपते पापमुग्रं
यज्जायमानस्य किञ्चिदन्यत् ।
जातस्य यदाऽपि च वर्द्धते मे
तत्पावमानीभिरहं पुनामि ।११।
क्रयविक्रयदेयजदोषाद् भक्ष्यभोज्यात् प्रतिग्रहात् ।
असम्भोगाद् वाऽपि नृशंसात् पावमानीभिरहं पुनामि ।१२।
मातापित्रोर्जन्यवृतं वचो भे यत् स्थावरजङ्गमा वभूव ।
विश्वस्य यत्र हृषितं वचो मे तत् स्थावरजङ्गमा वभूव (वभूवुः)
पावमानीभिरहं पुनामि ।१३।
गोघ्ना तस्करत्वत् स्त्रीवन्ध्या यच्चकिल्विषं ।
पावकं चरणेभ्यस्तु तत्पावमानीभिरहं पुनामि ।१४।
ब्रह्मवधात् सुरापानात् स्वर्णस्तेयाद् वृषलीगमनसङ्गात् ।
गुरुदाराऽभिगमनात् तत् पावमानीभिरहं पुनामि ।१५।
वालघ्नात् पितृमातृवधाद् भूमितस्करात् सर्वमैथुनसङ्गमात् ।
पापेभ्यश्च प्रतिग्रहं सद्यः पावमानीभिरहं पुनामि ।१६।
अयाचितात् संयुज्या तत् पावमानीभिरहं पुनामि ।१७।
अमन्त्रमन्नं यत् किञ्चित् हूयते च हुताशने ।
सम्वत्सरकृतं पापं तत् पावमानीभिरहं पुनामि ।१८।
मृतस्य योऽमृतस्यधा सविश्वदेवेभ्यः
पुण्यगन्धास्तानाऽऽपः प्रहरन्ति ।


पापांश्चाऽघोद्धारा गच्छामि सुकृतामलोकं
तत् पावमानीभिरहं पुनामि ।१९।
पापं पावमानीः स्वस्त्ययनीः याभिर्गच्छन्ति नार्थिनः ।
पुनश्चाभक्ष्यान् भक्षयन् मृतत्वं च गच्छति ।२०।
पावमानीः परंब्रह्मशुक्रं ज्योतिः सनातनम् ।
ऋषिं तस्योपतिष्ठेत क्षीरं सर्पिः मधूदकम् ।२१।
पावमानी देवान् ध्यायेद् यश्च सरस्वती (या च) ।
पितॄनस्योपतिष्ठेत क्षीरं सर्पिः मधूदकम् ।२२।
दर्भद्वयाग्रेण प्रत्यृचं शिरसिजलं सिञ्चेत् । इति ।

मन्ये - पवते इ पावमानः, तस्मात् जातः इञ् प्रत्यययोगे पावमानिः, स्त्रियामीप् पावमानी, पवमानशक्तिः, प्रथमावहुवचने पावमानीः, “शंनोदेवीः” अभीष्टय इव ॥

संग्राहकः संशोधकश्च

पण्डितः श्री उमाकान्त पण्डा

साहित्याचार्य्यः, आयुर्वेदाचार्य्यश्च
बालेश्वरम्, ओडिशा
ता १६.७.२००२ रिका



लेखकस्य कृतयः -

१. महायात्रा महाकाव्यम् (संस्कृतानुवादः)

२. दरवारकाव्यम् (संस्कृतानुवादः)

३. तपस्विनी महाकाव्यम् (संस्कृतानुवादः)

४. वकुलवनं काव्यम् (स्वकीयम्)

५. कलिङ्गविजयनाटकम् (अप्रकाशितम्)

६. मेघदूतकाव्यस्नुतनव्याख्या (अप्रकाशिता)

७. आत्मदूतकाव्यम् (अप्रकाशितम्)

८. पैप्पलादविवाहादिसंस्कारपद्धतिः (शोधग्रन्थः)

लेखकस्य पत्रव्यवहारसंकेतः

श्रीयुक्त उमाकान्त पण्डा

मार्फत - के. के. उपाध्यायः

पोलार फार्मा लिः

पोः सोमनाथपुरम्

बालेश्वरम्

ओडिशा - ७५६०१९